ગુજરાત રાજ્યના શિક્ષણવિભાગના પત્ર-ક્રમાંક
મશબ/1219/450/છ, તા.03/07/2019-થી મંજૂર

# दर्शनम् १

## मध्यमा १

## (ધોરણ 11)

**प्रतिज्ञापत्रम्**

भारतं मम देशः ।
सर्वे भारतीयाः मम भ्रातरः भगिन्यः च सन्ति ।
मम मानसे देशस्पृहा अस्ति । समृद्धिसहितं
विविधतापरिपूर्णं तस्य संस्कृतिगौरवम् अनुभवामि ।
अहं सदा तत्पात्रं भवितुं यत्नं करिष्यामि ।
अहं मम पितरौ आचार्यान् गुरुजनान् च प्रति
आदरभावं धारयिष्यामि ।
प्रत्येकेन सह शिष्टव्यवहारं करिष्यामि ।
अहं मम देशाय देशबान्धवेभ्यः च मम निष्ठाम् अर्पयामि ।
तेषां कल्याणे समृद्धौ च एव मम सुखम् अस्ति ।

मूल्यम् : ₹ 23.00

गुजरातराज्यशालापाठ्यपुस्तकमण्डलम्
'विद्यायनम्', सेक्टर 10-ए, गान्धीनगरम् - 382010

© गुजरातराज्यशालापाठ्यपुस्तकमण्डलम्, गान्धीनगरम्
अस्य पाठ्यपुस्तकस्य सर्वेऽधिकाराः गुजरातराज्यपाठ्यपुस्तकमण्डलहस्तकाः सन्ति। अस्य पाठ्यपुस्तकस्य कश्चिदपि भागः केनापि रुपेण गुजरातराज्य-पाठ्यपुस्तकमण्डलनियामकस्य लिखितानुमत्या विना प्रकाशयितुं न शक्यते।

**विषय-मार्गदर्शनम्**

विद्वान् भा. वं. रामप्रियः

**लेखन**

श्री चिन्तनः जोषी (कन्वीनर)

डॉ. लक्ष्मीनारायण भट्टः

डॉ. कार्तिकः पण्ड्या

**समीक्षणम्**

श्री भगीरथः त्रिवेदी

डॉ. मयूरीबेन भाटीया

डॉ. योगेशः त्रिवेदी

डॉ. हसमुख ठाकर

**भाषाशुद्धिः**

डॉ. लक्ष्मीनारायण भट्टः

**संयोजनम्**

डॉ. क्रिष्ना दवे
(विषय-संयोजक : अंग्रेजी)

**निर्माणायोजनम्**

श्री हरेन शाह
(उपनियामकः - शैक्षणिकः)

**मुद्रणायोजनम्**

श्री हरेश एस. लीम्बाचीया
(उपनियामकः - उत्पादनम्)

## प्रस्तावना

प्राच्यगुरुकुलपरम्परानुसारम् अध्ययनं कुर्वतां-छात्राणां कृते प्राचीनार्वाचीनयोः अध्ययनाध्यापनयोः पद्धत्योः समन्वयं कृत्वा गुजरात राज्य-माध्यमिकोच्चतर माध्यमिक शिक्षणसमितिः (बोर्ड) द्वारा नूतना-अभ्यासक्रमसंरचना कृता अस्ति। गुजरातसर्वकारद्वारा प्रमाणिताः मानिताः च अभ्यासक्रमाः सन्ति।

गुजरातसर्वकारद्वारा प्राप्तमान्यतायाः **दर्शनम् १ मध्यमा १ (धोरण 11)** इति विषयस्य नूतनाभ्यासक्रमानुसारं सज्जीकृतमिदं पुस्तकं-प्रकाशनात् प्राक् विषयज्ञैः सर्वाङ्गीणतया-समीक्षितं संसूचितपरिवर्तनानुसारं हस्तलिखितेषु लेखेषु योग्यतया संशोधनानन्तरं प्रकाशितमस्ति।

प्रस्तुतं पाठ्यपुस्तकं कक्षानुसारम् उपयोगि परिशुद्धं च कर्तुं मण्डलद्वारा कृते प्रयत्नेऽपि न्यूनतापरिपूर्णार्थं विद्वद्भिः सूचिताः सूचनाः सादरं स्वीकरणीयाः एव।

**पी. भारती** (IAS)
नियामकः — कार्यवाहकः प्रमुखः
ता. 06-07-2019 — गान्धीनगरम्

प्रथमावृत्ति : 2019

**प्रकाशक :** गुजरातराज्यशालापाठ्यपुस्तकमण्डलम् , 'विद्यायनम्', सेक्टर 10-ए, गान्धीनगरप्रतिनिध्येन पी. भारती, नियामकः

**मुद्रक :**

# मूलभूतकर्तव्यानि

**प्रत्येकं भारतीयनागरिकस्य कर्तव्यानि निम्नानुसारं स्युः। ***

(क) संविधान प्रति प्रामाणिकत्वम् आदर्शत्वं संस्थानां राष्ट्रध्वजस्य राष्ट्रीयगीतस्य च आदरः।

(ख) स्वातन्त्र्याय अम्मीयराष्ट्रियसत्याग्रहं प्रेरयताम् आदर्शानां हृदये प्रतिष्ठापनम् अनुसरणं च।

(ग) भारतस्य सार्वभौमत्वस्य एकतायाः अखण्डिततायाश्च समर्थनं च।

(घ) देशस्य रक्षणं राष्ट्रियसेवायै उद्घोषाणायां जातायां तदनुसरणञ्च।

(च) धार्मिक-भाषाकीय-प्रादेशिकेभ्यः धार्मिकेभ्यो वा भेदेभ्यः परं स्थित्वा, समस्तभारतीयेषु साम्मनस्यसमानबन्धत्वभावनायाः वृद्धिः, स्त्रीणां गौरवहानिकारकव्यवहारत्यागश्च।

(छ) अस्माकं समन्वितसंस्कृतेः समृद्धदायस्य मूल्यं ज्ञात्वा तदवग्रहः।

(ज) वनानां तडागानां नदीनाम् अन्यवन्यपशुपक्षिसहितं प्राकृतिकपर्यावरणरक्षणं तद्वर्धनं तथैव जीवमात्रं प्रति अनुकम्पाभावः।

(झ) वैज्ञानकिमानसाय मानवतावादाय जिज्ञासायै भावनाभिगमाभिबोधः।

(ट) सामान्यसम्पत्तिरक्षणं हिंसायाः त्यागश्च।

(ठ) राष्ट्रं पुरुषार्थस्य सिद्धेश्च अधिकाधिकमुन्नतसोपानानि प्रति सततं प्रगतिशीलं स्यात्तदर्थं वैयक्तिकसामूहिकप्रवृत्तीनां समस्तक्षेत्रेषु श्रेष्ठत्वम् आसादयितुं प्रयत्नः।

(ड) मात्रा पित्रा अथवा अभिभावकेन षड्वर्षतः चतुर्दशवर्षं यावत् (६. तः १४) वयसे बालकाय अथवा पाल्याय शिक्षणलाभाः देयाः।

* भारतीय संविधानम् : अधिनियमः 51-क

# अनुक्रमणिका

## न्यायदर्शनम्


| | | |
|---|---|---|
| १. | दर्शनपरिचयः | १ |
| २. | न्यायवैशेषिकदर्शनपरिचयः | ७ |
| ३. | न्यायवैशेषिकग्रन्थानां परिचयः | १२ |
| ४. | न्यायवैशेषिकग्रन्थकर्तॄणां परिचयः | १६ |
| ५. | तर्कसंग्रहे पदार्थविवेचनम् | २० |
| ६. | तर्कसंग्रहे प्रत्यक्षप्रमाणम् | २५ |
| ७. | तर्कसंग्रहे अनुमानस्वरूपम् | ३६ |
| ८. | तर्कसंग्रहे उपमानशब्दप्रमाणनिरूपणम् | ४२ |
| ९. | तर्कसंग्रहे अवशिष्टो भागः | ४६ |


## वेदान्तदर्शनम्


| | | |
|---|---|---|
| १०. | वेदान्तपरिचयः | ५२ |
| ११. | दशोपनिषदः | ५८ |
| १२. | वेदान्तदर्शनग्रन्थकारणां परिचयः | ६६ |
| १३. | ब्रह्मसूत्रपरिचयः | ७४ |
| १४. | श्रीमद्भगवद्गीतापरिचयः | ७९ |
| १५. | ज्ञानयोगः | ८७ |
| १६. | भक्तियोगः | ९५ |
| १७. | कर्मयोगः | १०२ |

# न्यायदर्शनम्

## १ दर्शनपरिचयः

### प्रस्तावना

यदि वयं गतिं प्रगतिम् इच्छामः तर्हि दृष्टिः आवश्यकी अर्थात् 'दर्शनम्' नेत्रम् अत्यावश्यकम् । यदेवं स्थूलशरीरं नयति । तस्मादेव नयति इति नयनम् उच्यते । तथैव आस्माकीनम् आध्यात्मिकजीवनमपि प्रगतिंप्राप्नुयात्, तदर्थं तत्त्वदर्शकानि दर्शनानि आवश्यकानि । दर्शनविहीनः नरः अन्धः भवति । मानवजीवने दर्शनशास्त्रं नितराम् उपादेयम् । तस्मात् एतस्मिन् पाठे वयं दर्शनानां परिचयं प्राप्नुमः ।

### दर्शनशब्दविचारः

#### दर्शनशब्दव्युत्पत्तिः

दर्शनम् इति रूपं '**दृशिर् प्रेक्षणे**' इति प्रेक्षणार्थक दृश् धातो : '**भावकरणयोः ल्युट्**' इति सूत्रेण 'अन' इति आदेशे कृते स्वादिकार्ये च सिद्ध्यति ।

#### दर्शनशब्दार्थ :

दृश्यते, ज्ञायते येन तद् दर्शनम् । उपनिषत्सु सत्यस्य दर्शनाय 'दृश्' इति धातोः प्रयोग अभवत् । दर्शनशब्दे करणे 'ल्युट्' प्रत्ययः कृतः अस्ति । करणम् अर्थात् क्रियायां प्रकृष्टोपकारकम्, साधनम् इति वा । येन साधनेन च इदं वस्तुजातम्, ब्रह्म जीवात्मा प्रकृतिश्च याथातथ्येन दृश्यते-निरीक्ष्यते-परीक्ष्यते च तद् साधनम् एव 'दर्शनम्' इति प्रसिद्धम् । अयं संसारः आधिभौतिकादित्रिविधतापैः सन्तप्तः अस्ति, एभ्यः त्रिविधतापेभ्यः सर्वथा मुक्त्यर्थं ऋषिभिः सूक्ष्मचिन्तनद्वारा ये ये अनुभूतिसम्पन्नाः सिद्धान्ताः प्रदत्ताः सन्ति, तेषां लिखितानां सिद्धान्तानां यत् ग्रन्थस्वरूपम् अस्ति तद् दर्शनशास्त्रम् इति कथ्यते ।

(क) समस्तम् अपि आधिभौतिकम् आध्यात्मिकं च विवेचनं दर्शनशब्दान्तर्गतं भवति ।

(ख) आङ्ग्लभाषायां 'दर्शनम्' इति शब्दार्थस्य कृते Philosophy फिलोसोफी इति पदं प्रयुज्यते । Philosophy इति शब्दः यूनानी (Greek) Philos-Sopha इति पदद्वयेन निष्पन्नः । यस्यार्थः विद्यानुरागः । लेटिन् भाषायां च Phil-Principle, सिद्धान्ततत्त्वम् । Sophy-Science तच्च तत्त्वज्ञानम् इति भवति । सम्पूर्णः अर्थः तत्त्वशास्त्रम्, तत्त्वविज्ञानम् । Principles of Science इति । एवं दर्शनं नाम 'ज्ञानं प्रति तत्त्वज्ञानं प्रति प्रेम, अनुरागो वा' । ते तत्त्वज्ञानप्रेमिणः 'दार्शनिकाः' इति शब्देन विश्वे प्रसिद्धाः सन्ति ।

(ग) संस्कृतवाङ्मये दर्शनशास्त्राणां स्थानम् उच्चतमं वर्तते । यतो हि तद् उच्चतमं तत्त्वज्ञानं दर्शयति, मार्गदर्शनं वा करोति ।

(घ) आत्मदर्शनब्रह्मदर्शनरूपं तत्त्वदर्शनम् अध्यात्मदृष्ट्या एव भवति यथा-प्रोक्तं,

**''आत्मा वाऽरे द्रष्टव्यः श्रोतव्यः मन्तव्यो निदिध्यासितव्यः ।**
**मैत्रेय्यात्मनि खल्वरे दृष्टे मते विज्ञाते इदं सर्वं विदितम् ॥''**

(बृहदारण्यकोपनिषत्)

**''तस्माद् आत्माऽक्षरः शुद्धो बुद्धो नित्यः सर्वगतोऽव्ययः ।**

**उपासितव्यो मन्तव्यः श्रोतव्यश्च मुमुक्षुभिः ॥''**

(अद्भुतरामायणम्)

(ङ)

(१) किं ब्रह्म ?, (२) तस्य किं स्वरूपम् ?, (३) क ईश्वरः ?, (४) के च तस्य प्राप्तेः उपायाः ?, (५) अस्मिन् जगति किं शाश्वतं सत्यम् ?, (६) इयं सृष्टिः कुत आविर्बभूव ?, (७) जीत्वात्मनः किं स्वरूपम् ?, (८) कः पुनर्जायते ?, (९) किं लिङ्गशरीरम् ?, (१०) जीवनस्य कुत उद्भवः ? किं तस्य लक्ष्यम् ?, (११) कथं मोक्षप्राप्तिः ?, (१२) आत्मा चेतनः अचेतनो वा ?, (१३) सृष्टेः कः कर्ता ?, (१४) किं श्रेयः ? किञ्च प्रेयः ?

दर्शनशास्त्रम् इत्याद्यनेकजिज्ञासानां सूक्ष्मातिसूक्ष्मं विवेचनं कृत्वा जीवानाम् कृते परमोपकारं विदधाति ।

(च)

दर्शनं सामाजिकचेतनायाः रूपम् अस्ति । इदं 'दर्शनम्' विशिष्टप्रकारकं विज्ञानम् अस्ति । दर्शनशास्त्रस्य अध्ययनेन जगतः ईश्वरस्य मायायाः प्रकृतेः च ज्ञानं भवति । कार्यकारणयोः तत्त्वज्ञानं दर्शनेन एव भवितुं शक्यते, ततः तत्त्वज्ञानम्, तस्मात् परं श्रेयः भवति ।

**दर्शनशास्त्रस्य प्रकाराः**

**वैदिकदर्शनानि षट् -**

(१) न्यायदर्शनम् ।, (२) वैशेषिकदर्शनम् ।, (३) सांख्यदर्शनम् ।, (४) योगदर्शनम् ।, (५) पूर्वमीमांसादर्शनम् ।, (६) उत्तरमीमांसा दर्शनम् ।,

अवैदिकदर्शनानि त्रीणि–

(१) चार्वाकदर्शनम् ।, (२) बौद्धदर्शनम् ।, (३) जैनदर्शनम् ।

एतेषां दर्शनप्रवर्तकानां चर्चा अग्रे विधास्यते ।

**दर्शनम्**

↓

| वैदिकम् | अवैदिकम् |
|---|---|
| ↓ | ↓ |
| षट् | त्रीणि |

**आस्तिकनास्तिकभेदविचारः**

भारतीयदर्शनशास्त्रवाङ्मयं द्विधा विभज्यते । आस्तिकदर्शनम्, नास्तिकदर्शनं च । अस्ति परलोके मतिः यस्य स आस्तिकः, नास्ति परलोके मतिः यस्य सः नास्तिकः । अथवा अस्ति पारलौकिकविषयप्रवृत्तिः यस्य स आस्तिकः, नास्ति च पारलौकिकविषयप्रवृत्तिः यस्य सः नास्तिकः ।'अस्तिनास्ति दिष्टं मतिः' (८.८.६०) इति पाणिनीयसूत्रेण ठक्प्रत्यये 'ठस्येक' इति सूत्रेण ठकारस्य स्थाने 'इक' आदेशे स्वादिकार्ये कृते आस्तिकनास्तिकपदद्वयं सिद्ध्यति । तत्र आस्तिकदर्शनानि वेदसमर्थकानि साङ्ख्य-योग-न्याय-वैशेषिक-वेदान्त-मीमांसादर्शनानि सन्ति । नास्तिकाः वेदनिन्दकाः सन्ति । ते वेदप्रामाण्यं न स्वीकुर्वन्ति । तेषु चार्वाकजैनबौद्धाः प्रमुखाः सन्ति । तथा चोक्तम् -

**नास्ति वेदादितो लोक, इति येषां मतिः स्थिरा ।**

**नास्तिकास्ते तथास्तीति मतिर्येषान्त आस्तिकाः ॥ १॥**

**अवैदिक प्रमाणानां सिद्धान्तानां च प्रदर्शकाः ।**

**चार्वाकाद्या षड्विधास्ते, ख्याता लोकेषु नास्तिकाः ॥ २ ॥**

तस्मात् कारणात् एव दृष्टादृष्टवादिभेदेन इदं दर्शनं द्विधा विभक्तम् । दृष्टवादी तु दृष्टप्रपञ्चे नास्तित्वबुद्धिस्वीकारात् नास्तिकनाम्ना प्रसिद्धः अपरञ्च अदृष्टवादी दृष्टात् परयोः आत्मपरमात्मनोः अस्तित्वं स्वीकरोति अतः आस्तिकनाम्ना प्रसिद्धः ।

**आस्तिकनास्तिकदर्शनप्रवर्तकाः ।**

आस्तिकानि च षड्दर्शनानि त्रिधा विभक्तानि । द्वौ तर्कौ, द्वे सांख्ये, द्वे मीमांसे च । तत्र समानतन्त्रयोः मध्ये न्यायस्य प्रवर्तकः महर्षिः गौतमः । वैशेषिकदर्शनस्य प्रवर्तकः महर्षिः कणादः अस्ति । सांख्यदर्शनस्य प्रवर्तकः भगवान् पतञ्जलिः । पूर्वमीमांसानामकस्य दर्शनस्य प्रवर्तकः महर्षिः जैमिनिः । उत्तरमीमांसायाः (वेदान्तदर्शनस्य) प्रवर्तकः भगवान् वेदव्यासः इति । दर्शनशास्त्राणां प्रवर्तकाः महर्षय एव तत्तद्दर्शनस्य सूत्रकाराः । एवमेव प्रत्येकं सूत्रग्रन्थस्य वृत्तिग्रन्थः, भाष्यग्रन्थश्च उपलभ्यते । तत्र वृत्तिग्रन्थस्य रचयिता वृत्तिकारः तथा भाष्यस्य निर्माता भाष्यकार इति पदेन प्रसिद्धाः ।

तत्र वेदान्तसूत्राणां भाष्यकारा अनेके, तद्यथा शङ्कररामानुजमध्वनिम्बार्कवल्लभाचार्यप्रभृतयः प्रसिद्धाः । तेऽपि च प्रत्येकं सिद्धान्तस्य सम्प्रदायस्य वा प्रवर्तकरूपेण प्रसिद्धाः सन्ति । यथा अद्वैतस्य श्रीशङ्कराचार्याः, शुद्धाद्वैतस्य श्रीवल्लभाचार्याः, विशिष्टाद्वैतस्य श्रीरामानुजाचार्याः, द्वैताद्वैतस्य श्रीनिम्बार्काचार्याः, द्वैतस्य श्रीमध्वाचार्याः इन्यादयः सन्ति । चार्वाकदर्शनस्य बृहस्पतिः, जैनदर्शनस्य श्रीमहावीरमुनिः गणधराः, बौद्धदर्शनस्य श्रीबुद्धानुयायिनः बौद्धाचार्याः च प्रवर्तकाः सन्ति । एवम्प्रकारेण प्रवर्तकाः, भाष्यकाराः, वृत्तिकाराः च अभूवन् ।

# दर्शनम्

- आस्तिकदर्शनम्
- नाास्तिकदर्शनम्
  - चार्वाकदर्शनम् (प्रवर्तक:) (बृहस्पति:)
  - जैनदर्शनम् (प्रवर्तक:) (महावीर:)
  - बौद्धदर्शनम् (प्रवर्तक:) (बुद्ध:)

## द्वौ तर्कौ

- **न्याय:**
  - प्रवर्तक: (सूत्रकार:) **गौतममहर्षि:**
  - वृत्तिकार: **विश्वनाथ:**
  - भाष्यकार: **वात्स्यायन:**
- **वैशेषिकम्**
  - प्रवर्तक: (सूत्रकार:) **कणादमहर्षि:**
  - वृत्तिकार: **भारद्वाज:**
  - भाष्यकार: **प्रशस्तपाद:**

## द्वे सांख्ये

- **सांख्यम्**
  - प्रवर्तक: (सूत्रकार:) **कपिलमहर्षि:**
  - वृत्तिकार: **माठर:**
  - भाष्यकार: **गौडपादाचार्य:**
- **योग:**
  - प्रवर्तक: (सूत्रकार:) **पतञ्जलिमहर्षि:**
  - वृत्तिकार: **भोजराज:, नागोजीभट्ट:**
  - भाष्यकार: **व्यास:**

## द्वे मीमांसे

- **पूर्वमीमांसा**
  - प्रवर्तक: (सूत्रकार:) **जैमिनीमहर्षी:**
  - वृत्तिकार: **उपवर्ष:**
  - भाष्यकार: **शबर:**
- **उत्तरमीमांसा**
  - प्रवर्तक: (सूत्रकार:) **वेदव्यास:**
  - वृत्तिकार: **बोधायन:**
  - **भाष्यकारा:**

**शुद्धाद्वैतम्**–वल्लभाचार्य: → **द्वैताद्वैतम्**–निम्बार्काचार्य: → **द्वैतम्**–मध्वाचार्य: → **विशिष्टादैतम्**–रामानुजाचार्य: → **अद्वैतम्**–शङ्कराचार्य:

## स्वाध्यायः

### १. योग्यविकल्पं चित्वा उत्तरं लिखत ।

(१) 'दर्शनम्' इति पदे कः धातुः ?

(क) प्रेक्ष् (ख) दृश् (ग) दर्श् (घ) ईक्ष्

(२) 'दर्शनम्' इति कस्मिन् अर्थे कः प्रत्ययः ?

(क) भावे ण्वुल् (ख) कर्मणि ल्युट् (ग) करणे ल्युट् (घ) कर्तरि ण्वुल्

(३) 'दर्शनम्' किम् ?

(क) साध्यम् (ख) साधनम् (ग) लक्ष्यम् (घ) किमपि न

(४) ऋषिभिः सूक्ष्मचिन्तनद्वारा किं प्रदत्तम् ?

(क) सिद्धान्ताः (ख) शास्त्रम् (ग) भाषाज्ञानम् (घ) आत्मज्ञानम्

(५) आङ्ग्लभाषायां 'दर्शनम्' इति शब्दार्थस्य स्थाने कः शब्दप्रयोगः ?

(क) Philosophy (ख) Philos (ग) Sophy (घ) Sopha

(६) विश्वे 'दार्शनिकाः' इति पदेन के व्यवह्रियन्ते ?

(क) तत्त्वदर्शिनः (ख) तत्त्वज्ञानप्रेमिणः (ग) तात्त्विकाः (घ) सात्त्विकाः

(७) 'आत्मा वाऽरे' इति मन्त्रः कुत्र वर्तते ?

(क) भागवते (ख) गीतायाम् (ग) रामायणे (घ) उपनिषदि

### २. रिक्तस्थानं पूरयत ।

(१) आत्मा वाऽरे ______________ इदं सर्वं विदितम् ।

(२) तस्माद् आत्माऽक्षर ______________ मुमुक्षुभिः ।

(३) नास्ति वेदादितो ______________ आस्तिकाः ।

(४) अवैदिकप्रमाणानां ______________ आस्तिकाः ।

(५) अस्ति ______________ मतिः ।

### ३. युग्मानि योजयत ।

| अ | ब |
|---|---|
| (१) नास्तिकाः | (१) परलोके मतिः । |
| (२) अवैदिकः | (२) बौद्धः । |
| (३) सौत्रान्तिकः | (३) कपिलः । |
| (४) न्यायप्रवर्तकः | (४) चार्वाकजैनबौद्धाः । |
| (५) सांख्यप्रवर्तकः | (५) गौतमः |
| | (६) वैदिकेतरः । |
| | (७) कणादः । |

## ४. एकवाक्येन उत्तरं लिखत ।

(१) 'दर्शनम्' इति पदस्य का व्युत्पत्तिः ?

(२) आस्तिकनास्तिकशब्दयोः का व्युत्पत्तिः ?

(३) उत्तरमीमांसाया अपरं नाम किम् ?

(४) देहात्मवादः कस्य दर्शनस्य ?

(५) अद्वैतवादः कस्य दर्शनस्य ?

## ५. द्वित्रवाक्यैः उत्तरं लिखत ।

(१) 'दृष्टादृष्टवादित्वम्'नाम किम् ?

(२) मुख्याः जिज्ञासाः काः काः सम्भवेयुः ?

(३) परमं श्रेयः कदा भवति ?

## ६. टिप्पणीं लिखत ।

(१) के के वादाः ?

(२) दर्शनशब्दार्थविचारः

(३) दर्शनप्रवर्तकाणां नामानि लिखन्तु ।

## ७. सविस्तरम् उत्तरं लिखत ।

(१) दर्शनशास्त्रप्रकाराणां सम्यक् प्रतिपादनं कुरुत ।

(२) आत्मा वाऽरे ............ ॥ इति मन्त्रस्य भावार्थो लेख्य : ।

(३) तस्माद् आत्माऽक्षरः ............ इति कारिकां स्पष्टयत ।

●

# २ न्यायवैशेषिकदर्शनपरिचयः

## प्रस्तावना

सामान्यदर्शनपरिचयानन्तरं दर्शनविशेषजिज्ञासायां सत्यां न्यायदर्शनम्, वैशेषिकदर्शनं च प्राथम्येन स्मृतिपटले आयातम् । यतो हि दार्शनिकबुद्धिः आभ्यां विना न सम्भवति । अखिलब्रह्माण्डस्थानां पदार्थानां तात्त्विकं विवेचनम् अनयोः दर्शनयोः मध्ये प्राप्यते ।

तस्मात् एतस्मिन् पाठे वयं न्यायवैशेषिकदर्शनपरिचयं जानीमः ।

## न्यायवैशेषिकशब्दार्थाविचारः

### न्यायः

षडास्तिकदर्शनेषु न्यायदर्शनस्य प्रमुखं स्थानम् अस्ति । **'नियमेन ईयते' इति न्यायः ।'परिन्योर्नीणोः'** (३०:३०) इति घञ् ।

- **प्रमाणैः अर्थ परीक्षणं न्यायः ।** इति (वात्स्यायनभाष्ये १.१.१)
- **नीयते = प्राप्यते अयनं = मोक्षः, येनासौ न्यायः ।**
- **नीयते-अधिगम्यते विवक्षितार्थस्य सिद्धिः येन असौ न्यायः ।**

इदं हि शास्त्रम् **'आन्वीक्षिकी'** इति नाम्ना अपि प्रसिद्धम् । प्रत्यक्षागमाश्रितम् अनुमानं सा अन्वीक्षा । प्रत्यक्षानुमानाभ्याम् ईक्षितस्य अन्वीक्षणम् अन्वीक्षा, तया प्रवर्तते इति आन्वीक्षिकी न्यायविद्या न्यायशास्त्रम् इति वात्स्यायनेन कथितम् ।

न्यायभाष्ये कथितम् **'नानुपलब्धेऽर्थे न निर्णीतेऽर्थे न्यायः प्रवर्तते किं ? तर्हि संशयितेऽर्थे'** इति (न्यायभाष्ये १.१.१) मनुस्मृतौ एतत् हेतुशास्त्रम् इति कथ्यते । तर्कशास्त्रम् इति महाभारते, एवम् अस्य आन्वीक्षिकी (अनुमानशास्त्रम्), तर्कविद्या, वादशास्त्रम्, प्रमाणशास्त्रम्, हेतुविद्या, मननशास्त्रम्, अक्षपाददर्शनम् इत्यादीनि अन्यानि नामानि सन्ति ।

### वैशेषिकः

विशेषम् एव स्वीकरोति अभ्युपगच्छति इति वैशेषिकः । विशेषशब्दात् ठक् प्रत्यये कृते तस्य इकादेशे स्वादिकार्ये कृते वैशेषिकः इति रूपं सिद्धं भवति ।

विशेष इति व्यवच्छेदकार्थः शब्दः अस्ति, अतः विशिष्यते सर्वतः व्यवच्छिद्यते पृथक्क्रियते येन सः विशेषः । विशेषाभ्यां व्यवच्छेदकाभ्यां साधर्म्यवैधर्म्याभ्यां प्रभवतीति वैशेषिकम् ।

अस्मात् पदार्थात् अयं पदार्थः भिन्नः इति भेदः विशेषद्वारा स्पष्टः भवति ।

तथा च वैशेषिकशब्दस्योत्पत्तिविषये मतवैभिन्यं दृश्यते । केचन वदन्ति कणादः विशेषस्य उपदेष्टा, इदं दर्शनं च न्याय सांख्यादिदर्शनतुलनया द्रव्यादिपदार्थानां प्रतिपादने विशिष्टम् इति हेतोः वैशेषिकम् इति नाम प्राप्तवत् । अन्ये कथयन्ति पदार्थेषु पञ्चमपदार्थस्य 'विशेषस्य' अतिरिक्ततया कथनाद् वैशेषिकम् इति नाम । वस्तुतः अन्तिमं मतं सुदृढम् इति बहुभिः स्वीक्रियते ।

### न्यायमहत्त्वम्

न्यायशास्त्रस्य महत्त्वं तु सर्वशास्त्रोपकारकत्वेन सर्वत्र एव प्रसिद्धम् अस्ति । तथा च उक्तम् –

**प्रदीपः सर्वविद्यानाम् उपायः सर्वकर्मणाम् ।**
**आश्रयः सर्वधर्माणां विद्योद्देशे प्रकीर्तिता ॥**
**सम्यक् दर्शनसम्पन्नः कर्मभिर्न निबध्यते ।**
**दर्शनेन विहीनस्तु संसारं प्रतिपद्यते ॥**

न्यायशास्त्रम् अतिप्राचीनम् । अस्य प्रवर्तकः सूत्रकारः गौतमः । ५०० ई. पू. समये बभूव । अस्य महर्षिगौतमस्य धर्मपत्नी 'अहल्या' चासीत् । शतानन्दनामा पुत्रः श्रीमिथिलेश्वरस्य पुरोहितोऽप्यासीदिति श्रूयते । श्रीगौतमस्य अपरं नाम अक्षपादः अपि आसीत् । गौतमप्रवर्तितं न्यायशास्त्रं पदार्थमीमांसाशास्त्रम् । तत्र प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्त-सिद्धान्तावयवतर्कनिर्णय-वादजल्प-वितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगम इति तत्सिद्धान्तः । प्रमाणप्रमेयादारभ्य 'हेत्वाभासाश्च यथोक्ताः' इत्येतत् पर्यन्तं तदिदं पञ्चाध्यायात्मकं न्यायशास्त्रम् ।

तत्र प्रत्यध्यायम् आह्निकद्वयम् अस्ति । न्यायशास्त्रेतराणि यानि व्याकरणवेदान्तप्रभृतीनि शास्त्राणि तानि सर्वाणि एव न्यायशास्त्रस्य अपेक्षां कुर्वन्ति । तस्मादेव कथितम् **'काणादं पाणिनीयं च सर्वशास्त्रोपकारकम्'** । **'मानधीना मेयसिद्धिः' एवम् ''लक्षणप्रमाणाभ्यां वस्तुसिद्धिः''** इत्यनेनापि प्रमाणभूतेन वाक्यद्वयेन न्यायशास्त्रस्य महत्त्वं समुद्गीयमानं भवति ।

### वैशेषिकमहत्त्वम्

वैशेषिकदर्शनस्य प्रवर्तकः महर्षिः कणादः । 'कण कणं अत्ति' इति अन्वर्थनाम्ना प्रसिद्धः कणादः । तस्य अपरं नाम 'काणाददर्शनम्' इति उच्यते । अस्य अन्यं च नाम औलूक्यदर्शनम् भवति । यतो हि कणादः उलूकार्षेः पुत्र इति हेतोः औलूक्यदर्शनम् इति नाम । केचन वदन्ति यत् ईश्वरः स्वयमेव उलूकस्य रूपं धृत्वा तस्मै कणादाय षट्पदार्थान् उपदिदेश इति हेतोः अस्य नाम औलूक्यम् ।

न्यायवैशेषिकयोः समानतन्त्रत्वं वर्तते । न्यायदर्शने प्रतिपादितानां विषयाणां समानः विचारः वैशेषिकदर्शनेऽपि समुपलभ्यते । परन्तु अत्र 'विशेष' इति पदार्थः स्वतन्त्रतया परिगण्यते । न्यायदर्शने प्रमाणं प्रधानतया विचार्यते, वैशेषिके तु प्रमेयस्य प्रधानतया विचारः क्रियते ।

**ध्वान्तस्य वामोरु ! विचारणायां वैशेषिकं चारु मतं मतं मे ।**
**औलूक्यमाहुः खलु दर्शनं तत् क्षमं तपस्तत्वनिरूपणाय ॥**
**- नैषधीयचरितम् ।**

इदं दर्शनं सर्वशास्त्रोपकारकम् । रावणेन अस्य दर्शनस्य भाष्यं प्रणीतम्, यन्नोपलभ्यते । तदनन्तरं भारद्वाजवृत्तिः प्रशस्तपादभाष्यम्, शङ्करमिश्रस्य उपस्कारः, जगन्नारायणभट्टस्य काणादसूत्रवृत्तिः, चन्द्रकान्तभट्टस्य वैशेषिकभाष्यञ्च उपलभ्यते ।

### वैशेषिकदर्शनस्य आदिमं सूत्रम्

धर्मविशेषप्रसूतात् द्रव्यगुणकर्मसामान्यविशेषसमवायानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसाधिगमः । अनेन सिध्यति यत् इदं दर्शनं न केवलं विशेषपदार्थविवेचकम्, अपितु तत्त्वज्ञानात् सविशेषं मोक्षमपि साधयति, इति हेतोः सर्वथा उपादेयं वैशेषिकदर्शनम् ।

## न्यायवैशेषिकदर्शनपरम्परा

### न्यायदर्शनस्य ग्रन्थाः

प्राच्यन्यायग्रन्थेषु गौतमप्रणीतं न्यायसूत्रं सर्वप्राचीनम् अस्ति । अस्य ग्रन्थस्योपरि अनेकानि भाष्याणि रचितानि आसन् । परन्तु वात्स्यायनस्य न्यायभाष्यं सर्वप्राचीनमस्ति, तद् इदानीम् अपि समुपलभ्यते । अस्य भाष्यस्योपरि भारद्वाजोद्योतकराचार्यः

(५६० ई.) न्यायभाष्यवार्त्तिकं रचितवान् । वासवदत्तायाः रचयिता सुबन्धुः स्वकाव्ये उद्योतकारम् उल्लिखितवान् । दिङ्नागस्य सुप्रसिद्धः टीकाकारः धर्मकीर्तिः (६३५ ई.) उद्योतकारस्य खण्डनं प्रमाणवार्त्तिके न्यायबिन्दौ च कृतवान् । मिथिलावास्तव्यः वाचस्पतिमिश्रः (८४१ ई.) उद्योतकारस्य वार्त्तिकोपरि तात्पर्यटीकां रचितवान् । अयं तात्पर्याचार्य इत्यप्युच्यते । अस्य अपरो ग्रन्थः 'न्यायसूचीनिबन्धः' वर्तते । अयं ग्रन्थकारः 'सर्वतन्त्रस्वतन्त्र' इति नाम्ना प्रसिद्धः । दशमशतके 'करिओन' ग्रामनिवासी उदयनाचार्यः तात्पर्यटीकाया उपरि परिशुद्धिः इति व्याख्यां लिलेख । एतदतिरिच्य 'न्यायकुसुमाञ्जलिः' 'आत्मतत्त्वविवेकः' इति ग्रन्थद्वयमपि अनेन प्रणीतम् । न्यायसूत्रस्योपरि वृत्तिटीका 'न्यायमञ्जरी' जयन्तभट्टस्य (८८० ई.) प्रसिद्धः ग्रन्थः अस्ति ।

मध्यकाले भासर्वज्ञः 'न्यायसारः' इति एकं स्वतन्त्रं ग्रन्थं रचयामास । ततः 'बौद्धमतखंडनपरकः ईश्वरसिद्धिसाधकः' 'न्याय कुसुमाञ्जलिः' नामकग्रन्थः प्रसिद्धः । प्रायः द्वादशशतके न्यायशास्त्रस्येतिहासे अद्‌भुतं परिवर्तनं जातम् । सा रचनाधारा नव्यन्यायधारा इत्युच्यते । गङ्गेशोपाध्यायः गौतमन्यायसूत्रात् तत्त्वचिन्तामणिं रचितवान् । अयं ग्रन्थः प्रमाणशास्त्रम् इत्यप्युच्यते । नव्यन्यायधारायाः अयमेव मौलिको ग्रन्थः अस्ति । अस्य ग्रन्थस्य 'प्रकाश' इति टीका गङ्गेशोपाध्यायस्य पुत्रेण वर्धमानेन लिखिता वर्तते । तदनन्तरं पक्षधरमिश्रेण 'आलोक' टीका, वासुदेवमिश्रेण 'न्यायसिद्धान्तसारः' रुचिदत्तमिश्रेण 'प्रकाश'टीका च प्रणीता । रघुनाथशिरोमणिना (१३०० ई.) तत्त्वचिन्तामणेः दीधितिटीका रचिता ।

मथुरानाथतर्कवागीशः (१५८० ई.) आलोकचिन्तामणि–दीधिति टीकां विलिख्य न्यायशास्त्रस्य विषयबिन्दूनां स्पष्टीकरणं चकार । तदनन्तरं जगदीश भट्टाचार्यः (१०२५ ई.) तर्कालङ्कारःदीधितेः उपरि टिप्पणीं लिखितवान् ।

एतदतिरिच्य जगदीशमिश्रस्य 'अनुमानमयूखः', वल्लभाचार्यस्य न्यायलीलावती, माधवदेवस्य 'न्यायशास्त्रसारः' गोवर्धनमिश्रस्य 'तर्कभाषाप्रकाशः' गौरीकान्तसार्वभौमभट्टाचार्यस्य 'भावार्थदीपिका' 'सद्युक्तिमुक्तावली' केशवमिश्रस्य 'तर्कभाषा' अन्नंभट्टस्य 'तर्कसंग्रहः' विश्वनाथपञ्चाननस्य' सिद्धान्त मुक्तावली' इत्यादिग्रन्थाः न्यायशास्त्रवाङ्मये प्रसिद्धाः सन्ति ।

### वैशेषिकग्रन्थाः

वैशेषिकसाहित्यं नातीव विस्तृतमिति प्रतिभाति । अस्य दर्शनस्य आद्यः ग्रन्थः वैशेषिकसूत्रग्रन्थः इति नाम्ना प्रसिद्धः अस्ति । तत्र दश अध्यायाः, प्रत्यध्यायम् आह्निकद्वयम्, सर्वेषु आह्निकेषु आहत्य ३७० सूत्राणि च सन्ति । अस्यैव ग्रन्थस्य सूत्राणाम् उपरि रचितं सर्वप्राचीनं भाष्यं 'रावणभाष्यम्' अस्ति, किन्तु भाष्यमेतत् इदानीं नोपलभ्यते । किन्तु ब्रह्मसूत्रशाङ्करभाष्यस्य रत्नप्रभाटीकायाम् (२–२–११) अस्य भाष्यस्य चर्चा समुपलभ्यते । वैशेषिकसूत्राणाम् उपरि समुपलब्धेषु भाष्येषु प्रशस्तपादेन रचितं प्रशस्तपादभाष्यं सर्वाङ्गपूर्णं वर्तते ।

वैशेषिकसिद्धान्तानां स्पष्टतया विचारः अस्मिन् ग्रन्थे द्रष्टुं शक्यते । अस्य ग्रन्थस्य अपरं नाम 'पदार्थधर्मसंग्रहः' इति केचन वदन्ति, परन्तु केचन 'पदार्थधर्मसंग्रहः' इति प्रशस्तपादस्य स्वतन्त्रः ग्रन्थः अस्ति इति स्वीकुर्वन्ति । अस्य ग्रन्थस्योपरि चतस्रः टीकाः समुपलभ्यन्ते । यथा दाक्षिणात्यस्य व्योमशिवाचार्यस्य 'किरणावली', बङ्गवास्तव्यस्य श्रीधराचार्यस्य 'न्यायकन्दली' तथा श्रीवत्सस्य (१०२५ ई.) 'लीलावती' च ।

एतासु टीकासु 'किरणावली' सर्वप्रसिद्धा टीका अस्ति । ईशवीयद्वादशशतके वल्लभाचार्यः मूलवैशेषिकसूत्राणाम् उपरि 'न्यायलीलावती' इति ग्रन्थं लिलेख । अस्य ग्रन्थस्योपरि मिथिलासु व्याख्यासु गङ्गेशोपाध्यायस्य पुत्रस्य वर्धमानस्य 'प्रकाशव्याख्या', शङ्करमिश्रस्य 'कंठाभरणव्याख्या', रघुनाथशिरोमणेः 'दीधितिव्याख्या' च प्रसिद्धाः सन्ति ।

ईशवीयपञ्चदशशतके वैशेषिकसूत्राणाम् उपरि रचिता शङ्करमिश्रस्य प्रौढटीका प्रसिद्धाऽस्ति । मिथिलायाः सुप्रसिद्धः विद्वान् भवनाथः, तस्य पुत्रः शङ्करमिश्रः कणादसूत्राणाम् उपरि 'उपस्कार' इति नाम्नीं टीकां रचयामास । तदतिरिच्य बङ्गदेशस्य जयनारायणभट्टाचार्येण 'विवृत्तिः' चन्द्रकान्तभट्टाचार्येण भाष्यं च रचितम् । बह्व्यः व्याख्याः, टीकाः, अनुवादग्रन्थाः, श्लोकाः अधुनाऽपि अनेकैः लिख्यन्ते । एवम् अनवरुद्धतया अस्य साहित्यं परिवर्धितं च अवलोक्यते ।

## स्वाध्यायः

### १. योग्यविकल्पं चित्वा उत्तरं लिखत ।

(१) प्रमाणैः अर्थपरीक्षणं किम् अस्ति ।

(क) सांख्यम्  (ख) प्रमाणम्  (ग) न्यायः  (घ) अर्थपरीक्षा

(२) न्यायशास्त्रम् अपरनाम्ना प्रसिद्धम् ।

(क) आन्वीक्षिकी  (ख) न्यायमात्रम्  (ग) त्रयी विद्या  (घ) किमपि न

(३) मनुस्मृतौ 'न्यायशास्त्रम्' केन नाम्ना प्रसिद्धम् ?

(क) हेतुशास्त्रम्  (ख) अनुमानशास्त्रम्  (ग) पदार्थसंग्रहः  (घ) तर्कशास्त्रम्

(४) विशेषशब्दः अस्ति ।

(क) ज्ञानार्थकः  (ख) व्यवच्छेदार्थकः  (ग) विशिष्टार्थकः  (घ) विशेष्यार्थकः

(५) भेदः केन पदार्थेन ज्ञायते ?

(क) जात्या  (ख) विशेषेण  (ग) कर्मणा  (घ) द्रव्येण

(६) वैशेषिकशब्दे कः प्रत्ययः ?

(क) ठण्  (ख) ठञ्  (ग) ठक्  (घ) क

(७) न्यायशास्त्रस्य प्रवर्तकः अस्ति ।

(क) कणादः  (ख) गौतमः  (ग) वररुचिः  (घ) पतञ्जलिः

### २. रिक्तस्थानं पूरयत ।

(१) प्रदीपः सर्वविद्यानाम् ______________ प्रकीर्तिता ।

(२) सम्यग्दर्शनसम्पन्नः ______________ प्रतिपद्यते ।

(३) ध्वान्तस्य वामोरु ______________ निरूपणाय ।

(४) धर्मविशेषप्रसूतात् ______________ निःश्रेयसाधिगमः ।

(५) प्रमाणप्रमेय ______________ निःश्रेयसाधिगमः ।

### ३. युग्मानि योजयत ।

| अ | ब |
|---|---|
| (१) वैशेषिकदर्शनम् | (१) आदिमं सूत्रम् । |
| (२) ध्वान्तस्य वामोरु... | (२) सुबन्धुः । |
| (३) धर्मविशेषप्रसूतात् | (३) औलूक्यदर्शनम् । |
| (४) वासवदत्ता | (४) दीधितिः |
| (५) रघुनाथशिरोमणिः | (५) नैषधचरितम् |
| | (६) निवृत्तिः |

**४. एकवाक्येन उत्तरं लिखत ।**

(१) समानः विचारः कयोः दर्शनयोः लभ्यते ?

(२) 'प्रमाणप्रमेयसंशय' इति कस्य दर्शनस्यादिमं सूत्रम् ?

(३) 'धर्मविशेषप्रसूतात्' इति कस्य दर्शनस्यादिमं सूत्रम् ?

(४) कणादः कस्य ऋषेः पुत्रः ?

(५) 'सर्वतन्त्रस्वतन्त्रः' इति नाम्ना कः प्रसिद्धः ?

**५. द्वित्रवाक्यैः उत्तरं लिखत ।**

(१) 'प्रदीपः सर्वविद्यानाम्' इति कारिकायाः तात्पर्यार्थं लिखत ।

(२) कर्मभिः कः न निबध्यते ?

(३) संसारं कः प्रतिपद्यते ?

**६. टिप्पणीं लिखत ।**

(१) साम्प्रतकाले न्यायदर्शनस्य उपयोगिता

(२) वैशेषिकदर्शनस्य महत्त्वम्

(३) न्यायपरम्परा

**७. सविस्तरम् उत्तरं लिखत ।**

(१) न्यायवैशेषिकयोर्मध्ये कः भेदः ?

(२) न्यायवैशेषिकदर्शनपरम्परायाः ग्रन्थानां नामानि लिखत ।

(३) न्यायदर्शनस्य महत्त्वं लिखत ।

# ३ न्यायवैशेषिकग्रन्थानां परिचयः

## प्रस्तावना

सामान्यदर्शनपरिचयानन्तरं दर्शनविशेषपरिचयः, तत्पश्चात् दार्शनिकग्रन्थानां ज्ञानं नितराम् आवश्यकम्, यतो हि ग्रन्थेषु एव महर्षिभिः सर्वे पदार्थाः सूक्ष्मेक्षिकया प्रपञ्चिताः सन्ति । अतः अस्मिन् पाठे वयं न्यायदर्शनस्य वैशेषिकदर्शनस्य च ग्रन्थानां परिचयं कुर्मः ।

## तर्कसंग्रहः

तर्काणां – पदार्थानां संग्रहः तर्कसंग्रहः । सप्तदशशतके श्रीमता अन्नंभट्टेन विदुषा तर्कसंग्रहः विरचितः । अयं तर्कसंग्रहः न न्यायस्य न केवलस्य वैशेषिकदर्शनस्य वा ग्रन्थः, किन्तु न्यायवैशेषिकद्वयस्यायं प्रकरणग्रन्थः, दर्शनद्वयस्य पदार्थानाम् अत्र समावेशः, न तत्र विरोधः ।

अन्नंभट्टः स्वयमेव तर्कसंग्रहस्योपरि स्वोपज्ञां दीपिकाख्यां टीकां लिखित्वा स्वकथनतात्पर्यं स्पष्टं कृतवान् ।

न्यायवैशेषिकयोः उभयोरपि तन्त्रयोः समन्वयदृष्ट्या एव सर्वपदार्थानां संख्या, प्रमाणानि, पाकजक्रिया इत्यादीन् विषयान् विविच्य उपपादयति । अत एव अन्ते कथितम् यत् –

**काणादन्यायमतयोः बालव्युत्पत्तिसिद्धये ।**
**अन्नंभट्टेन विदुषा रचितस्तर्कसंग्रहः ॥**

सर्वप्रथमं सप्तपदार्थानां विभाजनं प्रदर्श्य प्रत्येकस्य पदार्थस्य अवान्तरभेदं च उद्देशक्रमेण निरूप्य वैविध्यं च प्रदर्श्य परीक्षाक्रमेण स्वरूपं विमृशति । गुणनिरूपणावसरे तत्रापि च बुद्धिनिरूपणावसरे नैयायिकमतमनुसृत्य प्रमाणानि विभजते । तत्र च एकैकमपि प्रमाणं विविच्य विस्तरशः उपपादयति । प्रत्यक्षे च निर्विकल्पकसविकल्पकभेदं, तल्लक्षणं, षड्विधसन्निकर्षं च स्वार्थपरार्थभेदपुरस्सरं हेत्वाभासानपि सदृष्टान्तान् समन्वयेन सह निरूपयति । शब्दखण्डे च आकांक्षायोग्यतादिकं प्रतिपादयति । ततश्च अवशिष्टान् संस्कारपर्यन्तान् पदार्थान् निरूप्य ग्रन्थमिमं समाप्तिपथं नयति ।

परमलघुस्वरूपेऽस्मिन् ग्रन्थे ग्रन्थकारः न्यायवैशेषिकोक्तानि निखिलान्यपि तत्त्वानि संक्षेपेण निरूपयामास ।

## तर्कभाषा

**बालोऽपि यो न्यायनये प्रवेशम् अल्पेन वाञ्छत्यलसः श्रुतेन ।**
**संक्षिप्तयुक्त्यन्विततर्कभाषा प्रकाश्यते तस्य कृते मयैषा ॥**

तर्कभाषायाः प्रारम्भे ग्रन्थकारः श्रीकेशवमिश्रः उपर्युक्तश्लोकेन मङ्गलं विदधाति, स्वस्य च ग्रन्थस्य परिचयमपि ददाति यत्–यः अलसः बालः अल्पप्रयासेन न्यायशास्त्रे प्रवेशं वाञ्छति, तस्य कृते मया एषा तर्कभाषा लिख्यते । अस्मिन् ग्रन्थे न्यायशास्त्रस्य षोडशपदार्थानां क्रमशः विवेचनं कृतम् । यद्यपि तर्कभाषा प्राचीनन्यायशास्त्रस्यैव प्रकरणग्रन्थ इति निश्चितं, तथापि ग्रन्थकारेण न्यायशास्त्रस्य प्रमेयनामकपदार्थनिरूपणावसरे वैशेषिकदर्शनस्य सप्तपदार्थानां पृथिव्यादिनवद्रव्याणां चतुर्विंशतिगुणानाम् अपि विवेचनं कृतम् अस्ति ।

इत्थञ्च केशवमिश्रद्वारा आदौ ग्रन्थस्य अनुबन्धचतुष्टयं प्रतिपादितम् । ततश्च प्रमाणप्रमेयादिषोडशपदार्थान् निरूप्य अतिव्याप्त्यादिदोषत्रयस्य सम्यक् निरूपणं कृत्वा लौकिकालौकिकसन्निकर्षयोः स्पष्टता कृता ।

ततश्च अनुमानप्रक्रिया, द्विविधानुभवः, लिङ्गस्य त्रैविध्यम्, पञ्चहेत्वाभासानां च मतान्तरपुरस्सरं सोदाहरणं व्याख्या लिखिता ततः उपमानप्रक्रिया, उपमितिस्वरूपम्, अभावपृथक्त्वखण्डनं च कृत्वा स्वतः प्रामाण्यवादिमीमांसकानां मतं खण्डयति । ततश्च प्रमेयनिरूपणानन्तरम् आत्मनिरूपणेऽपि चार्वाकादीनां मतखण्डनं कृत्वा शरीरेन्द्रिययोः लक्षणञ्च निरूप्य बुद्ध्यादीनां निरूपणं विधाय हेत्वाभासान् निरूपयति । अन्ते च छलजातिनिग्रहस्थानानां निरूपणं कृत्वा परिसमापयति । 'तर्कभाषा' इति नाम्ना त्रिषु पुस्तकेषु सत्स्वपि अत्युत्तमा केशवमिश्रप्रणीता इयं तर्कभाषा एव । अस्य ग्रन्थस्योपरि तेषां शिष्यः गोवर्धनमिश्रः एव प्रकाशनाम्नीं टीकां व्यरचयत् । इत्थं च प्राचीनन्यायशास्त्रस्य प्रमुखद्वारविशेषरूपोऽयं ग्रन्थः अध्ययनेच्छया न्याये प्रवेष्टुम् अयं ग्रन्थः महोपकारं विदधाति ।

**तर्कसंग्रहदीपिका -**

अन्नंभट्टेन विरचितः तर्कसंग्रहः इति स्पष्टम्, किन्तु तस्योपरि विशेषप्रकाशाय अन्नंभट्टेन एव 'दीपिका' इति टीका लिखिता । तर्कसंग्रहे सिद्धान्तस्य केचन एव अंशाः संक्षेपरूपेण प्रतिपादिताः तथापि शिष्टाः विषयाः सुस्पष्टतया ग्रन्थकारेण दीपिकाख्यायाम् अस्यां टीकायां प्रतिपादिताः । तत्र सर्वप्रथमं ग्रन्थकारः विश्वेश्वरं साम्बमूर्तिं प्रणम्य टीकायाः प्रारम्भं करोति । सर्वेषां पदार्थानां तर्कसंग्रहानुगुणं न्यायशास्त्रोक्ततात्पर्यार्थं स्पष्टयति ।

तर्कसंग्रहाधारिताः चतुर्विंशति (२४) टीकाः उपलभ्यन्ते । किन्तु स्वोपज्ञत्वात् इयं दीपिका टीका वस्तुतः सर्वासु टीकासु अत्युत्तमा टीका वर्तते, या तर्कसंग्रहस्य हार्दं स्पष्टं करोति ।

**न्यायसिद्धान्तमुक्तावली-**

भाषापरिच्छेदाख्यकारिकावल्याः मुक्तावली इति वृत्तिः वर्तते । श्रूयमाणः ग्रन्थ एव न्यायसिद्धान्तमुक्तावली इति अष्टादशशतकस्य पूर्वार्धे बङ्गदेशीयः श्री विश्वनाथपञ्चाननभट्टाचार्यः न्यायसिद्धान्तमुक्तावलीवृत्तिं व्यरचयत् । तत्पूर्वं ज्ञातव्यं यत् कारिकावल्याम् अष्टषष्ठ्यधिकैकशतमिताः कारिकाः सन्ति ।

तत्र हि मङ्गलाचरणं, पदार्थविभागः, द्रव्यविभागः, गुणादीनां विभागः, द्रव्यनिरूपणम्, आत्मनिरूपणावसरे विभवः बुध्यादयः गुणाः, बुद्धेः अनुभूतिः, स्मृतिश्चेति द्वैविध्यम्, अनुभूतिश्च चतुर्विधा इत्यारभ्य प्रत्यक्षानुमानोपमाननिरूपणम् इति इमे प्रतिपाद्यविषयाः ।

न्यायसिद्धान्तमुक्तावली कारिकावल्याः वृत्तिरिति तत्रस्थया कारिकया एव अवगम्यते,

यथा-

**निजनिर्मितकारिकावलीम् अतिसंक्षिप्तचिरन्तनोक्तिभिः ।**
**विशदीकरवाणि कौतुकान्नु राजीवदयावशंवदः ॥**

एषा मुक्तावली कारिकाभागस्य विशदीकरणम् एव न, अपितु व्याख्यानमात्रम् । एषा मुक्तावली अष्टाभिमुक्ताभीराजते । यथा- पदार्थसामान्यनिरूपणं प्रथमा मुक्ता, साधर्म्यवैधर्म्यनिरूपणं द्वितीया मुक्ता, आत्मस्वरूपनिरूपणं तृतीया मुक्ता, प्रत्यक्षस्वरूपनाम्नी तुरीया मुक्ता, अनुमानस्वरूपनाम्नी पञ्चमी मुक्ता, उपमानस्वरूपनाम्नी षष्ठी मुक्ता, शब्दखण्डनाम्नी सप्तमी मुक्ता, गुणग्रन्थनाम्नी अष्टमी मुक्ता इति । सामान्यतः मुक्तावलीसहितकारिकावल्यां सन्ति त्रयो भागाः । उद्देशभागः, द्रव्यभागः, गुणभागश्च ।

तत्र आदौ उद्देशभागे पदार्थानां विभागकथनम्, साधर्म्यवैधर्म्यनिरूपणपूर्वकं पृथिव्यादीनां निरूपणम्, तत्रैव आत्मगुणप्रसङ्गतो बुद्धिभेदम् अवलम्ब्य प्रत्यक्षादिप्रमाणानां निरूपणम् । गुणग्रन्थे गुणसामान्यनिरूपणपूर्वकं प्रत्येकगुणविवेचनं च इति प्रतिपाद्याः विषयाः । यद्यपि तर्कसंग्रहः तद्वाख्या दीपिका च न्यायशास्त्रप्रवेशाय उपकुर्वते, तथापि एतद ग्रन्थाध्ययनमेव उदग्रन्थानाम् अध्ययने सौलभ्यं विदधाति ।

न्यायसिद्धान्तमुक्तावलीम् अनुसृत्य अनेकाः टीकाः रचिताः । तत्र च दिनकरी, किरणावली च प्रसिद्धे वर्तेते । अनेन स्पष्टं जायते यत् न्यायवैशेषिकसिद्धान्तानाम् अवबोधनार्थं न्यायसिद्धान्तमुक्तावल्याः ज्ञानम् आवश्यकम् ।

## स्वाध्यायः

### १. योग्यविकल्पं चित्वा उत्तरं लिखत ।

(१) तर्कसंग्रहस्य कर्ता ।

(क) केशवमिश्रः (ख) अन्नंभट्टः (ग) गोवर्धनः (घ) वाचस्पतिः

(२) तर्कपदस्य पर्यायः कः ?

(क) विचारः (ख) पदार्थः (ग) न्यायः (घ) वितर्कः

(३) तर्कसंग्रहस्य स्वोपज्ञा टीका अस्ति ।

(क) न्यायबोधिनी (ख) पदकृत्यम् (ग) दीपिका (घ) किरणावली

(४) पदार्थाः कति सन्ति ?

(क) अष्ट (ख) नव (ग) सप्त (घ) द्वौ

(५) बालव्युत्पत्तिसिद्धये रचितः ग्रन्थः अस्ति ।

(क) तर्कामृतम् (ख) तर्कसंग्रहः (ग) मुक्तावली (घ) किमपि न

(६) तर्कभाषायाः प्रणेता ।

(क) मिश्रः (ख) केशवमिश्रः (ग) मुक्तावली (घ) अन्नंभट्टः

(७) कः ग्रन्थः प्राचीनन्यायाधारितः ?

(क) तर्कभाषा (ख) मुक्तावली (ग) तर्कसंग्रहः (घ) किमपि न

### २. रिक्तस्थानं पूरयत ।

(१) कणादन्यायमतयोः ______________ तर्कसंग्रहः ।

(२) बालोऽपि ______________ मयैषा ।

(३) निजनिर्मितः ______________ वशंवदः ।

(४) न्यायसिद्धान्तमुक्तावली ______________ राजते ।

(५) तर्कसंग्रहस्य ______________ टीकाः उपलभ्यन्ते ।

### ३. युग्मानि योजयत ।

| अ | ब |
|---|---|
| (१) तर्कसंग्रहः | (१) केशवमिश्रः |
| (२) तर्कभाषा | (२) विश्वनाथः |
| (३) न्यायसिद्धान्तमुक्तावली | (३) अन्नंभट्टः |
| (४) भाषापरिच्छेदः | (४) दीपिका |
| (५) टीका | (५) कारिकावली |
| | (६) ग्रन्थः |

**४. एकवाक्येन उत्तरं लिखत ।**

(१) दर्शनद्वयस्य पदार्थानां कुत्र समावेशः ?

(२) कः प्रकरणग्रन्थः ?

(३) कस्मिन् शतके तर्कसंग्रहः विरचितः ?

(४) षोडशपदार्थानां क्रमशः विवेचनं कुत्र ?

(५) ग्रन्थकारः अनुबन्धचतुष्टयं केन माध्यमेन दर्शयति ?

**५. द्वित्रवाक्यैः उत्तरं लिखत ।**

(१) न्यायनये प्रवेशार्थं कीदृशः अधिकारी भवेत् ?

(२) काः काः अष्टमुक्ताः सन्ति ?

(३) तर्कभाषायाः प्रतिपाद्यविषयाः के ?

**६. टिप्पणीं लिखत ।**

(१) मुक्तावल्याः अष्टौ मुक्ताः ।

(२) मुक्तावलीरचनाकालः ।

(३) तर्कसंग्रहदीपिका ।

**७. सविस्तरम् उत्तरं लिखत ।**

(१) तर्कसंग्रहग्रन्थस्य परिचयं ददातु ।

(२) तर्कभाषायाः परिचयं लिखत ।

(३) न्यायसिद्धान्तमुक्तावलीग्रन्थस्य महत्त्वं लिखत ।

# ४ न्यायवैशेषिकग्रन्थकर्तॄणां परिचयः

### प्रस्तावना

न्यायवैशेषिकदर्शनयोः तयोश्च ग्रन्थानाञ्च परिचयः अस्माभिः कृतः । कारणं विना कार्यं न भवति । ग्रन्थाः यदि कार्यं तर्हि तस्य कार्यस्य कर्तारोऽपि भवेयुः । तस्मात् अस्मिन् पाठे ग्रन्थकर्तॄणां परिचयं वयं पठामः ।

### अन्नंभट्टः

अन्नंभट्टस्य जीवनविषये प्रमाणभूतं किमपि विवरणं न मिलति, तथापि महादेवराजारामबोडसे नामकेन पण्डितेन कृतस्य ग्रन्थस्य परिशीलनस्य आधारेण अन्नंभट्टेति अन्नंभट्टस्य संक्षिप्तं नाम, अथवा कर्णाटकस्य अण्णा भट्टेति पदस्य रूपान्तरं भवेत् । यतो हि न्यायकोशकारः इमम् अन्नंभट्टं 'कार्णाटं' मन्यते । भद्रवपुरीतः प्रकाशितस्य तर्कसंग्रहस्य पीठिकायां कृष्णनदीतटस्थस्य केशवपुरस्य निवासी आसीत् इति लिखितम् । किञ्च Dictionary of modern history of India इत्याकारके सुप्रसिद्धे ग्रन्थे अन्नंभट्टस्य जीवनचरितम् उपलभ्यते, किन्तु न तत्र कश्चन आधारः वर्तते । तत्प्रदर्शितवर्णनानुसारम् अन्नंभट्टः आन्ध्रप्रदेशीयः तैलङ्गः ब्राह्मण आसीत् । पिता तिरुमलनामकः अनन्ताचार्य इति प्रसिद्ध आसीत् । तत्रत्यस्य गरीकपादनामकस्य ग्रामस्य निवासी आसीत् । स्वकीयं पूर्णं जीवनं स्वीये एव ग्रामे यापयामास । ततश्च कदाचित् स्वीये पञ्चपञ्चाशत्तमे वयसि मल्लिकार्जुनस्य यात्राम् अकरोत् इत्यपि उपपादयति । उपर्युक्तस्य आधारेणैव कथयितुं शक्यते यत् अन्नंभट्टः सप्तदशशताब्द्यामेव स्यात् । यतो हि सिद्धान्तमुक्तावल्याः गादाधर्याश्च अध्यापनं कुर्वन्नासीत् इति हेतोः तयोः आनन्तरिक एव एष भवेत् ।

**'काशीगमनमात्रेण नान्नंभट्टायते द्विजः'** इति भणितिः अपि एतस्य काशीगमनमपि द्योतयति । न केवलं गमनमात्रम् अवगमयति, अपि तु स्वीयेन वैदुष्यप्रभावेन सुप्रसिद्धोऽपि आसीत् इति बोधयति ।

### ग्रन्थरचना–

तर्कसंग्रहं दीपिकां च अतिरिच्य नीचैः प्रदत्तं ग्रन्थचतुष्टयमपि अलिखत् ।

१. तत्त्वबोधिनी (टीकाग्रन्थः) ।

२. मिताक्षरी (पाणिनीयसूत्राधारितः टीकाग्रन्थः) ।

३. न्यायपरिशिष्टप्रकरणम् ।

४. सुबोधिनीसुधाकरः ।

५. तत्त्वचिन्तामण्यालोकसिद्धाञ्जनम् ।

६. ब्रह्मसूत्रवृत्तिः

सर्वेषु ग्रन्थेषु सत्स्वपि तर्कसंग्रहदीपिकयोः कारणेन अन्नंभट्टः विदुषां सभामध्ये सदैव स्मरणीयः भविष्यति ।

### केशवमिश्रः

प्राचीनन्यायानुसारी केशवमिश्रः तर्कभाषया विशेषतः प्रसिद्धः । तस्य कालादिविषये स्पष्टं निरूपणं नोपलभ्यते, किन्तु तर्कभाषायाः व्याख्यानकाले गोवर्धनमिश्रः तं परिचाययितुं प्रयत्नम् अकरोत् इति ज्ञायते । गोवर्धनमिश्रः केशवमिश्रं स्वगुरुं भावयति । सः तर्कभाषाप्रकाशनामकटीकायाः प्रारम्भे लिखति यत् –

**विजयतनूजन्मा गोवर्धन इति श्रुतः ।**

**तर्कानुभावं तनुते विविच्य गुरुनिर्मिताम् ॥**

अस्मिन् पद्ये गुरुनिर्मिताम् इति पदेन गुरुभावः स्पष्टः भवति । पुनश्च गोवर्धनमिश्रः स्वगुरुं परिचाययति यथा–

**श्रीविश्वनाथानुजपद्मनाभानुजो गरीयान् बलभद्रजन्मा ।**

**तनोति तर्कानधिगत्य सर्वान् श्रीपद्मनाभात् विदुषो विनोदम् ॥**

अस्मिन् पद्ये बलभद्रजन्मा इति पदेन केशवमिश्रस्य पिता बलभद्रनामक आसीत् इति ज्ञायते । तस्य च विश्वनाथः एवं पद्मनाभ इति नामभ्यां प्रसिद्धौ द्वौ अग्रजावास्ताम् । तस्य अग्रजस्य पद्मनाभस्य सकाशात् केशवमिश्रेण न्यायशास्त्रस्य अध्ययनं विधाय तर्कभाषा व्यलेखि इति स्फुटं भवति । केशवमिश्रस्य अग्रजः अयं पद्मनाभमिश्रः एकः प्रौढः अत्युत्तमः नैयायिक आसीत् । यतो हि अयं वैशेषिकदर्शनस्य प्रशस्तपादभाष्याधारिताम् उदयनाचार्यकृतां किरणावलीम् अधिकृत्य किरणवलीप्रकाशनाम्नीं व्याख्याम् अलिखत् । अयञ्च द्वादशशतकीयस्य वर्धमानोपाध्यायस्य अनन्तरकालीनः । अतः द्वादशशतकस्यान्तिमे भागे अथवा त्रयोदशशतकस्य आदिमे भागे पद्मनाभमिश्रः आसीद् इति निर्णेतुं शक्यम् । तस्मात् वक्तुं शक्यते यत् तत्समान एव समीपस्थ कालः तदनुजस्य । तस्मादेव अधिगतविद्यस्य केशवमिश्रस्यापि भवेद् । इत्थञ्च त्रयोदशशतकस्य प्रथमद्वितीयचरणयोर्मध्ये एव केशवमिश्र आसीत् इति निर्णयः उचितः प्रतिभाति ।

**विश्वनाथपञ्चाननभट्टाचार्यः**

श्रीविश्वनाथपञ्चाननभट्टाचार्यः बङ्गदेशीय आसीत् । तस्य पितुर्नाम श्रीविद्यानिवासभट्टाचार्य इत्यपि ज्ञायते । श्रीविश्वनाथपञ्चाननभट्टाचार्यकृता न्यायसिद्धान्तमुक्तावली न्यायशास्त्रे मुख्यं स्थानम् आवहति । विश्वनाथेन ग्रन्थेऽस्मिन् सरलतया, सूक्ष्मतया नव्यन्यायशास्त्रस्य सिद्धान्ताः संगृहीताः सन्ति । अनेन ग्रन्थकारेण १५५६ शालिवाहनशके, बङ्गदेशे एव ग्रन्थस्य रचना कृता ।

ग्रन्थकारस्तु स्वयमेव ग्रन्थस्य प्रयोजनं प्रतिपादयति । किञ्च विश्वनाथः स्वयमेव न्यायवैशेषिकदर्शनस्य सिद्धान्तान् संग्रहरूपेण कृत्वा राजीवनामकस्य शिष्यस्य ज्ञानाय मुक्तावलीं व्याख्याति । स्वशिष्यविषयकदयया वशंवदः सन् इमं ग्रन्थरत्नं लिखति इति ग्रन्थादौ स्वयमेव उद्घोषयति ।

**निजनिर्मितकारिकावलीम् अतिसंक्षिप्तचिरन्तनोक्तिभिः ।**

**विशदीकरवाणि कौतुकान्नु राजीवदयावशंवदः ॥**

## स्वाध्यायः

**१. योग्यविकल्पं चित्वा उत्तरं लिखत ।**

(१) अन्नंभट्टः कुत्रत्य आसीत् ?

(क) पाश्चात्यः (ख) उत्तरीयः (ग) दाक्षिणात्यः (घ) पौर्वस्त्यः

(२) अन्नंभट्टः कीदृशः ब्राह्मण आसीत् ।

(क) कान्यकुब्जः (ख) तैलङ्गः (ग) कौशिकः (घ) भाट्टः

(३) अन्नंभट्टं 'कार्णाटं' मन्यते ।

(क) भाष्यकारः (ख) न्यायकोशकारः (ग) दीधितिकारः (घ) पतञ्जलिः

(४) अन्नंभट्टस्य समयः आसीत् ।

(क) सप्तदशशताब्दी (ख) चतुर्थशतकम् (ग) चतुर्दशशताब्दी (घ) किमपि न

(५) काशीगमनमात्रेण .................... ॥ इति भणितिः केन सह सम्बद्धः ?

(क) केशवमिश्रेण (ख) अन्नंभट्टेन (ग) गदाधरेण (घ) तिरुमल्लेन

(६) तर्कभाषया प्रसिद्धः ।

(क) विश्वनाथः (ख) रघुनाथः (ग) केशवमिश्रः (घ) अन्नंभट्टः

(७) केशवमिश्रस्य शिष्य आसीत् ।

(क) गोवर्धनः (ख) बलभद्रः (ग) विश्वनाथः (घ) अन्नंभट्टः

## २. रिक्तस्थानं पूरयत ।

(१) विजयतनूजन्मा ______________ ।

(२) श्रीविश्वनाथानुजः ______________ ।

(३) श्रीविश्वनाथस्य पितुः नाम ______________ आसीत् ।

(४) श्रीकेशवमिश्रस्य पिता ______________ आसीत् ।

(५) श्रीविश्वनाथस्य शिष्यः ______________ आसीत् ।

## ३. युग्मानि योजयत ।

| अ | ब |
|---|---|
| (१) लघुप्रकरणग्रन्थः | (१) केशवमिश्रः |
| (२) प्रकरणग्रन्थः | (२) कारिकावलीवृत्तिः |
| (३) मुक्तावली | (३) तर्कसंग्रहः |
| (४) अनन्ताचार्यः | (४) तर्कभाषा |
| (५) बलभद्रजन्मा | (५) अन्नंभट्टस्य पिता |
| | (६) चिन्नंभट्टः |

## ४. एकवाक्येन उत्तरं लिखत ।

(१) मुक्तावली केन कदा लिखिता ?

(२) अन्नंभट्टस्य काः काः कृतयः ?

(३) केशवमिश्रस्य भ्रातरौ कौ ?

(४) अन्नंभट्टस्य विश्वप्रसिद्धः कः ग्रन्थः ?

(५) दीपिकायाः रचनाकारः कः ?

## ५. द्वित्रवाक्यैः उत्तरं लिखत ।

(१) मुक्तावल्याधारेण विश्वनाथं परिचाययत ।

(२) तर्कसंग्रहस्य कर्तुः कालनिर्णयं लिखन्तु ।

(३) प्रमाणपुरस्सरं केशवमिश्रस्य जन्मकालादिनिर्णयम् उपपादयत ।

## ६. सविस्तरम् उत्तरं लिखत ।

(१) अन्नंभट्टस्य कृतीनां नामानि लिखत ।

(२) अन्नंभट्टस्य जीवनवृत्तं Dictionary... इत्याधारेण लिखत ।

(३) पद्मनाभकालानुमानेन केशवमिश्रस्य कालः कः ?

## ७. टिप्पणीं लिखत ।

(१) गोवर्धनमिश्रस्य गुरुभावना ।

(२) नान्नं-भट्टायते द्विजः ।

(३) विश्वनाथस्य वैदुष्यम् ।

# ५ तर्कसंग्रहे पदार्थविवेचनम्

## प्रस्तावना

तर्कसंग्रहकारैः पदार्थः सप्तधा विभाजितः । जगदीशतर्कालङ्कारा: 'सामान्यतया पदार्थो द्विविधः भावोऽभावश्च । भावः षड्विधः । द्रव्यगुणकर्मसामान्यविशेषसमवायभेदात् । अभावो द्विविधः । संसर्गाभावोऽन्योन्याभावश्च । आद्यः त्रिविधः प्रागभावः, प्रध्वंसाभावः अत्यन्ताभावश्च' इति पदार्थनिरूपणं कुर्वते ।

### १. पदार्थशब्दार्थविचारः

पदस्य अर्थः पदार्थ इति व्युत्पत्त्या अभिधेयत्वं पदार्थसामान्यलक्षणमिति लभ्यते । गत्यर्थके, ज्ञानार्थके वा **ऋ** धातोः **थ** प्रत्ययेन **अर्थ**शब्दस्य व्युत्पत्तिः । ऋच्छन्ति इन्द्रियाणि यं स अर्थः, इन्द्रियानुभवयोग्यः, ज्ञेयः, अभिधेयो वा । तस्मात् पदार्थ इत्यनेन पदसम्बन्ध्यभिधाविषत्वस्य लाभेऽपि पदसम्बन्धित्वांशस्य अव्यावर्तकत्वात् अभिधेयत्वमात्रं पदार्थलक्षणम् । एवञ्च वाच्यत्वम्, अभिधेयत्वम्, ज्ञेयत्वम्, ज्ञानविषयत्वम्, प्रमितिविषयत्वं वा पदार्थलक्षणम् । **प्रमितिविषयाः पदार्था,** इति सप्तपदार्थ्याम् । यस्य कस्यापि पुरुषस्य ईश्वरस्य वा यः ज्ञानविषयो भवितुमर्हति सः पदार्थ इत्युच्यते ।

वैशेषिकनये षट् भावपदार्था, एकश्च अभावपदार्थ इति सप्तपदार्थाः स्वीकृताः । तथा चोक्तं तर्कसंग्रहे – **द्रव्यगुणकर्म-सामान्यविशेषसमवायाभावाः सप्तपदार्था** इति । नव्यन्यायमते एते एव सप्तपदार्थाः अङ्गीकृताः । प्राचीनन्याये तु षोडशपदार्थाः स्वीकृताः । तथा चोक्तं न्यायदर्शने गौतममुनिना – **प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्त-अवयव-तर्क-निर्णय-वाद-जल्प-वितण्डा-हेत्वाभास-छल-जाति-निग्रहस्थानानां तत्त्वज्ञानात् निश्रेयसाधिगमः** । एते षोडशपदार्थाः वैशेषिकैः स्वीकृतेषु सप्तपदार्थेष्वेव अन्तर्भवन्तीति नवीनानाम् अभिप्रायः ।

विशेषधर्मप्रकारकजिज्ञासां प्रति सामान्यधर्मज्ञानस्य हेतुत्वेन सामान्यलक्षणकथनानन्तरमेव विशेषविभागो युक्त इति अभिप्रेत्य 'पदार्थ' शब्दस्य व्युत्पत्तिद्वारा सामान्यलक्षणमाविष्करोति-पदस्यार्थ इति ।

### २. सप्तपदार्थानां परिचयः ।

**मूलम् - सर्वेषां पदार्थानां यथायथम् उक्तेष्वन्तर्भावात् सप्तैवपदार्था इति सिद्धम् ।**

सर्वेषाम् – न्यायदर्शनस्यादिमे सूत्रे प्रोक्तानां प्रमाणप्रमेयादीनाम् इत्यर्थः । तेषां षोडशपदार्थानाम् उक्तेषु पदार्थेषु यथायोग्यं समावेशः भवति, तस्मात् सिद्धं सप्त एव पदार्था इति । पदार्थज्ञानस्य परमप्रयोजनं मोक्ष इत्यामनन्ति । स च मोक्षः आत्यन्तिकैकविंशतिदुःखध्वंसस्वरूपः ।

**मूलम् - द्रव्यम् - तत्र द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नवैव ।**

द्रव्यत्वजातिमत्त्वम्, गुणवत्त्वम्, समवायिकारणत्वम्, वा द्रव्यसामान्यलक्षणम् । पृथिवी च आपश्च तेजश्च वायुश्च आकाशञ्च कालश्च दिक् च आत्मा च मनश्चेति द्रव्यमिति । जात्येकवचनम् । तेन – 'द्रव्यत्वं पृथिवीत्वादिनवोपाद्यन्यतमव्याप्यम् इति लभ्यते ।

**मूलम् - गुणः - रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्व-स्नेहशब्दबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्काराश्चतुर्विंशतिगुणाः ।**

द्रव्यकर्मभिन्नत्वे सति सामान्यवान् गुणः । गुणत्वजातिमान्वा ।

**मूलम् - कर्म - उत्क्षेपणापक्षेपणाकुञ्चनप्रसारणगमनानि पञ्चैव कर्माणि ।**

कर्म इति लक्ष्यम् । शेषं लक्षणम् । विभिन्ने परमाणुद्वयेऽदृष्टवशात् क्रिया जायते, तया द्व्यणुकस्य द्रव्यस्य कारणीभूतः परमाणुद्वयसंयोगो भवति, तस्याऽसमवायिकारणं सा क्रियैवेति भावः । संयोगभिन्नत्वे सति संयोगासमवायिकारणं कर्म । कर्मत्वजातिमद्वा । भ्रमणादीनामपि गमनेऽन्तर्भावात् । न पञ्चविधत्वविरोधः ।

**मूलम् - सामान्यम् - परमपरं चेति द्विविधं सामान्यम् ।**

नित्यमेकम् अनेकानुगतं सामान्यम् । द्रव्य-गुण-कर्मवृत्ति । परं सत्ता, अपरं द्रव्यत्वादि । तदेव सामान्यं यद् नित्यम् अनेकपदार्थेषु समवायसम्बन्धेन वर्तमानं च । तस्य च लक्षणमिदम् । नित्यत्वे सति अनेकसमवेतत्त्वम् । नित्यत्वविशेषणानुपादाने ऽनेकसमवेतत्वस्य संयोगादौ सत्वात् अतिव्याप्तिः । तद्वारणाय अनेकसमवेतत्त्वम् । सामान्यं जातिः द्रव्यगुणकर्मसु वर्तते ।

**मूलम् - विशेषः - नित्यद्रव्यवृत्तयो विशेषास्त्वनन्ता एव ।**

विशेषः स्वतन्त्रः पदार्थ इति वैशेषिका मन्वते । विशेषपदार्थस्वीकारेणैव कणादप्रवर्तितदर्शनं वैशेषिकसंज्ञाभिधेयं भवतीति प्रसिद्धम् । विशेषा नाम नित्यद्रव्याणां परस्परव्यावर्तका परस्परभेदसाधकाः वा । तदुक्तम् अन्नंभट्टपादैः - **नित्यद्रव्यवृत्तयो व्यावर्तका विशेषा इति** पार्थिव-जलीय-तैजस-वायवीय-परमाणवः, आकाश-काल-दिक्-आत्म-मनांसि च नित्यद्रव्याणि तेषु प्रत्येकं पृथक् पृथक् वर्तमानाः, तेषां परस्परभेदसाधकाश्च विशेषा इत्यर्थः ।

''**अन्त्यो नित्यद्रव्यवृत्तिर्विशेषः परिकीर्तितः**'' इति विशेषलक्षणं कृतं विश्वनाथपादैः । अन्ते अवसाने महाप्रलयेऽपि वर्तन्त इति अन्त्या इति व्युत्पत्या अन्त्यत्त्वम् - नित्यवत्त्वम् उत्पत्तिरहितत्वे सति विनाशरहितत्त्वम् । तथा च नित्यत्त्वे सति नित्यद्रव्यवृत्तित्वं विशेषत्त्वम् इति विशेषलक्षणं पर्यवसितम् ।

विशेषस्य स्वतो व्यावर्तकत्वात् तत्र जातिर्न स्वीक्रियते । जातिर्नाम व्यक्तिभेदानुमापिका व्यावर्तिका वा । अतः विशेषत्वजातिस्वीकारे तयैव जात्या विशेषाणां भेदानुमापकत्वं व्यावर्तनं वा वाच्यम् । विशेषत्वजात्या विशेषाणां भेदानुमापकत्वे च विशेषाणां स्वव्यावर्तकत्वभङ्गस्स्यात् । अतः स्वतो व्यावर्तकत्वरूपस्वरूपहानिप्रसङ्गात् विशेषत्वजातिर्न स्वीक्रियते ।

एवञ्च वैशेषिकैः प्रस्तुतो नैयायिकैश्च अनुमतः अयं विशेषपदार्थः वेदान्तिमीमांसकादिभिश्च न स्वीक्रियते । विशेषपदार्थस्वीकारेण न्यायवैशेषिकाणां किं प्रयोजनम् ? इति जिज्ञासायां सजातीयवस्तूनां परस्परभेदस्य अन्यथानुपपत्या तेषां व्यावर्तकरूपो विशेषः स्वीक्रियत इति समादधति । तथा हि घटपटादीनाम् अनित्यवस्तूनां परस्परं भेदः तत्तद्धर्मैः एव उपपद्यते । एवञ्च सजातीयानाम् अनित्यवस्तूनां च सावयवत्त्वात् अवयवभेदेनैव तत्तद्भेदाः ज्ञायन्ते । यथा एकस्य घटस्य कपालद्वयं घटान्तरस्य कपालद्वयात् भिद्यते, इति कपालभेदेन घटभेद उपपद्यते । एवं रूपेण द्रव्यस्यापि अवयवरूपरमाणुद्वयभेदात् द्व्यणुकान्तरेभ्यो भेदः । सा च पृथिवी परमाण्वन्तरादपि भिद्यते । तत्र भेदक अर्थात् भेदानुमापकः विशेष एव ।

**मूलम् - २.६ समवायः - समवायस्त्वेक एव ।**

समवायो नाम कश्चित् पदार्थो विद्यते इति सांख्यैः, पातञ्जलैः, रामानुजीयैः, अद्वैतवेदान्तिभिश्च नाङ्गीक्रियते । न्यायवैशेषिकनये तु समवायनामको द्रव्यगुणकर्मसामान्यविशेषे विलक्षणः कश्चित् भावपदार्थः स्वीक्रियते । अयं च पदार्थः सम्बन्धरूपः अतः एव उभयवृत्तिश्च । स च उत्पत्तिविनाशरहितो नित्यो वा । समवायस्य लक्षणं नित्यसम्बन्धत्वम् । तथा चोक्तं तर्कसंग्रहे **नित्यसम्बन्धः समवाय** इति । नित्यत्वे सति सम्बन्धत्त्वं समवायत्वम् इत्यर्थः ।

अयं च समवायः अयुतसिद्धवृत्तिः । अयुतसिद्धानां पदार्थानां मध्ये एव समवायो वर्तते । उक्तं च तर्कसंग्रहे – ययोः द्वयोर्मध्ये एकम् अविनश्यदवस्थं अपराश्रितम् एवावतिष्ठते तौ अयुतसिद्धौ इति । यथा तन्तुपटौ । तन्तुपटयोर्मध्ये पटः तन्त्वाश्रितः सन् एव अवतिष्ठते । अतः तौ अयुतसिद्धौ । तत्र अनुयोगिरूपः तन्तुः आधारः, प्रतियोगिरूपः पटश्च आधेयः । एवम् अवयवावयविनौ, गुणगुणिनौ, जातिजातिमन्तौ विशेषनित्यद्रव्ये च अयुतसिद्धौ । तयोः द्वयोः सम्बन्धस्समवाय इति ।

**नित्यसम्बन्धः समवायः । अयुतसिद्धवृत्तिः । ययोर्द्वयोर्मध्ये एकम् अविनश्यदवस्थमपराश्रितमेवावतिष्ठते तावयुतसिद्धौ । यथा अवयवावयविनौ, गुणगुणिनौ क्रियाक्रियावन्तौ जातिव्यक्ती विशेषनित्यद्रव्ये चेति ।**

अयुतसिद्धत्वं च इत्थम् – पदार्थद्वयमध्ये एकः पदार्थः यावद् न नश्येत् तावद् परस्परम् एकः अपरेण विना स्थातुं न शक्नुयात् । तौ द्वौ अयुतसिद्धौ । द्वयोः पदार्थयोः मध्ये एकः पदार्थः अपरेण विना स्थातुं न शक्नोति अपरश्च एकेन विना स्थातुं न शक्नोति ।

**मूलम् – अभावः – अभावश्चतुर्विधः । प्रागभावः प्रध्वंसाभावोऽत्यन्ताभावोऽन्योन्याभावश्चेति ।**

अभावो नाम अस्मत्कृते प्रतीयमानेभ्यः द्रव्यादिषट्पदार्थेभ्यो भावेभ्यो भिन्नः कश्चन पदार्थ इति नैयायिकाः । स तु न स्वतन्त्रः पदार्थः । अपि तु भावपरतन्त्रो भावज्ञानपरतन्त्रो वा । भावपदार्थानां स्वरूपेणैव अभावस्य स्वरूपं नियमितं भवति । न तु स्वत इति भावः । यतः घटाभावः, पटाभावः, इत्येव अभावस्य प्रतीतिविषयत्वम् अस्ति ।

**अभावभेदनिरूपणम्**

अभावः षड्विधः इति केचन प्राचीनाः । कणादगौतमयोर्मते अभावः चतुर्विधः । अभावः प्राधान्येन द्विविधः, संसर्गाभाव अन्योन्याभावश्चेति । तत्र संसर्गाभावः पुनः त्रिविधः – प्रागभावः, प्रध्वंसाभावः, अत्यन्ताभावश्चेति । एवञ्च अभावः समुदितस्वरूपेण तु चतुर्विध एव । तत्र प्रागभावप्रध्वंसाभावौ अनित्यौ, अन्योन्याभावात्यन्ताभावौ च नित्यौ इति प्रायशः सर्वेषाम् आशयः ।

**(१) प्रागभावः**– वस्तुन उत्पत्तेः प्राक् समवायिकारणे प्रतीयमानो योऽभावः स प्रागभावः । अनादित्वे सति सान्तत्वं प्रागभावत्त्वम् । यस्य आदिर्नास्ति अन्तस्तु अस्ति स प्रागभाव इत्यर्थः । भविष्यतीति प्रतीतिविषय एव प्रागभावः । यथा घटोत्पत्तेः प्राग् निखिलकारणसत्त्वदशायां **घटो भविष्यतीति** प्रतीतिः ।

**(२) प्रध्वंसाभावः**– कस्यापि पदार्थस्य उत्पत्त्यनन्तरं समवायिकारणे तस्य योऽभावः अनुभूयते स प्रध्वंसाभावः । यथा – कपालसंयोगात् घटोत्पत्तिर्भवति । घटोत्पत्यनन्तरं च मुद्गराभिघातादिवशात् घटसमवायिकारणरूपे कपाले यो घटाभावोऽनुभूयते स प्रध्वंसाभावः । स च अभावः, सादिः अनन्तश्च । घटावयवेषु ध्वस्तेषु एव घटस्य ध्वंसाभावः अनुभूयते, न तु ततः प्राग् नाम घटसत्त्वदशायाम् । अतः ध्वंसाभावस्य सादित्वं स्वीकरणीयम् । सर्वथा ध्वंसाभावः ध्वस्त इति प्रतीतिगोचरः, यथा घटो ध्वस्तः, पटो ध्वस्त इत्यादि ।

**(३) अत्यन्ताभावः**– नित्यसंसर्गाभावत्त्वम् अत्यन्ताभावत्त्वम् । यस्य संसर्गाभावस्य उत्पत्तिर्नास्ति विनाशोऽपि नास्ति स अत्यन्ताभावः । अत्यन्तश्चासौ अभावश्चेति अत्यन्ताभावः, यस्य अभावस्य अभावः कदापि न वर्तते स अत्यन्ताभावः । यथा गगने वायौ वा रूपाभावस्य त्रैकालिकत्वात् सोऽत्यन्ताभावत्त्वम् । अत्यन्ताभावस्य नास्तीत्येव प्रतीतिविषयत्त्वम् यथा **घटो नास्ति, पटो नास्ति** इत्यादिरूपम् ।

**(४) अन्योन्याभावः**– ययोः द्वयोः पदार्थयोर्मध्ये उभयम् अपि परस्परानुयोगिकं परस्परप्रतियोगिकं च भवति तयोरन्योन्याभावः । यथा **घटः पटो न** इति प्रतीतौ योऽभावः सः घटानुयोगिकः पटप्रतियोगिकश्च **पटो घटो न** इति प्रतीतौ अभावः पटानुयोगिकः घटप्रतियोगिकश्च । एवं घटपटयोरुभयोरपि परस्परप्रतियोगित्वाऽनुयोगित्वसम्भवात् अयम् अभावः अन्योन्याभावः, भेदः, भिन्नत्वमिति व्यवह्रियते ।

## स्वाध्याय:

### १. योग्यविकल्पं चित्वा उत्तरं लिखत ।

(१) पदार्थ: .......... विभाजित: ।

(क) नवधा (ख) सप्तधा (ग) चतुर्धा (घ) अष्टधा

(२) प्रमितिविषया: के ?

(क) पदार्था: (ख) द्रव्याणि (ग) अभावा: (घ) विशेषा:

(३) अभाव: कतिविध: ?

(क) पञ्चविध: (ख) चतुर्विध: (ग) त्रिविध: (घ) सप्तविध:

(४) प्रागभाव: क: ?

(क) अनादि: सान्त: (ख) सादिरनन्त: (ग) त्रैकालिक: (घ) अनन्त:

(५) नित्यसम्बन्ध: क: ?

(क) समवाय: (ख) अभाव: (ग) विशेष: (घ) गुण:

### २. रिक्तस्थानं पूरयत ।

(१) नित्यम् ______________ अनेकानुगतं सामान्यम् ।

(२) नित्यद्रव्य ______________ व्यावर्तका: विशेषा: ।

(३) अनादि: सान्त: ______________ ।

(४) रूपरसगन्ध ______________ गुणा: ।

(५) ययोर्द्वयोर्मध्ये ______________ अयुतसिद्धौ ।

### ३. युग्मानि योजयत ।

| अ | ब |
|---|---|
| (१) अनादि: सान्त: | (१) समवाय: |
| (२) नित्यसम्बन्ध: | (२) पञ्च |
| (३) कर्म | (३) अनन्ता: |
| (४) विशेषा: | (४) अत्यन्ताभाव: |
| (५) घट: न पट: | (५) अन्योन्याभाव: |
| | (६) प्रागभाव: । |

**४. एकवाक्येन उत्तरं लिखत ।**

(१) 'घटो भविष्यतीति' कस्य अभावस्य प्रतीतिः ?

(२) अनेकपदार्थेषु समवायसम्बन्धेन किमस्ति ?

(३) व्यावर्तका इति कस्य विशेषणम् ?

(४) पदार्थज्ञानस्य परमप्रयोजनं किमस्ति ?

(५) कार्यस्योत्पत्तेः पूर्वं किं भवति ?

**५. द्वित्रवाक्यैः उत्तरं लिखत ।**

(१) प्रध्वंसस्य का प्रतीतिः ?

(२) मोक्षस्य स्वरूपं किम् ?

(३) सामान्यं कुत्र वर्तते ?

**६. टिप्पणीं लिखत ।**

(१) अयुतसिद्धौ ।

(२) आत्मज्ञाने पदार्थज्ञानं साधनम् ।

(३) समवायः ।

**७. सविस्तरम् उत्तरं लिखत ।**

(१) अभावस्य चातुर्विध्यं प्रतिपादयत ।

(२) सपदकृत्यं सामान्यस्य लक्षणं ब्रूत ।

(३) विशेषस्य लक्षणं लिखत ।

# ६ तर्कसंग्रहे प्रत्यक्षप्रमाणम्

## प्रस्तावना

'मानाधीना मेयसिद्धिः' अर्थात् प्रमाणमन्तरा प्रमेयस्य सिद्धिर्नैव सम्भवतीत्यतः न्यायसूत्रकारैः अक्षपादैः आदौ प्रमाणपदार्थस्य उल्लेखः कृतः । तच्च प्रमाणं प्रमाकरणमेव । न्यायसिद्धन्ते प्रत्यक्षानुमानोपमानशब्दभेदेन चत्वारि प्रमाणानि सन्ति । अत्र प्राथम्येन प्रत्यक्षप्रमाणं निरूपयति ग्रन्थकारः । अतः अस्मिन् पाठे वयं प्रत्यक्षप्रमाणं पठामः ।

### १. मङ्गलपद्यम् ।

**मूलम् - निधाय हृदि विश्वेशं विधाय गुरुवन्दनम् ।**
**बालानां सुखबोधाय क्रियते तर्कसंग्रहः ॥**

चिकीर्षितस्य ग्रन्थस्य निर्विघ्नपरिसमाप्त्यर्थम् इष्टदेवतानमस्कारात्मकं मङ्गलं शिष्यशिक्षार्थं ग्रन्थादौ निबध्नाति निधायेति । हृदि विश्वेशं निधाय गुरुवन्दनं च विधाय बालानां सुखबोधाय तर्कसंग्रहः क्रियत इति अन्वयः ।

तर्काणां पदार्थानां संग्रहः तर्कसंग्रहः । बालानामित्यत्र बालाः के ? अधीतव्याकरणादिशास्त्राः अनधीतन्यायशास्त्राः बालाः ।

### २. उद्देशलक्षणपरीक्षाभागः

**मूलम् - त्रिविधा चास्य शास्त्रस्य प्रवृत्तिरुद्देशो लक्षणं परीक्षा चेति ।**

उद्देशस्तु नाममात्रेण वस्तुसङ्कीर्तनम् । तच्चास्मिन्नेव सूत्रे कृतम् । लक्षणन्त्वसाधारणधर्मवचनम् । यथा गोः सास्नादिमत्त्वम् । लक्षितस्य लक्षणमुपपद्यते न वेति विचारः परीक्षा । तेनेते लक्षणपरीक्षे प्रमाणादीनां तत्त्वज्ञानार्थं कर्तव्ये ।

अनुद्दिष्टेषु पदार्थेषु न तेषां लक्षणानि प्रवर्तन्ते निर्विषयत्वात् । अलक्षितेषु च तत्त्वप्रतीत्यभावः कारणाभावात् । अतः पदार्थव्युत्पादनाय प्रवृत्तस्य शास्त्रस्योभयथा प्रवृत्तिः । उद्देशो लक्षणं च । परीक्षायास्तु न नियमः । नामधेयेन पदार्थनामभिधानमुद्देशः । उद्दिष्टस्य स्वपरजातीयव्यावर्तको धर्मो लक्षणम् । लक्षितस्य यथालक्षणं विचारः परीक्षा ।

### ३. नवद्रव्याणां लक्षणविवेचनम्

**मूलम् - तत्र द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नवैव । पृथिवी - तत्र गन्धवती पृथिवी । सा द्विविधा - नित्याऽनित्या च । नित्या - परमाणुरूपा, अनित्या - कार्यरूपा । पुनस्त्रिविधा - शरीरेन्द्रियविषयभेदात् । शरीरमस्मदादीनाम् । इन्द्रियं गन्धग्राहकं घ्राणं नासाग्रवर्ति । विषयो मृत्पाषाणादिः ।**

गन्धवत्वं पृथिव्या लक्षणम् । लक्ष्या पृथिवी । पृथिवीत्वं लक्ष्यतावच्छेदकम् । पृथिवीत्वावच्छिन्ना लक्ष्यता । गन्धसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्वं पृथिव्या लक्षणम् ।

गन्धत्वम् एव पृथिव्याः असाधारणः धर्मः । स एव धर्मः तस्य लक्षणम् । लक्षणं नाम दूषणत्रयरहितः धर्मः । त्रीणि दूषणानि

अतिव्याप्तिः अव्याप्तिः असम्भवश्चेत्येतानि । यस्य यत् लक्षणं सः तस्यैवासाधारणः धर्मः । इतरसाधारणश्चेत् अतिव्याप्तिः, गोः श्रृङ्गित्वं लक्षणं महिषादौ अतिव्याप्तम् । स्वस्मिन्नेवैकदेशे अवर्तमानं चेत् अव्याप्तं लक्षणम् । यथा गोः कपिलत्वं लक्षणं चेत् गोत्ववति श्वेतगवि कपिलत्वाभावात् अव्याप्तम् । लक्ष्ये कुत्राप्यवर्तनं चेत् लक्षणस्य तत्रासंभवाख्यं दूषणम् । यथा गोः एकशफ़वत्वाख्यं दूषणम् । कुत्रापि लक्ष्ये एव तादृशत्वस्यादर्शनात् असम्भवः । तर्हि दूषणत्रयरहितं लक्षणं गोः कीदृशं स्यात्, तत्तु सास्नादिमत्त्वम् एव, एतदेवदूषणत्रयरहितम् । स एव च असाधारणः धर्मः गजतुरगाद्यपेक्षया गां व्यावर्तयति । व्यावृत्तिः नाम इतरभेदः । लक्षणस्य मुख्यं प्रयोजनम् एव व्यावृत्तिः । तदुक्तं '**व्यावृत्तिर्व्यवहारो वा लक्षणस्य प्रयोजनम्**' ।

**मूलम् – आपः – शीतस्पर्शवत्य आपः । ता द्विविधाः – नित्याः परमाणुरूपाः । अनित्याः कार्यरूपाः । पुनस्त्रिविधाः शरीरेन्द्रियविषयभेदात् । शरीरं वरुणलोके । इन्द्रियं रसग्राहकं रसनं जिह्वाग्रवर्ति । विषयः सरित्समुद्रादिः ।**

तेजादावतिव्याप्तिवारणाय शीतेति । आपः इति लक्ष्यम् । शीतस्पर्शवत्त्वं लक्षणम् । कालिकेन कालेऽतिव्याप्तिवारणाय शीतस्पर्शवत्त्वं समवायेन बोध्यम् । अपां स्वाभविकः अथवा नैसर्गिकः स्पर्शः शीत एव । औष्ण्यं तु अग्निसंस्पर्शादेव ।

**मूलम् – तेजः – उष्णस्पर्शवत्तेजः । तच्च द्विविधम् – नित्यम् अनित्यं च । नित्यं परमाणुरूपम् । अनित्यं कार्यरूपम् । पुनस्त्रिविधं शरीरेन्द्रियविषयभेदात् । शरीरमादित्यलोके प्रसिद्धम् । इन्द्रियं रूपग्राहकं चक्षुः कृष्णताराग्रवर्ति । विषयश्चतुर्विधः भौमदिव्यौदर्याकरजभेदात् । भौमं वह्न्यादिकम् । अबिन्धनं दिव्यं विद्युदादि । भुक्तस्य परिणामहेतुरौदर्यम् । आकरजं सुवर्णादि ।**

उष्णस्पर्शवत्त्वं तेजसो लक्षणम् । तेजसो लक्षणमाह उष्णस्पर्शवदिति । 'उष्णं जलम्' इति प्रतीतेस्तेजः प्रतीतिस्तु तेजः सम्बन्धानुविधायिनी, तेजः सम्बन्धः संयोगो जले ।

**मूलम् – वायुः – रूपरहितः स्पर्शवान् वायुः । स द्विविधः नित्योऽनित्यश्च । नित्यः परमाणुरूपः । अनित्यः कार्यरूपः । पुनस्त्रिविधः शरीरेन्द्रियविषयभेदात् । शरीरं वायुलोके । इन्द्रियं स्पर्शग्राहकं त्वक् सर्वशरीरवर्ति । विषयो वृक्षादिकम्पनहेतुः । शरीरान्तःसंचारी वायुः प्राणः । स चैकोऽप्युपाधिभेदात्प्राणाऽपानादिसंज्ञां लभते ।**

रूपरहितत्त्वविशिष्टस्पर्शवत्त्वं वायोर्लक्षणम् अर्थात् रूपरहितत्त्वे सति स्पर्शवत्वं वायोः लक्षणम् । रूपरहितेति । रूपरहितत्वं लक्षणमित्युक्ते आकाशादौ अतिव्याप्तिः । स्पर्शवत्वमात्रोक्तौ घटादौ अतिव्याप्ति इत्यतः विशेषणविशेष्यात्मकदलद्वयनिवेशः ।

**मूलम् – आकाशम् – शब्दगुणकम् आकाशम् । तच्चैकं विभु नित्यं च ।**

आकाशं लक्षयति शब्दगुणकमिति । शब्दः गुणः यस्य तत् शब्दगुणकम् । आकाशः विभुः । विभुत्वं नाम सर्वमूर्तद्रव्यसंयोगित्वम् । आकाशकालदिगात्मानः चत्वारः विभुपदार्थाः । किं नाम मूर्तत्वम् ? क्रियावत्त्वं मूर्तत्वम् । मूर्तद्रव्याणि पञ्च भवन्ति । पृथिव्यप्तेजोवायुमनांसि । शरीरेन्द्रियभिन्नत्वे सति जन्यत्वे सति उपभोगसाधनं विषयः ।

**मूलम् – कालः – अतीतादिव्यव्यवहारहेतुः कालः । स चैको विभुर्नित्यश्च ।**

विभुत्वे सति अतीतादिव्यवहारासाधारणनिमित्तहेतुत्वं कालस्य लक्षणं बोध्यम् । अतीतादिव्यवहारे यः हेतुः सः कालः । भगवतः रामस्य कालः अतीतः । मम कालः वर्तमानः । भगवतः कलेः कालः भविष्यतीत्यादिव्यवहारे मुख्यः कारणभूतः पदार्थः काल इत्यर्थः । अयमेव कालिकपरत्वापरत्वव्यवहारहेतुः ।

**मूलम् - दिक् - प्राच्यादिव्यवहारहेतुर्दिक् । सा चैका विभ्वी नित्या च ।**


उदयाचलसन्निहिता या दिक् सा - प्राची । अस्ताचलसन्निहिता या दिक् सा - प्रतीची । मेरोः सन्निहिता या दिक् सा - उदीची । मेरोर्व्यवहिता या दिक् सा - अवाची । इयमेव दैशिकपरत्वापरत्वव्यवहारहेतुभूत ।

**मूलम् - आत्मा - ज्ञानाधिकरणामात्मा । स द्विविधः जीवात्मा परमात्मा चेति । तत्रेश्वरः सर्वज्ञः परमात्मा एक एव जीवस्तु प्रतिशरीरं भिन्नो विभुर्नित्यश्च ।**

अहं सुखी, इत्यादि ज्ञानं यस्मिन् समवायसम्बन्धेन भवति स आत्मा । समवायः नित्यसम्बन्धः । आत्मनि ज्ञानं सार्वदिकम् । ज्ञाननिष्ठाधेयतानिरूपिताधिकरणतावान् आत्मा इति भावः । ज्ञाननिष्ठसमवायसम्बन्धावच्छिन्नाधेयतानिरूपिताधिकरणता आत्मनि वर्तते तादृशाधिकरणतावान् आत्मा भवतीति ज्ञातव्यम् ।

**मूलम् - मनः - सुखाद्युपलब्धिसाधनमिन्द्रियं मनः । तच्च प्रत्यात्मनियतत्वादनन्तं परमाणुरूपं नित्यं च ।**

आत्मनः सुखाद्युपलब्धौ साधनम् उपकरणभूतं मनः इति मनसः लक्षणम् । मनस्त्वं नाम सुखाद्युपलब्धिसाधनत्वम् । कः उपलभते ? आत्मा । किम् उपलभ्यते ? सुखदुःखादिकम् । केन उपलभ्यते ? मनसा उपलभ्यते । मनःकरणकात्मकर्तृकोपलब्धिः सुखादीनाम् इति भाव्यम् । आत्मा मनसा सुखदुःखादीन् अनुभवति । मनसः तत्र साधनत्वादेव करणकारकं तृतीयाविभक्तिः प्रयुज्यते । आत्मा मनसा विजानातीत्यादिः प्रयोगः वारं वारं अनुसन्धेयः । आत्मा मनसा युज्यते, मनः इन्द्रियेण इन्द्रियमर्थेन ततः प्रत्यक्षं जायते ।




**४. रूपादिचतुष्टयस्य लक्षणं विभागश्च ।**

**मूलम् - रूपम् - चक्षुर्मात्रग्राह्यो गुणो रूपम् । तच्च शुक्ल-नील-पीत-रक्त-हरित-कपिश-चित्रभेदात् सप्तविधम् । पृथिवीजलतेजोवृत्ति । तत्र पृथिव्यां सप्तविधम् । अभास्वरशुक्लं जले । भास्वरशुक्लं तेजसि ।**

चक्षुर्मात्रग्राह्यत्वे सति गुणत्वं रूपस्य लक्षणमिति फलति । चक्षुर्मात्रग्राह्यत्वं नाम चक्षुर्भिन्नेन्द्रियाग्राह्यत्वे सति चक्षुर्ग्राह्यत्वम् । विशेष्यस्य गुणत्त्वस्य रूपलक्षणत्त्वे रसादावतिव्याप्तिः । चक्षुर्ग्राह्यत्वे सति गुणत्वस्य रूपलक्षणत्वे चक्षुर्ग्राह्यसंख्याख्यगुणेऽतिव्याप्तिः तस्य चक्षुर्ग्राह्यत्वेऽपि मात्रपदवाच्यस्य चक्षुर्भिन्नेन्द्रिय-अग्राह्यत्वस्य संख्याख्ये गुणे अभावात् नातिव्याप्तिः । संख्या खलु

त्वगिन्द्रियेणापि ग्राह्यो गुणविशेषः । अर्थात् चक्षुर्भिन्नत्वगिन्द्रियग्राह्यत्वात् संख्यायाः व्यावृत्तिः । रूपं खलु शुक्लादिभेदेन सप्तविभाजकोपाधिमत् । पृथिव्यां जले तेजसि च रूपं वर्तते । वाय्वादिषु षट्सु रूपं नास्ति । पृथिव्यामेव शुक्लादयः सप्त रूपभेदाः वर्तन्ते । शुक्लाख्यं एकमेवरूपं जले तेजसि च वर्तते । तत्राऽपि अभास्वरशुक्लं जले वर्तमानं रूपम् । तेजसि वर्तमानं तु भास्वरशुक्लम् । 'तेजः प्रकाशते' इति व्यवहारः । तत्र भास्करशुक्लरूपवत्त्वात् । 'जलं प्रकाशते' इति व्यवहाराभावः अभास्वरशुक्लरूपवत्त्वादिति विविच्यानुसन्धेयम् । चक्षुर्मात्रग्राह्यत्वं रूपत्वमिति रूपलक्षणोक्तौ रूपत्व-जातौ अतिव्याप्तिः स्यात् । **'यो गुणः यदिन्द्रियग्राह्यः तन्निष्ठा जातिः तदभावश्च तनैवेन्द्रियेण गृह्यते'** इति नियमसद्भावात् रूपत्वस्यापि चक्षुर्मात्रग्राह्यत्वात् । गुणत्वरूपविशेष्यदलदाने तु रूपत्वस्य जातित्वेन गुणत्वाभावान्न अतिव्याप्तिः ।

**मूलम् - रसः-रसनानग्राह्यो गुणो रसः । स च मधुराम्ललवणकटुकषायतिक्तभेदात् षड्विधः । पृथिवीजलवृत्तिः । तत्र पृथिव्यां षड्विधः । जले मधुर एव ।**

रसनेन्द्रियग्राह्यत्वे सति गुणत्वं रसस्य लक्षणम् । गुणत्वमात्रोक्तौ रूपादौ अतिव्याप्तिः । रसनेन्द्रियग्राह्यत्वमात्रोक्तौ रसत्वे रसाभावे च । **'यो गुण.... गृह्यते'** इति पूर्वोक्तनियमात् । अतः विशेषणविशेष्यदलयोः निवेशः । स खलु रसः मधुरादिभेदेन षट्प्रकारकः । षट्प्रकारका अपि रसाः पृथिव्यां वर्तन्ते, जले मधुराख्यः एक एव रसः वर्तते । पृथिवी-निष्ठाधिकरणतानिरूपिताधेयतावन्तः षड्-रसाः । जलनिष्ठाधिकरणतानिरूपिताधेयतावान् एक एव मधुरो रसः इति ज्ञेयम् ।

**मूलम् - गन्धः - घ्राणग्राह्यो गुणो गन्धः । स च द्विविधः - सुरभिरसुरभिश्च । पृथिवीमात्रवृत्तिः ।**

घ्राणेन्द्रियग्राह्यत्वे सति गुणत्वं इति गन्धस्य लक्षणम् । **'यो गुण....'** इति न्यायेन गन्धत्वे अतिव्याप्तिवारकं गुणपदम् । रूपादावतिव्याप्तिवारकं घ्राणग्राह्यत्वरूपं विशेषणदलम् । गन्धः सुरभिगन्धः, असुरभिगन्धः इति द्विविधः । पृथिवीनिष्ठ एव । वाय्वादौ सुरभ्यसुरभिगन्धोपलब्धिः पृथिवीसंयोगप्रयुक्त एव ।

**मूलम् - स्पर्शः - त्वगिन्द्रियमात्रग्राह्यो गुणः स्पर्शः । स त्रिविधः । शीतोष्णाऽनुष्णाऽशीतभेदात् । पृथिवीजलतेजोवायुवृत्तिः । तत्र शीतो जले । उष्णस्तेजसि । अनुष्णाशीतः पृथिवीवाय्वोः ।**

त्वगिन्द्रियभिन्नेन्द्रियाग्राह्यत्वे सति त्वगिन्द्रियग्राह्यत्वे सति गुणत्वं स्पर्शस्य लक्षणम् । **'यो गुण'** इति न्यायेन स्पर्शत्वे अतिव्याप्तिवारकं गुणपदम् । रूपादौ अतिव्याप्तिवारकं त्वगिन्द्रियेति पदम् । संख्यादीनां त्वगिन्द्रियभिन्नचक्षुरिन्द्रियग्राह्यत्वेन त्वगिन्द्रियमात्रग्राह्यत्वाभावात् व्यावृत्तिरिति तदर्थं मात्रपदं चेति अवगन्तव्यम् ।

## ५. पाकजाऽपाकजयोः विश्लेषणम्

**मूलम् - रूपादिचतुष्टयं पृथिव्यां पाकजमनित्यं च । अन्यत्राऽपाकजं नित्यमनित्यं च । नित्यगतं नित्यम् । अनित्यगतमनित्यम् ।**

रूप-रस-गन्ध-स्पर्शाख्याः चत्वारः गुणाः पाकजाः भवन्ति । अत एव अनित्याः । पाकेन जायन्त इति पाकजाः । जायत इति व्यवहारः अनित्यत्वस्थापकः । न जायत इति व्यवहार एव नित्यत्वसाधकः । अत एव जीवात्मविषये **'न जायते म्रियते वा कदाचित्'** इति गीतावचनम् ।

पृथिव्यां पाकजरूपादिचतुष्टयस्य उत्पत्तिः द्विधा भवति । पाकप्रयोज्या पाकजन्या चेति कारणगुणपूर्वकजन्याः पाकप्रयोज्याः ।

**(१) न्यायमतम् (पीठपाकवादिनः)** - श्यामघटे अग्निसंयोगेन श्यामरूपनाशः, अनन्तरं रक्तं रूपमुत्पद्यते इति नैयायिका अभिप्रयन्ते ।

**(२) वैशेषिकमतम् (पीलुपाकवादिनः)** - अग्निसंयोगेन परमाणौ पाके जायमाने सति परमाणुष्वेव रक्तरूपोत्पत्तिः । पूर्वघटनाशः पुनः परमाणुद्व्यणुकादिक्रमेण नीलघटोत्पत्तिः । परमाणुद्व्यणुकादिक्रमेण पुनः रक्तं रूपं च कारणगुणपूर्वकन्यायेन घटे उत्पद्यत इति वैशेषिका मन्वते ।

## ६. संख्यादिशब्दान्तानां लक्षणं विभागश्च ।

**मूलम् - संख्या - एकत्वादिव्यवहारहेतुः संख्या । सा नवद्रव्यवृत्तिः । एकत्वादिपरार्धपर्यन्ता । एकत्वं नित्यमनित्यं च । नित्यगतं नित्यम् । अनित्यगतमनित्यम् । द्वित्वादिकं तु सर्वत्राऽनित्यमेव ।**

अयमेकः, इमौ द्वौ इत्यादिव्यवहाराः लोके दृश्यन्ते । एक इत्यत एकत्वं द्वौ इत्यत द्वित्वं च व्यवहर्तव्यतावच्छेदकम् । एकत्वमभिप्रेत्यैव एकः इत्युच्यते, द्वित्वम् अभिप्रेत्यैव द्वौ इति । तादृशव्यवहारे एकः द्वौ इत्यादि संख्यायाः एव कारणत्वात् लक्षणसमन्वयः । एषा संख्या नवसु द्रव्येषु वर्तते । संख्या एकं द्वेत्यारभ्य दश, शतम्, सहस्रम्, अयुतम्, लक्षम्, नियुतम् इति एवं रीत्या परार्धपर्यन्ता भवति । तदुक्तम्


**एकं दश शतं चैव सहस्त्रं अयुतं तथा ।**
**लक्षं च नियुतं चैव कोटिरर्बुदमेव च ॥**
**वृन्दं खर्वो निखर्वश्च शङ्खं पद्मश्च सागरः ।**
**अन्त्यं मध्यं परार्धं च दशवृध्या यथाक्रमम् ॥**

**संख्या**

| | | |
|---|---|---|
| एकम् | 1 | One |
| दश | 10 | Ten |
| शतम् | 100 | Hundred |
| सहस्त्रम् | 1000 | Thousand |
| अयुतम् | 10000 | Ten thousand |
| लक्षम् | 100000 | Lac |
| नियुतम् | 1000000 | Million |
| कोटि | 10000000 | Crore |
| अर्बुदम् | 100000000 | Billion |
| वृन्दम् | 1000000000 | Ten billion |
| खर्व | 10000000000 | Hundred billion |
| निखर्व | 100000000000 | Trillion |
| शङ्ख | 1000000000000 | Ten trillion |
| पदम् | 10000000000000 | Hundred trillium |
| सागरः | 100000000000000 | 1000 trillium |
| अन्त्यम् | 1000000000000000 | 10000 trillium |
| मध्यम् | 10000000000000000 | 100000 trillium |
| परार्धम् | 100000000000000000 | 1000000 trillium |

**मूलम् - परिमाणम् - मानव्यवहाराऽसाधारणं कारणं परिमाणम् । नवद्रव्यवृत्ति । तच्चतुर्विधम् - अणु, महत्, दीर्घं, ह्रस्वं चेति ।**

अयमेतावान् परिमाणवान् इत्यादि व्यवहारेषु परिमाणमेकम् असाधारणकारणम् । तच्च परिमाणं अणुपरिमाणं, महत्वपरिमाणं, दीर्घपरिमाणं ह्रस्वपरिमाणं चेति चतुष्प्रकारकम् । चतुर्विधमपि परम-मध्यमभेदेन द्विविधम् । तत्र परमाणुत्वह्रस्वत्वे परमाणुमनसोः । मध्यमाणुत्वह्रस्वत्वे द्वयणुके । परममहत्वदीर्घत्वे गगनादौ । मध्यममहत्त्वदीर्घत्वे घटादौ ।




**मूलम् – पृथक्त्वम् – पृथग्त्वव्यवहारासाधारणं कारणं पृथक्त्वम् । सर्वद्रव्यवृत्तिः ।**

अयमस्मात् पृथक् इति व्यवहारस्यासाधारणं कारणं पृथक्त्वमिति भावः । इदं पृथक्त्वं सर्वेष्वपि वर्तमानः गुणः ।

**मूलम् – संयोगः – संयुक्तव्यवहारहेतुः संयोगः । सर्वद्रव्यवृत्तिः ।**

इमौ संयुक्तौ इति व्यवहारे हेतुः गुणः संयोगः । संयोगो द्विविधः – कर्मजः संयोगजश्च । आद्यो हस्तक्रियया हस्तपुस्तकसंयोगः । द्वितीयो – हस्तपुस्तकसंयोगात् कायपुस्तकसंयोगः । अव्याप्यवृत्तिः संयोगः ।

**मूलम् – विभागः – संयोगनाशको गुणो विभागः । सर्वद्रव्यवृत्तिः ।**

संयोगनाशकत्वविशिष्टगुणत्वं विभागस्य लक्षणम् । क्रियायाः संयोगनाशकत्वात् तत्र अतिव्याप्तिवारणाय गुणत्वम् ।

**मूलम् – परत्वापरत्वम् – परापरव्यवहारासाधारणकारणे परत्वापरत्वे । पृथिव्यादिचतुष्टयमनोवृत्तिनी । ते द्विविधे । दिक्कृते कालकृते च । दूरस्थे दिक्कृतं परत्वम् । समीपस्थे दिक्कृतमपरत्वम् । ज्येष्ठे कालकृतं परत्वम् । कनिष्ठे कालकृतमपरत्वम् ।**

अयम् अस्मात् पर इति व्यवहारे हेतुः परत्वम्, अयम् अस्मात् अपरः इति व्यवहारे हेतुः अपरत्वम् । परत्वापरत्वे दिक्कृते कालकृते च भवतः । दिक्कृते परत्वापरत्वयोः दैशिकपरत्वापरत्वाभ्यामपि व्यवहारः भवति । देहली गुजराततः हिमालयं प्रति दैशिकपरत्ववान् । मम ज्येष्ठभ्राता मत्तः कालिकपरत्ववान् । अहं तदपेक्षया अपरः । एवं सोदाहरणं उभे परत्वापरत्वे अवगन्तव्ये ।

**मूलम् – गुरुत्वम् – आद्यपतनासमवायिकारणं गुरुत्वम् । पृथिवीजलवृत्ति ।**

गुरुत्वं वृक्षात् फलपतनहेतुः फलनिष्ठं गुरुत्वम् । तत्रापि आद्यक्षण एव गुरुत्वं कारणम् । द्वितीयक्षणादिपतने फलनिष्ठः वेगः कारणम् । अत एव 'आद्य' इति पदं पतनविशेषणतया प्रदत्तम् । पतनक्रियां प्रति गुरुत्वस्य असमवायिकारणत्वमिति भावः । कार्येण पतनेन सह एकस्मिन् फलरूपार्थे समवायसम्बन्धेन वर्तमानं सत् कारणं गुरुत्वं फले इति हेतोः समवायसम्बन्धेन वर्तत इति हेतोः असमवायिकारणलक्षणं गुरुत्वे समन्वेति ।

**मूलम् – द्रवत्वम् – आद्यस्यन्दनाऽसमवायिकारणं द्रवत्वम् । पृथिवीजलतेजोवृत्ति । तद् द्विविधम् – सांसिद्धिकं नैमित्तिकं चेति । सांसिद्धिकं जले । नैमित्तिकं पृथिवीतेजसोः । घृतादावग्निसिंयोगजं द्रवत्वम् । तेजसि सुवर्णादौ ।**

आद्यस्यन्दने यत् असमवायिकारणं तत् द्रवत्वमित्यर्थः । गुरुत्वविषया निरूपिताः विषयाः अत्रापि समानाः ।

**मूलम् - स्नेहः - चूर्णादिपिण्डीभावहेतुर्गुणः स्नेहः । जलमात्रवृत्तिः ।**

चूर्णादिपिण्डीभावहेतुत्वे सति गुणत्वं स्नेहस्य लक्षणम् । पिण्डीभावो नाम चूर्णादेः परस्परसंयोगविशेषः । जले द्रवत्वं स्नेहश्च वर्तते । स्नेहः पिण्डीभावकर्मणि असाधारणकारणम् इत्यर्थः ।

**मूलम् - शब्दः - श्रोत्रग्राह्यो गुणः शब्दः । आकाशमात्रवृत्तिः । स द्विविधः - ध्वन्यात्मको वर्णात्मकश्चेति । तत्र ध्वन्यात्मको भेर्यादौ । वर्णात्मकः संस्कृतभाषादिरूपः ।**

श्रोत्रगाह्यत्वे सति गुणत्वं शब्दस्य लक्षणम् । '**यो गुण इति न्यायेन** शब्दत्वस्यापि श्रोत्रग्राह्यत्वेन तत्र अतिव्याप्तिवारणाय गुणपदम् । गुणः अयम् आकाशीयः ।

## ७. बुद्धिः

**मूलम् - सर्वव्यवहारहेतुर्गुणो बुद्धिर्ज्ञानम् । सा द्विविधा - स्मृतिरनुभवश्च । संस्कारमात्रजन्यं ज्ञानं स्मृतिः । तद्भिन्नं ज्ञानमनुभवः ।**

सर्वे ये व्यवहारा आहारविहारादयः तेषां हेतुः बुद्धिः इत्यर्थः । सर्वव्यवहाराऽसाधारणहेतुत्वे सति गुणत्वं लक्षणम् । बहिरिन्द्रयाऽजन्यत्वविशिष्टसंस्कारजन्यत्वविशिष्टज्ञानत्वं स्मृतेः लक्षणम् । संस्कारजन्यत्वस्य 'सोऽयं देवदत्तः' इति प्रत्यभिज्ञायामपि सत्त्वेन तत्र ज्ञानत्वस्यापि सत्त्वेन अतिव्याप्तिवारणाय मात्रपदम् । पूर्वानुभवः संस्कारद्वारा स्मृतिं जनयति ।


तद् भिन्नं नाम स्मृतिभिन्नं ज्ञानम् अनुभवः । स्मृतिभिन्नत्वविशिष्टज्ञानत्वम् अनुभवस्य लक्षणम् । स्मृतित्वावच्छिन्नभिन्नमित्यर्थः ।

## ८. यथार्थाऽयथार्थानुभवयोः लक्षणं परिष्कारश्च ।

**मूलम् - तद्भिन्नं ज्ञानमनुभवः । स द्विविधः - 'यथार्थोऽयथार्थश्चेति' ।**

**मूलम् - यथार्थानुभवः - तद्वति तत्प्रकारकोऽनुभवो यथार्थः । यथा रजते इदं रजतमिति ज्ञानम् । सैव प्रमेत्युच्यते ।**

तद्वति इत्यत्र सप्तम्यर्थः नाम शब्दोत्तरवर्तिसप्तम्याः विशेष्यत्वमर्थः । तच्छब्देन प्रकारीभूतो धर्मो वक्तव्यः । रजते 'इदं रजतम्' इति ज्ञानं यथार्थानुभवः । तत्र खलु रजतत्वनिष्ठविशेष्यतानिरूपकत्वे सति रजतत्वनिष्ठप्रकारतानिरूपकत्वे सति अनुभवत्वं वर्तते । अत एव रजते 'इदं रजतम्' इति ज्ञानं जायते । अयमेव यथार्थानुभवः प्रमाशब्देन उच्यते ।



**मूलम् - अयथार्थानुभवः - तदभाववति तत्प्रकारकोऽनुभवोऽयथार्थः । यथा शुक्ताविदं रजतमिति ज्ञानम् । सैवाऽप्रमेत्युच्यते ।**

अयथार्थं लक्षयति तदभाववति इति । ननु इदं संयोगीति प्रमायामतिव्याप्तिरिति चेन्न । यदवच्छेदेन यत् संबन्धाभावः तदवच्छेदेन तत्संबन्धज्ञानस्य विवक्षितत्वात् । संयोगाभावावच्छेदेन संयोगज्ञानस्य भ्रमत्वात् । संयोगावच्छेदेन संयोगज्ञानस्य प्रमात्वान्नातिव्याप्तिः ।

## ९. करणकारणादिलक्षणं परिष्कारश्च ।

**मूलम् - करणम् - असाधारणं कारणं करणम् ।**

व्यापारवद् असाधारणं कारणं करणम् इति अर्थः । असाधारणत्वे सति कारणत्वं करणलक्षणम् । केवलं असाधारणकारणं करणमित्युक्ते तन्तु-कपालसंयोगयोः अतिव्याप्तिः । तत्र कारणत्ववारणाय व्यापारवत्वे सति इति विशेषणं देयम् । ईश्वरादृष्टकालादीनां कार्यसामान्यकारणत्वात् असाधारणकारणत्वाभावात् नातिव्याप्तिः ।

**मूलम् - कारणम् - कार्यनियतपूर्ववृत्ति कारणम् । कार्यं प्रागभावप्रतियोगि । कारणं त्रिविधम् - समवाय्यसमवायिनिमित्तभेदात् ।**

पूर्वा वृत्तिः यस्य तत् पूर्ववृत्ति, नियतं च तत् पूर्ववृत्ति च नियतपूर्ववृत्ति । कार्यस्य नियतपूर्ववृत्ति कार्यनियतपूर्ववृत्ति । अतः कारणस्य लक्षणं कार्यनियतपूर्ववृत्ति इति । प्रागभावप्रतियोगित्वं कार्यस्य लक्षणम् । कारणं त्रिविधम् - समवायिकारणम्, असमवायिकारणम्, निमित्तकारणं चेति ।

**कारणम्**
(कार्यनियतपूर्ववृत्ति कारणम्)


| **समवायि** | **असमवायि** | **निमित्तम्** |
|---|---|---|
| (यत्समवेतं कार्यमुत्पद्यते तत्) यथा-तन्तुसंयोगः पटस्य । पटश्च स्वगतरूपादेः । | (कार्येण कारणेन वा सहैकस्मिन्नर्थे समववेतं सत् कारणम् तत्) यथा-तन्तुसंयोगः पटस्य । तन्तुरूपं पटगतरूपस्य | (तदुभयभिन्नकारणम् निमित्तकारणम्) यथा-तुरीवेमादिकम् |

**मूलम् - समवायिकारणम् - यत्समवेतं कार्यमुत्पद्यते तत्समवायिकारणम् । यथा तन्तवः पटस्य, पटश्च स्वगतरूपादेः ।**

यस्मिन् समवायसम्बन्धेन सम्बद्धं सत् कार्यमुत्पद्यते तत् समवायिकारणम् । पटत्वावच्छिन्नं प्रति तन्तुत्वावच्छिन्नं समवायिकारणम् । पटः पटरूपं प्रति समवायिकारणमित्यर्थः ।

**मूलम् - असमवायिकारणम् - कार्येण कारणेन वा सहैकस्मिन्नर्थे समवेतं सत् कारणमसमवायिकारणम् । यथा तन्तुसंयोगः पटस्य । तन्तुरूपं पटरूपस्य ।**

कार्येण इति एतद् उदाहरति तन्तुसंयोग इति । कार्येण पटेन सह एकस्मिन् तन्तौ समवेतात् तन्तुसंयोगः पटस्य असमवायिकारणम् इत्यर्थः । कार्येण पटेन सह एकस्मिन् तन्तौ समवेतात् तन्तुरूपं पटरूपस्य असमवायिकारणम् इत्यर्थः ।




**मूलम् - निमित्तकारणम् - तदुभयभिन्नं कारणं निमित्तकारणम् । यथा तुरीवेमादिकं पटस्य ।**

कारणेन सह पटरूपस्य समवायिकारणभूतपटेन सह एकस्मिन् अर्थे तन्तौ समवायसम्बन्धेन वर्तमानं यत् तन्तुरूपं पटरूपं प्रति कारणं भवति । प्रतत् तन्तुरूपम् असमवायिकारणं पटरूपं प्रमीत्यर्थः ।

## १०. प्रत्यक्षलक्षणं तद्वैविध्यञ्च ।

**मूलम् - प्रत्यक्षज्ञानकरणं प्रत्यक्षम् । इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम् । ज्ञानाकरणकं ज्ञानं प्रत्यक्षम् । इन्द्रियार्थसन्निकर्षजन्यत्वे सति ज्ञानत्वं प्रत्यक्षप्रमाया लक्षणं बोध्यम् । इन्द्रियं चक्षुरादिकमर्थो घटादिस्तयोः सन्निकर्षः संयोगादिस्तज्जन्यत्वे सति ज्ञानत्वं घटादिप्रत्यक्षे इति लक्षणसमन्वयो भवति । तद्विविधम् - निर्विकल्पकं सविकल्पकं चेति ।**

**मूलम् - निर्विकल्पकम् - तत्र निष्प्रकारकं ज्ञानं निर्विकल्पकम् । यथेदं किञ्चिद्**

प्रकारताशून्यज्ञानत्वमेव निर्विकल्पकत्वमित्यर्थः ।

**मूलम् - सविकल्पकम् - सप्रकारकं ज्ञानं सविकल्पकम्, यथा 'डित्थोऽयं' 'ब्राह्मणोऽयं' 'श्यामोऽयमि'ति ।**

विषयताया ज्ञाननिरूपितत्वाज्ज्ञानस्य विषयतानिरूपकत्वेन प्रकारतानिरूपकज्ञानत्वं सविकल्पकस्य लक्षणम् । घटादिवारणाय ज्ञानमिति । निर्विकल्पकत्ववारणाय-सप्रकारकमिति ।

## ११. सन्निकर्षः तद्भेदाश्च ।

**मूलम् - प्रत्यक्षज्ञानहेतुरिन्द्रियार्थसन्निकर्षः षड्विधः - संयोगः, संयुक्तसमवायः, संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायः, विशेषणविशेष्यभावश्चेति ।**

**मूलम् - संयोगः - चक्षुषा घटप्रत्यक्षजनने संयोगः सन्निकर्षः ।**

द्रव्यप्रत्यक्षे सर्वत्र संयोगसन्निकर्षः इत्यर्थः ।

**मूलम् - संयुक्तसमवायः - घटरूपप्रत्यक्षजनने संयुक्तसमवायः सन्निकर्षः ।**

चक्षुःसंयुक्ते घटे रूपस्य समवायात् । संयुक्तसमवायमुदाहरति घटरूपेति । तत्र युक्तिमाह चक्षुःसंयुक्त इति ।

**मूलम् - संयुक्तसमवेतसमवायः - रूपत्वसामान्यप्रत्यक्षे संयुक्तसमवेतसमवायः सन्निकर्षः ।**
चक्षुःसंयुक्ते घटे रूपं समवेतं तत्र रूपत्वस्य समवायात् । संयुक्तसमवायमुदाहरति रूपत्वेति ।


**मूलम् - समवायः - श्रोत्रेण शब्दसाक्षात्कारे समवायः सन्निकर्षः । कर्णविवरवृत्त्याकाशस्य श्रोत्रत्वाच्छब्दस्याकाशगुणत्वाद्गुण-गुणिनोश्च समवायात् ।**

समवायमुदाहरति श्रोत्रेणेति । तदुपादयति कर्णेति ।

**मूलम् - समवेतसमवायः - शब्दत्वसाक्षात्कारे समवेतसमवायः सन्निकर्षः । श्रोत्रसमवेते शब्दे शब्दत्वस्य समवायात् ।**

समवेतसमवायमुदाहरति शब्दत्वेति ।

**मूलम् - विशेषणविशेष्यभावः:- अभावप्रत्यक्षे विशेषणविशेष्यभावः सन्निकर्षः । घटाभाववद् भूतलमित्यत्र चक्षुःसंयुक्ते भूतले घटाभावस्य विशेषणत्वात् । एवं सन्निकर्षषट्कजन्यं ज्ञानं प्रत्यक्षम् । तत्करणमिन्द्रियम् । तस्मादिन्द्रियं प्रत्यक्षप्रमाणमिति सिद्धम् ।**




## स्वाध्यायः

**१. योग्यविकल्पं चित्वा उत्तरं लिखत ।**

(१) तत्र गन्धवती ....... ।

(क) आपः (ख) पृथिवी (ग) तेजः (घ) वायुः

(२) शब्दगुणकम् ।

(क) पृथिवी (ख) तेजः (ग) वायुः (घ) आकाशम्

(३) सन्निकर्षः कति विधः ?

(क) त्रिविधः (ख) द्विविधः (ग) चतुर्विधः (घ) षड्विधः

(४) कारणं कति विधम् ?

(क) त्रिविधम् (ख) द्विविधम् (ग) चतुर्विधम् (घ) पञ्चविधम्

(५) अभावः कति विधः ?

(क) त्रिविधः (ख) द्विविधः (ग) चतुर्विधः (घ) एकविधः

## २. रिक्तस्थानं पूरयत ।

(१) श्रोत्रग्राह्यत्वे गुणत्वं ______________ लक्षणम् ।

(२) गुणाः ______________ सन्ति ।

(३) द्रव्याणि ______________ सन्ति ।

(४) सामान्यं ______________ विधं भवति ।

(५) रूपरहितस्पर्शवान् ______________ ।

## ३. युग्मानि योजयत ।

| अ | ब |
|---|---|
| (१) सन्निकर्षः | (१) त्रिविधम् |
| (२) कारणम् | (२) चतुष्प्रकारकम् |
| (३) अनुभवः | (३) चतुर्विंशतिः |
| (४) परिमाणम् | (४) षड्विधः |
| (५) गुणाः | (५) द्विविधः |
| | (६) दश |

## ४. एकवाक्येन उत्तरं लिखत ।

(१) नव द्रव्याणि कानि ?

(२) गुणाः कति ? के ?

(३) ज्ञानलक्षणं किम् ?

(४) स्नेहत्वं किम् ?

(५) पाकजाः गुणाः के ?

## ५. द्वित्रवाक्यैः उत्तरं लिखत ।

(१) मङ्गलपद्यं किम् ?

(२) तर्कसंग्रहे कति पदार्थाः मताः ?

(३) पृथिव्याः किं लक्षणम् ?

## ६. टिप्पणीं लिखत ।

(१) अभावाः ।

(२) गुणाः ।

(३) सन्निकर्षाः ।

## ७. सविस्तरम् उत्तरं लिखत ।

(१) पदार्थान् विवेचयत ।

(२) आकाशलक्षणं विव्रियत ।

(३) शब्दभेदान् चर्चयत ।

# ७ तर्कसंग्रहे अनुमानस्वरूपम्

**प्रस्तावना**

'प्रमाणाधीना प्रमेयसिद्धिः' अर्थात् प्रमाणमन्तरा प्रमेयस्य सिद्धिर्नैव सम्भवतीत्यतः न्यायसूत्रकारैः अक्षपादैः आदौ प्रमाणपदार्थस्य उल्लेखः कृतः । तच्च प्रमाणं प्रमाकरणमेव । न्यायसिद्धान्ते प्रत्यक्षानुमानोपमानशब्दभेदेन चत्वारि प्रमाणानि सन्ति । अनुमितिप्रमां प्रति व्याप्तिज्ञानं करणं परामर्शश्च व्यापारो भवति । सम्प्रति उपजीव्योपजीवकभावसङ्गत्या (कार्यकारणभाव) अनुमानस्वरूपं निरूपयति ग्रन्थकारः ।

## १. अनुमितिः तत्करणानि च

**मूलम् - अनुमतिकरणमनुमानम् । परामर्शजन्यं ज्ञानमनुमितिः ।**

**व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः ।**

**यथा - वह्निव्याप्यधूमवानयं पर्वत - इति ज्ञानं परामर्शः । तज्जन्यं पर्वतो वह्निमान् इति ज्ञानमनुमितिः ।**

अनु पश्चात् मितिः ज्ञानम् अनुमितिः । अर्थात् प्रत्यक्षप्रमाणेन कस्यचित् पदार्थस्य ज्ञानानन्तरं तत्सम्बन्धिनः पदार्थान्तरस्य ज्ञानम् अनुमितिः । यथा पर्वते धूमस्य प्रत्यक्षानन्तरं तस्मिन् एव पर्वते तद् धूमसम्बन्धी धूमव्यापको वह्निरस्तीति यज्ज्ञानम् उपलभ्यते सा अनुमितिः । सा च परामर्शाव्यवहितोत्तरकाले जायते । सा च अनुमितिः परामर्शजन्या भवति । परामर्शो नाम व्याप्तिविशिष्टपक्षधर्मताज्ञानम्, 'यत्र यत्र धूमः तत्र तत्र वह्निः' इत्याकारकहेतुसाध्ययोः साहचर्यनियम एव व्याप्तिः । 'पर्वते धूमः वर्तते' इत्याकारकः धूमादेः हेतोः पर्वतादिरूपपक्षवृत्तित्वं पक्षधर्मताज्ञानम् । इदं पक्षधर्मताज्ञानं यदा व्याप्तिज्ञानविशिष्टं भवति, तदा परामर्शः अथवा लिङ्गपरामर्श इत्युच्यते, इत्थञ्च व्याप्तिज्ञानविशिष्टस्य हेतोः पक्षवृत्तित्वज्ञानमेव परामर्श इति निष्कर्षः ।

एवञ्च सर्वप्रथमं पक्षधर्मताज्ञानं, ततः व्याप्तिस्मरणं, तेन च परामर्शः, परामर्शानन्तरम् अनुमितिरिति फलति । एतादृश्याम् अनुमित्युत्पत्तौ पक्षधर्मताज्ञानं, व्याप्तिस्मरणं, परामर्शज्ञानमिति एतत् ज्ञानत्रयम् अपेक्षितम् । तथाहि कश्चित् पुरुषः भूयोदर्शनेन महानसादौ यत्र धूमस्तत्राग्निरिति धूमे वह्निव्याप्तिं गृह्णाति । पश्चात् स एव पुरुषः पर्वतादौ अविच्छिन्नां धूमरेखां पश्यति । ततः पूर्वोत्पन्नां व्याप्तिं स्मरति, तेन च तादृशः वह्निव्याप्यः धूमः पर्वतवृत्तिरिति ज्ञानं जायते, स एव परामर्शः । तदनन्तरं पर्वतो वह्निमान् इति अनुमितिर्जायत इति क्रमः ।

तत्र अनुमितेः असाधारणकारणभूतं व्याप्तिज्ञानमेव करणं भवति । तदेव अनुमानं वक्ष्यति 'अनुमितिकरणमनुमानम्' इति । ईदृशेन अनुमानेन पक्षधर्मताज्ञानव्याप्तिस्मरणद्वारा परामर्शः जायते । तेन अनुमितिः इति क्रमस्य सत्वात् परामर्शः व्यापारो भवति । स च परामर्शः व्याप्तिज्ञान जन्यत्वे सति व्याप्तिज्ञानजन्य जनकत्वरूपः । एवञ्च व्यापारवदसाधारणकारणत्वात् व्याप्तिज्ञानरूपमुमानं करणं भवतीति निष्कर्षः । इत्थञ्च व्याप्तिज्ञानं, पक्षधर्मताज्ञानं, व्याप्तिस्मरणं, परामर्शः इत्येतानि अनुमितिकारणानि । तत्र च व्याप्तिज्ञानं करणमिति फलति ।

## २. स्वार्थानुमितिः

**मूलम् - अनुमानं द्विविधम् । स्वार्थं परार्थञ्चेति । स्वार्थं स्वानुमितिहेतुः । तथाहि - स्वयमेव भूयोदर्शनेन यत्र यत्र धूमस्तत्राग्निरिति महानसादौ व्याप्तिं गृहीत्वा पर्वतसमीपं गतः तद्गते चाग्नौ सन्दिहानः पर्वते धूमं पश्यन् व्याप्तिं स्मरति 'यत्र यत्र धूमस्तत्राग्नि'रिति । तदनन्तरं वह्निव्याप्यधूमवानयं पर्वत इति ज्ञानमुत्पद्यते । अयमेव लिङ्गपरामर्श इत्युच्यते ।**

**तस्मात्पर्वतो वह्निमानिति ज्ञानमनुमितिरुत्पद्यते । तदेतत्स्वार्थानुमानम् ।**

पूर्वं द्वितीयप्रमाणत्वेन निरूपितम् अनुमानं स्वार्थानुमानं परार्थानुमानमिति द्विधा विभज्यते । अनुमित्याख्यज्ञाने अथवा प्रतीतौ असाधारणकारणरूपमिदम् अनुमानं स्वानुभव–परानुभवापादनाभ्याम् उपाधिभ्यां स्वार्थानुमानं परार्थानुमानमिति विभज्यते । स्वार्थं स्वानुमितिहेतुः अनुमानस्य स्वार्थत्वं नाम स्वानुमितिहेतुत्वम् । तस्यैव निरूपणं तथाहीत्यारभ्य तदेतत्स्वार्थानुमानमिति पर्यन्तम् । महानसादौ गृहीतव्याप्तिकः कश्चित् पर्वतसमीपं गत्वा व्याप्यव्यापकयोः अन्यतरं व्याप्यं धूमं दृष्ट्वा पूर्वगृहीतां व्याप्तिं स्मरति 'यत्र धूमः तत्राग्निः' इति । व्याप्यसत्वे व्यापकसत्वावश्यंभावात् वह्निनिष्ठव्यापकतानिरूपितव्याप्यतावतः धूमस्य सत्त्वात् व्यापकः वह्नि रवश्यंभावी । 'वह्निव्याप्यधूमवान् अयं पर्वत' इति बोधः भवति । अयमेव लिङ्गपरामर्श इत्युच्यते । अनन्तरं पर्वतो वह्निमानिति अनुमित्यात्मकं ज्ञानमुत्पद्यते । एतदेव स्वार्थानुमानम् । इदम् ज्ञानं स्वप्रयोजनाय भवतीति हेतोः स्वार्थानुमितिः, तत्करणतया अनुमानस्य स्वार्थानुमानत्वमिति भाव्यम् ।

### ३. परार्थानुमितिः

**मूलम् – यत्तु स्वयं धूमादग्निमनुमाय परं प्रति बोधयितुं पञ्चावयववाक्यं प्रयुज्यते तत्परार्थानुमानम् । यथा पर्वतो वह्निमान् धूमवत्त्वात् । यो यो धूमवान् स स वह्निमान् । यथा महानसः । तथा चायम् । तस्मात्तथेति । अनेन प्रतिपादितात्लिङ्गात्परोऽप्यग्निं प्रतिपद्यते ।**

**मूलम् – प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि पञ्चावयवाः । पर्वतो वह्निमानिति प्रतिज्ञा । धूमवत्त्वादिति हेतुः । यो यो धूमवान् स स वह्निमानित्युदाहरणम् । तथा चायमित्युपनयः । तस्मात्तथेति निगमनम् ।**

परप्रयोजनार्थं प्रयुज्यमानम् अनुमानं परार्थानुमानं भवति । पर्वते निश्चिताग्निबुद्धिः कश्चित् परम् अग्नेः सत्त्वम् अनुमानेनावगमयितुं पञ्चावयवगर्भितं वाक्यं प्रयुङ्क्ते । प्रतिज्ञा–हेतु–उदाहरण–उपनय–निगमनानि तानि वाक्यानि । तत्र प्रतिज्ञावाक्यं यत्र साध्यनिर्देशः क्रियते । 'पर्वतो वह्निमान्' इति । पञ्चम्यन्तं लिङ्गप्रतिपादकं वचनं हेतुः । 'धूमवत्वात्' इतीदं हेतुवाक्यम् । 'यो यो धूमवान् स वह्निमान् यथा महानसः' इत्युदाहरणवाक्यम् । 'वह्निव्याप्यधूमवानयं पर्वत' इत्युपनयवाक्यम् । 'वह्निव्याप्यधूमवत्त्वात् वह्निमान् पर्वतः' इति प्रतिज्ञावाक्यस्य सहेतुकं पुनर्वचनं निगमनवाक्यम् । प्रतिज्ञाप्रतिपादकत्वात् प्रतिज्ञावाक्यम् । हेतुप्रतिपादकत्वात् हेतुवाक्यं इत्यादिरीत्या ज्ञेयम् ।

### ४. लिङ्गस्य त्रैविध्यम्

**मूलम् – लिङ्गं त्रिविधम् । अन्वयव्यतिरेकि, केवलान्वयि, केवलव्यतिरेकि चेति । अन्वयेन व्यतिरेकेण च व्याप्तिमदन्वयव्यतिरेकि । यथा वह्नौ साध्ये धूमवत्त्वम् । यत्र धूमस्तत्राग्निर्यथामहानस इत्यन्वयव्याप्तिः । यत्र वह्निर्नास्ति तत्र धूमोऽपि नास्ति, यथा महाह्रद इति व्यतिरेकव्याप्तिः । अन्वयमात्रव्याप्तिकं केवलान्वयि । यथा घटोऽभिधेयः प्रमेयत्वात्पटवत् । अत्र प्रमेयत्वाभिधेयत्वयोर्व्यतिरेकव्याप्तिर्नास्ति । सर्वस्य प्रमेयत्वादभिधेयत्वाच्चा । व्यतिरेकमात्रव्याप्तिकं केवलव्यतिरेकि । यथा पृथिवीतरेभ्यो भिद्यते गन्धवत्त्वात् । यदितरेभ्यो न भिद्यते न तद्गन्धवत् । यथा जलम् । न चेयं तथा । तस्मान्न तथेति । अत्र यद्गन्धवत्तदितरभिन्नमित्यन्वयदृष्टान्तो नास्ति । पृथिवीमात्रस्य पक्षत्वात् ।**

लिङ्गं नाम हेतुः । लीनमर्थं गमयतीति लिङ्गम् । तत्सत्वे तत्सत्वम् इति अन्वयव्याप्तिः धूमसत्वे वह्निसत्वम् इति। तदभावे तदभावः इति व्यतिरेकव्याप्तिः । यत्र वह्न्यभावः तत्र धूमाभावः इति । हेतुसाध्ययोः व्याप्तिः अन्वयव्याप्तिः ।

साध्याभावहेत्वभावयोः व्याप्तिः व्यतिरेकव्याप्तिः । लिङ्गम् अन्वयव्याप्तिव्यतिरेकव्याप्त्याधारेण त्रिविधं भवति । अन्वयतिरेकि, केवलान्वयि, केवलव्यतिरेकि चेति । यत्र अन्वयव्याप्तिः व्यतिरेकव्याप्तिश्च भवति तत्र यः हेतुः स अन्वयव्यतिरेकीत्युच्यते । यत्र अन्वयव्याप्तिः एव भवति तत्र केवलान्वयी । यत्र व्यतिरेकव्याप्तिः भवति स केवलव्यतिरेकी । उदाहरणादिकं मूले स्पष्टम् ।


### ५. पक्षादीनां स्वरूपम्

**मूलम् - सन्दिग्धसाध्यवान् पक्षः । यथा धूमवत्त्वे हेतौ पर्वतः । निश्चितसाध्यवान् सपक्षः ।**

**यथा तत्रैव महानसः । निश्चितसाध्याभाववान् विपक्षः । यथा तत्रैव महाह्रदः ।**

यत्रैव साध्यः साध्यते स पक्ष इति सामान्यतः पक्षः ज्ञातव्यः । पर्वते एव खलु वह्निः धूमेन हेतुना साध्यते अतः पर्वतः पक्षः । अथवा यत्र साध्यस्य संशयः भवति सः पक्षः । पक्षे वह्निः वर्तते न वा इति संशयः भवति, अतः सन्दिग्धः साध्यः यस्य सः सन्दिग्धसाध्यवान् पर्वतः भवति । यत्र साध्यस्य वह्नेः निश्चयः भवति सः सपक्षः यथा महानसम् । महानसे वह्निनिश्चयस्य सद्भावात् महानसस्य सपक्षत्वम् । यत्र निश्चयरूपेण वह्नेः अभावः वर्तते सः विपक्षः । निश्चयरूपेण ह्रदे खलु वह्निः नास्ति । अतः सः विपक्षः ।

### ६. पञ्चहेत्वाभासाः




**मूलम् - सव्यभिचारविरुद्धसत्प्रतिपक्षासिद्धबाधिताः पञ्चहेत्वाभासाः ।**

**सव्यभिचारोनैकान्तिकः । यथा पर्वतो वह्निमान् प्रमेयत्वादिति । प्रमेयत्वस्य वह्न्यभाववति ह्रदे विद्यमानत्वात् ।**

**सर्वसपक्षविपक्षव्यावृत्तोऽसाधारणः । यथा शब्दो नित्यश्शब्दत्वादिति । शब्दत्वं सर्वेभ्यो नित्येभ्योऽनित्येभ्यश्च व्यावृत्तं शब्दमात्रवृत्ति ।**

**अन्वयव्यतिरेकदृष्टान्तरहितोऽनुपसंहारी । यथा सर्वमनित्यं प्रमेयत्वादिति । अत्र सर्वस्यापि पक्षत्वाद्दृष्टान्तो नास्ति । साध्याभावव्याप्यो हेतुर्विरुद्धः । यथा शब्दो नित्यः कृतकत्वादिति । कृतकत्वं हि नित्यत्वाभावेनानित्यत्वेन व्याप्तम् ।**

**साध्याभावसाधकं हेत्वन्तरं यस्य विद्यते स सत्प्रतिपक्षः । यथा शब्दो नित्यः श्रावणत्वाच्छब्दत्ववदिति । शब्दोऽनित्यः कार्यत्वात् घटवदिति ।**

**असिद्धस्त्रिविधः । आश्रयासिद्धः, स्वरूपासिद्धः, व्याप्यत्वासिद्धश्चेति । आश्रयासिद्धो यथा गगनारविन्दं सुरभि, अरविन्दत्वात् । सरोजारविन्दवत् । अत्र गगनारविन्दमाश्रयः । स च नास्त्येव ।**

**स्वरूपासिद्धो यथा शब्दो गुणः चाक्षुषत्वात् । अत्र चाक्षुषत्वं शब्दे नास्ति । शब्दस्य श्रावणत्वात् ।**

**सोपाधिको हेतुर्व्याप्यत्वासिद्धः । साध्यव्यापकत्वे सति साधनाव्यापक उपाधिः । साध्यसमानाधिकरणात्यन्ताभावाप्रतियोगित्वं साध्यव्यापकत्वम् । साधनवन्निष्ठात्यन्ताभावप्रतियोगित्वं साधनाव्यापकत्वम् । पर्वतो धूमवान्वह्निमत्त्वादिति । अत्रार्द्रेन्धनसंयोग उपाधिः । तथाहि यत्र धूमस्तत्रार्द्रेन्धनसंयोग इति साध्यव्यापकत्वम् । यत्र वह्निस्तत्रार्द्रेन्धनसंयोगो नास्ति । अयोगोलके आर्द्रेन्धनसंयोगाभावादिति साधनाव्यापकत्वम् । एवं साध्यव्यापकत्वे सति साधनाव्यापकत्वादार्द्रेन्धनसंयोग उपाधिः । सोपाधिकत्वात् वह्निमत्त्वं व्याप्यत्वासिद्धम् ।**

**यस्य साध्याभावः प्रमाणान्तरेण निश्चितः स बाधितः । यथा वह्निरनुष्णो द्रव्यत्वादिति । अत्रानुष्णत्वं साध्यं, तदभाव उष्णत्वं स्पार्शनप्रत्यक्षेण गृह्यत इति बाधितत्त्वम् ।**

हेतोः आभासाः हेत्वाभासाः, हेतुवदाभासन्त इति हेत्वाभासा इति उभयथा व्युत्पत्तिः हेत्वाभासशब्दस्य स्वीकृता । प्रथमव्युत्पतौ हेतोः दोषाः इति, द्वितीयव्युत्पत्तौ दुष्टहेतवः इति च फलति ।

अनुमितिप्रतिबन्धकयथार्थज्ञानविषयत्वं हेत्वाभासत्वम् इति हेत्वाभासस्य सामान्यं लक्षणम् । एते हेत्वाभासाः पञ्चप्रकाराः भवन्ति । सव्यभिचार-विरुद्ध-सत्प्रतिपक्ष-असिद्ध-बाधिता इति । अनैकान्तिकः सव्यभिचारस्य पर्यायो भवति । व्यभिचारेण सह वर्तत इति सव्यभिचारः । अयं त्रिधा विभाजितो वर्तते । साधारणासाधारणानुपसंहारिभेदात् । अनेन साधारणाद्यन्यतमत्वम् इति सव्यभिचारस्य सामान्यलक्षणम् उक्तं भवति । साध्याभाववद्वृत्तित्वं हेतोः साधारणत्वम् । पर्वतो वह्निमान् प्रमेयत्वादित्यत्र प्रमेयत्वस्य हेतोः वह्निरूपसाध्याभाववति ह्रदे विद्यमानत्वात् साधारणानैकान्तिकत्वम् । असाधारणत्वञ्च सर्वसपक्षविपक्षव्यावृत्तत्वे सति पक्षमात्रवृत्तित्वम् । शब्दो नित्यः शब्दत्वादित्र शब्दत्वरूपः हेतुः सपक्षेभ्यः नित्येभ्यः विपक्षेभ्यः अनित्येभ्यश्च व्यावृत्तं सत् शब्दाख्यपक्षमात्रवृत्तीति हेतोः, असाधारणअनैकान्तिकः वर्तते । अनुपसंहारित्वञ्च अन्वयव्यतिरेकदृष्टान्तरहितत्वम् । सर्वम् अनित्यं प्रमेयत्वात् इत्युक्ते सर्वस्यापि पक्षत्वात् । अन्वयव्यतिरेकदृष्टान्तौ न स्याताम् । अतः किमपि निर्णेतुमशक्यः, उपसंहारः न कर्तुं शक्य इति अनुपसंहारी ।

हेतोः साध्याभावव्याप्तत्वं विरुद्धत्वम् । शब्दो नित्यः कृतकत्वात् । अत्र कृतकत्वरूपः हेतुः न शब्दे नित्यत्वसाधकः, अपितु साध्याभावरूपनित्यत्वमित्येव व्याप्तिः संभवति । हेतोः साध्यव्याप्तिः आवश्यकत्वे सति साध्याभावव्याप्तत्वात् विरुद्धत्वम् ।

सन् प्रतिपक्षः यस्य सः सत्प्रतिपक्षः इति व्युत्पत्तिः । 'शब्दः नित्यः श्रावणत्वात् शब्दत्ववदित्युक्ते', शब्दोऽनित्यः कार्यत्वाद्धटवत् इति प्रतिपक्षी तदभावसाधकं हेतुं प्रयुनक्ति स प्रतिपक्षः । यस्य साध्याभावसाधकं हेत्वन्तरं विद्यते स सत्प्रतिपक्षः इति लक्षणात् असिद्धत्वम् आश्रयासिद्ध्याद्यन्यतमत्वम् । आश्रयासिद्धः स्वरूपासिद्धः, व्याप्यत्वासिद्धः इति असिद्धः त्रिविधः ।

आश्रयासिद्धः पक्षतावच्छेदकविशिष्टपक्षाप्रसिद्धः । यथा गगनारविन्दं सुरभि, अरविन्दत्वात् सरोजारविन्दवत् इत्यनुमाने प्रयुक्ते गगनीयत्वविशिष्टारविन्दस्याप्रसिद्धत्वात् । अरविन्दे गगनीयत्वाभावात् विशेषणाभावप्रयुक्तविशिष्टाप्रसिद्धिरिति भावः ।

पक्षे हेत्वभावः स्वरूपासिद्धः । पक्षे हेतोः सत्वमेव अनुमानस्य मुख्यं स्वरूपम् । गुणः चाक्षुषत्वादित्यत्र चाक्षुषत्वस्य शब्देऽभावात् स्वरूपासिद्धत्वम् । शब्दे खलु श्रावणत्वं प्रसिद्धम् ।

सोपाधिको हेतुः व्याप्यत्वासिद्धः । हेतोः सोपाधिकत्वे सति व्याप्यत्वासिद्धाख्यः हेत्वाभासः भवति । हेतोः सोपाधिकत्वं नाम साध्यव्यापकत्वे सति साधनाव्यापकत्वम् । साध्यव्यापकत्वं साध्यसमान-अधिकरण-अत्यन्ताभाव-अप्रतियोगित्वम् । साधनाव्यापकत्वञ्च साधनवत्-निष्ठ-अत्यन्ताभाव-प्रतियोगित्वम् । पर्वतो धूमवान्, वह्नेरित्यत्र

आर्द्रेन्धनसंयोगस्य उपाधित्वं भवति । साध्यः तत्समानाधिकरणः यः अत्यन्ताभावः घटात्यन्ताभावः, तत्प्रतियोगी घटः अप्रतियोगी आर्द्रेन्धनसंयोगः इति साध्यव्यापकत्वं, साधनं वह्निः तद्वत् अयोगोलकं, तत्र वर्तते योऽत्यान्ताभावः आर्द्रेन्धनसंयोगात्यन्ताभावः, तत्प्रतियोगित्वमेव आर्द्रेन्धनसंयोगस्येति साधनाऽव्यापकत्वमपि भवति ।

अन्यथा यत्र धूमः तत्र आर्द्रेन्धनसंयोगत्वात् साध्यव्यापकत्वम्, यत्र साधनं वह्निः अयोगोलके आर्द्रेन्धनसंयोगाभावात् साधनाव्यापकत्वम् इति बोध्यम् । तथा आर्द्रेन्धनरूपोपाधिविशिष्टत्वात् हेतोः धूमस्य व्याप्यत्वासिद्धत्वम् ।

अन्यथा यस्य साध्यस्याभावः प्रमाणान्तरेण निश्चितः सः हेतुः बाधितः । वह्निः द्रव्यत्वादिति अनुमाने केनचित् प्रयुक्ते वह्नेः अनुष्णत्वाभावस्य स्पार्शनप्रत्यक्षरूपप्रमाणसिद्धत्वात् द्रव्यहेतुः बाधितः इति । हेत्वाभासाः विद्यार्थिभिः न्याये अवश्यं ज्ञातव्याः भवन्ति ।

## स्वाध्यायः

### १. योग्यविकल्पं चित्वा उत्तरं लिखत ।

(१) स्वार्थानुमानं भवति ....... ।

(क) परार्थानुमितिहेतुः (ख) स्वार्थानुमितिहेतुः (ग) अन्यानुमितिहेतुः (घ) स्वानुमितिहेतुः

(२) प्रतिज्ञावाक्यम् अस्ति ।

(क) धूमवत्त्वात् (ख) यो यो धूमवान् स स वह्निमान्

(ग) पर्वतो वह्निमान् (घ) तस्मात्तथेति

(३) हेत्वाभासाः कति ?

(क) सप्त (ख) पञ्च (ग) अष्टौ (घ) नव

(४) असिद्धः कतिविधः ?

(क) सप्त (ख) पञ्च (ग) त्रि (घ) एक

(५) पक्षः कतिविधः ?

(क) एक (ख) द्वि (ग) त्रि (घ) पञ्च

### २. रिक्तस्थानं पूरयत ।

(१) अनुमानं ______________ अस्ति ।

(२) स्वार्थानुमिति हेतुः ______________ भवति ।

(३) पक्षः ______________ भवति ।

(४) लिङ्गप्रतिपादकं वचनं ______________ भवति ।

(५) तदसत्व तदसत्वं ______________ अस्ति ।

### ३. युग्मानि योजयत ।

| अ | ब |
|---|---|
| (१) हेत्वाभासा: | (१) द्विविधम् |
| (२) असिद्ध: | (२) त्रिविध: |
| (३) लिङ्गम् | (३) नव |
| (४) अनुमानम् | (४) पञ्च |
| (५) सव्यभिचार: | (५) त्रिविध: |
| | (६) त्रिविधम् |

### ४. एकवाक्येन उत्तरं लिखत ।

(१) लिङ्गं कतिविधम् ?

(२) आश्रयासिद्धस्य किं लक्षणम् ?

(३) हेत्वाभासलक्षणं किम् ?

(४) पक्षस्य लक्षणं किम् ?

(५) केवलान्वयी किमस्ति ?

### ५. द्वित्रवाक्यै: उत्तरं लिखत ।

(१) व्याप्यत्वासिद्ध: क: ?

(२) आयोगोलके किं बोध्यम् ?

(३) शब्दे किं प्रसिद्धम् ?

### ६. टिप्पणीं लिखत ।

(१) परार्थानुमानम् ।

(२) हेत्वाभासा: ।

(३) सत्प्रतिपक्ष: ।

### ७. सविस्तरम् उत्तरं लिखत ।

(१) असिद्धं लक्षयत ।

(२) आश्रयासिद्धं विमृशत ।

(३) स्वभिचारं विवृणुत ।

# ८ तर्कसंग्रहे उपमानशब्दप्रमाणनिरूपणम्

## प्रस्तावना

न्यायदर्शने प्रसिद्धेषु चतुर्विधप्रमाणेषु पूर्वं प्रत्यक्षप्रमाणमनुमानप्रमाणं च निरूप्य अस्मिन् पाठे उपमानप्रमाणस्य सविशदं विवेचनं कृतम् । उपमितिकरणमुपमानमित्यादिना उपमानप्रमाणं प्रदर्शितम् । सामान्यतः प्रमेयतत्त्वानां ज्ञानं प्रत्यक्षेण क्रियते, अतीन्द्रियाणां च ज्ञानमनुमानेन, अनुमानादपि यज्ज्ञानं न भवति तस्य ज्ञानम् आगमप्रमाणात् शब्दप्रमाणाद् भवति । अर्थात् अनुमानादपि यस्य सिद्धिर्न भवति तस्य सिद्धिः शब्दप्रमाणाद् सम्भवति ।

## १. उपमानस्य स्वरूपं तेन च उपमित्युत्पत्तिः ।

**मूलम् - उपमितिकरणम् उपमानम् । संज्ञा-संज्ञिसम्बन्धज्ञानमुपमितिः । तत्करणं सादृश्यज्ञानम् । अतिदेशवाक्यार्थ-स्मरणम् अवान्तरव्यापारः । तथाहि - कश्चिद्गवयशब्दवाच्यपदार्थमजानन् कुतश्चिदारण्यकपुरुषात् गोसदृशो गवय इति श्रुत्वा वनं गतो वाक्यार्थं स्मरन्, गोसदृशं पिण्डं पश्यति तदनन्तरम् 'अयं गवयशब्दवाच्य' इति उपमितिरुत्पद्यते ।**

उपमीयते येन तद् उपमानम् । अर्थात् उपमानज्ञानस्य साधनम् । उपमितेः करणम्, अर्थात् उपमितिज्ञाने यद् असाधारणं कारणमस्ति तदेव उपमानम् । संज्ञा अर्थात् पदम्, संज्ञी अर्थात् पदस्य अर्थः, तयोः द्वयोः मध्ये शक्तिरूपः सम्बन्धः । तस्य पदपदार्थसम्बन्धस्य ज्ञानम् उपमितिः । सादृश्यज्ञानं तस्याः उपमितेः करणमस्ति । अतिदेशवाक्यार्थस्मरणम् अवान्तरव्यापारः । एकत्र श्रुतस्य अन्यत्र सम्बन्धः अतिदेशः । अतिदेशवाक्यं नाम सादृश्यज्ञापकं वाक्यम् । गोसदृशो गवय इति तस्यार्थस्य स्मरणम् एव अवान्तरव्यापारः - असाक्षात्क्रिया इत्यर्थः ।

कश्चित् स्वामी सेवकं प्रति कथयति यत् त्वं विष्णुमित्रं आह्वय, तदा सेवको वदति - अहं न कदापि विष्णुमित्रं दृष्टवान् । स्वामी कथितवान् यादृशः देवदत्तः तादृशः एव विष्णुमित्रः अस्ति । तदा सेवकः देवदत्तसदृशं जनं दृष्ट्वा निश्चितवान् अयमेव विष्णुमित्र इति ।

**कीदृग् गवय इत्येवं पृष्टो नागरिकैर्यदा ।**
**वदत्यारण्यको वार्तां यथा गौर्गवयस्तथा ॥**

कोऽपि पुरुषः गवयपदस्यार्थं न जानाति तदा वनवासिपुरुषात् शृणोति यत् गवयः गोसदृशो भवति पश्चात् वनं गत्वा गोसदृशं पिण्डं-शरीरं दृष्ट्वा वाक्यार्थं स्मरति, तदनन्तरं अयं पिण्डः गवयशब्दवाच्यः, अर्थात् अयं गवय इति उपमितिः जायते ।

उपमानम् - सादृश्यज्ञानं करणम् ।

अतिदेशवाक्यार्थस्मरणम् - व्यापारः ।

उपमितिः - फलम्

उपमितेः करणम् उपमानस्य लक्षणम् । उपकरणमेव लक्षणं क्रियते तदा उपकरणं कुठारशय्यादिकमपि भवति तदतिव्याप्तिवारणाय इति पदं प्रदत्तम् । मितेः करणम् उपमानम् इत्येव लक्षणं चेत् मितिपदेन प्रत्यक्षानुमित्यादिकमादाय तत्करणेषु अतिव्याप्तिः । तद्वारणाय उपपदम् ।

संज्ञासंज्ञिसम्बन्धज्ञानम् उपमितेः लक्षणम् । संज्ञासंज्ञिज्ञानं चेत् लक्षणं तदा अनुमित्यादौ अतिव्याप्तिः, तद्वारणाय सम्बन्धपदम् । संज्ञासंज्ञिपदानुपादाने संयोगादिसम्बन्धेषु अतिव्याप्तिः । तद्वारणाय संज्ञासंज्ञीति पदं दत्तम् ।

## २. शब्दप्रमाणस्य स्वरूपम् ।

**मूलम् - आप्तवाक्यं शब्दः - आप्तस्तु यथार्थवक्ता । वाक्यं पदसमूहः । यथा गामानय शुक्लां दण्डेनेति । शक्तं पदम् । अस्मात् पदाद् अयमर्थो बोद्धव्य इतीश्वरसङ्केतः शक्तिः ।**

आप्तोच्चरितत्वे सति वाक्यत्वं शब्दप्रमाणस्य लक्षणम् । आप्तः तत्त्वदर्शी पुरुषः, सत्यवादी, प्रयोगहेतुभूतयथार्थज्ञानीत्यर्थः । आप्तपुरुषकथितोपदेशः शब्दप्रमाणमिति कथ्यते । आप्तपुरुषोक्तं यद् वाक्यं तद् शब्दप्रमाणम् । पदानां समुदायः वाक्यं भवति । यथा - दण्डेन शुक्लां गाम् आनय, अत्र पदानां समूहः तस्मादिदं वाक्यम् । शक्तियुक्तं पदं भवेत् तद् शक्तम् इति कथ्यते । तद् शक्तं पदं न सुबन्तं तिङन्तमेव, शक्तिस्तु अस्मात् पदाद्-घटापदाद् घटरूपः अर्थः जातव्य इति ईश्वरसङ्केतः - ईश्वरस्य इच्छा, सा एव शक्तिः । शक्तिमत्त्वम् - शक्तत्वम् ।

**आप्तोच्चरितत्वे सति वाक्यत्वं शब्दस्य लक्षणम् ।** वाक्यत्वमात्रं लक्षणं क्रियते चेद् अनाप्तोच्चरितवाक्येऽतिव्याप्तिः । तद्वारणाय आप्तोच्चरितत्त्वनिवेशः । आप्तोच्चरितत्त्वमात्रं चेत् जबगडदशादौ अतिव्याप्तिः, तदपि आप्तोच्चरितमस्ति, किन्तु सूत्रं न वाक्यम् । तस्माद् तद्वारणाय वाक्यत्वपदम् । **यथार्थवक्ता नाम** यथार्थज्ञानजनकशब्दप्रयोगकर्ता । शब्दः शब्द्यते ज्ञाप्यते येन अर्थः सः शब्दः ।

## ३. वाक्यार्थज्ञाने हेतवः तत्स्वरूपञ्च

**मूलम् - आकाङ्क्षा योग्यता सन्निधिश्च वाक्यार्थज्ञाने हेतवः । पदस्य पदान्तरव्यतिरेकप्रयुक्ताऽन्वयाऽननुभावकत्वम् आकाङ्क्षा । अर्थाबाधो योग्यता । पदानामविलम्बेनोच्चारणं सन्निधिः । तथा च आकाङ्क्षादिरहितं वाक्यम् अप्रमाणम् । यथा - गौरश्वः पुरुषो हस्तीति न प्रमाणम्, आकाङ्क्षाविरहात् । वह्निना सिञ्चतीति वाक्यं न प्रमाणम्, योग्यताविरहात् । प्रहरेऽप्रहरेऽसहोच्चारितानि गाममानयेत्यादिपदानि न प्रमाणम्, सान्निध्याभावात् ।**

वाक्यार्थज्ञानं शाब्दबोधः । तत्र त्रीणि कारणानि - आकाङ्क्षा, योग्यता सन्निधिश्च ।

यस्मिन् पदे अन्यपदाभावप्रयुक्तं यत् शाब्दबोधजनकत्वम् अस्ति, सा एव आकाङ्क्षा । यथा-गाम् आनय अस्मिन् वाक्ये घटकं यत् गोपदम् अस्ति तस्य शाब्दबोधः 'अम्' पदं विना न सम्भवेत्, अर्थात् अम्पदस्याभावात् वाक्यार्थज्ञानं न भवितुं शक्नोति । अतः द्वयोः पदयोः परस्परम् आकाङ्क्षा वर्तते, तादृशाकाङ्क्षाज्ञानं शाब्दबोधे कारणम् ।

बाधाभावः योग्यता । अर्थस्य अबाधः योग्यता । 'वह्निना सिञ्चेत्' अत्र सेककरणत्वरूपार्थस्य बाधो वर्तते । यतो हि सेककरणत्वं जलस्य धर्मः न वह्नेः, वह्नौ बाधस्य निश्चितत्वात् न तादृशवाक्यात् शाब्दबोधः । सेचनकरणयोग्यता वह्नौ बाधिताऽस्ति ।

पदानाम् अविलम्बेन उच्चारणं सन्निधिः । पदानाम् उच्चारणे सामीप्यं भवेत् तत् सामीप्यमेव सन्निधिः वाक्यार्थज्ञाने हेतुः।

एवञ्च आकाङ्क्षायोग्यतासन्निधिरहितं यद् वाक्यं तद् प्रमाणं न भवेत् । यथा - गौः, अश्वः, पुरुषः, हस्तीति वाक्यं प्रमाणं न सम्भवेत् यतो हि न तस्मिन् आकाङ्क्षा । वह्निना सिञ्चेद् इदमपि वाक्यं न प्रमाणम् । तत्र अग्नौ सेककरणस्य योग्यतायाः अभावात् । तथा च परस्परविलम्बोच्चारितानि (यथा एकप्रहरे गां, तदुत्तरप्रहरे आनय इति) गाम् आनय इत्यादि पदानि न प्रमाणवाक्यम् । सान्निध्यस्य सामीप्यस्य च अभावात् ।

### ४. वाक्यद्वैविध्यम्

**मूलम् - वाक्यं द्विविधम् - वैदिकं लौकिकं च । वैदिकम् ईश्वरोक्तत्वात् सर्वमेव प्रमाणम् । लौकिकं त्वाप्तोक्तं प्रमाणम् । अन्यदप्रमाणम् ।**

वैदिकं वेदवाक्यम् । वेदमूलस्मृत्यादीन्यपि ग्राह्याणि । लौकिकं वेदवाक्यभिन्नं मानवोक्तम् । वेदस्मृतिपुराणादिभिरुक्तं वाक्यम् ईश्वरोक्तं वाक्यम् । तस्मात् सर्ववैदिकवाक्यं प्रमाणम् । मनुष्योक्तं वाक्यं लौकिकं वाक्यम् इति । उच्यते, लौकिकवाक्यम् आप्तपुरुषोच्चारितम् एव प्रमाणं, न अनाप्तमनुष्यप्रोक्तम् । अन्यद् वाक्यम् अप्रमाणम् इत्यर्थः । आप्तत्वं नाम प्रयोगहेतुभूतयथार्थज्ञानवत्त्वम् ।

## स्वाध्यायः

### १. योग्यविकल्पं चित्वा उत्तरं लिखत ।

(१) उपमितेः करणमस्ति ....... ।

(क) सादृश्यज्ञानम् (ख) अवान्तरव्यापारः (ग) सम्बन्धः (घ) अतिदेशः

(२) अतिदेशवाक्यार्थज्ञानम् ।

(क) व्यापारः (ख) करणम् (ग) फलम् (घ) अवान्तरव्यापारः

(३) पदसमूहः ।

(क) शब्दः (ख) वाक्यम् (ग) यथार्थवक्ता (घ) शक्तिः

(४) वाक्यार्थज्ञाने हेतवः कतिविधः ?

(क) त्रिविधः (ख) द्विविधः (ग) चतुर्विधः (घ) एकविधः

(५) वाक्यं कतिविधम् ?

(क) द्विविधम् (ख) त्रिविधम् (ग) चतुर्विधम् (घ) पञ्चविधम्

### २. रिक्तस्थानं पूरयत ।

(१) संज्ञासंज्ञि ______________ ज्ञानम् उपमितिः ।

(२) ______________ वाक्यम् अप्रमाणम् ।

(३) आप्तोच्चरितत्त्वे सति वाक्यत्वं ______________ लक्षणम् ।

(४) पदानाम् अविलम्बेन उच्चारणं ______________ ।

(५) ______________ करणत्वम् उपमानस्य लक्षणम् ।

## ३. युग्मानि योजयत ।

| अ | ब |
|---|---|
| (१) गवयः | (१) द्विविधम् |
| (२) शक्तम् | (२) यत्नः |
| (३) प्रयत्नः | (३) गोसदृशो भवति |
| (४) वाक्यम् | (४) पदम् |
| (५) पदानां समुदायः | (५) अतिदेशवाक्यार्थस्मरणम् |
| | (६) वाक्यं भवति |

## ४. एकवाक्येन उत्तरं लिखत ।

(१) किं नाम उपमानम् ?

(२) 'अवान्तरव्यापारः' नाम किम् ?

(३) 'शक्तिः' नाम का ?

(४) किं नाम आप्तत्वम् ?

(५) वाक्यार्थज्ञाने के हेतवः ?

## ५. द्वित्रवाक्यैः उत्तरं लिखत ।

(१) 'आप्तः' अर्थात् कः ?

(२) योग्यतायाः व्याख्यां लिखत ।

(३) वाक्यस्य द्वैविध्यं लिखत ।

## ६. टिप्पणीं लिखत ।

(१) उपमितेः लक्षणम्

(२) आकाङ्क्षायाः व्याख्यां लिखत ।

(३) सन्निधेः लक्षणम् ।

## ७. सविस्तरम् उत्तरं लिखत ।

(१) शाब्दबोधः कथं जायते ?

(२) 'शब्दः' अर्थात् कः ?

(३) लक्षणस्य लक्षणं लिखत ।

# ९ तर्कसंग्रहे अवशिष्टो भागः

## प्रस्तावना

न्यायवैशेषिकदर्शनयोः प्रकरणग्रन्थः तर्कसंग्रहः श्रीमता अन्नंभट्टेन विरचितः । तर्कसंग्रहस्य अवशिष्टभागरूपेण अस्मिन् पाठे वयं संशयस्य लक्षणम्, विपर्ययः, तर्कः, स्मृतिद्वैविध्यम्, सुखदुःखयोः स्वरूपम्, इच्छादीनां लक्षणानि, अदृष्टस्य स्वरूपम्, आत्ममात्रविशेषगुणान्, सभेदसंस्कारस्वरूपम्, उपसंहारश्च पठामः ।

## १. संशयस्य लक्षणम्

**मूलम् - अयथार्थानुभवस्त्रिविधः । संशयविपर्ययतर्कभेदात् ।** अयथार्थानुभवः मिथ्याज्ञानम् । तस्य भेदाः त्रयः (१) संशयः, (२) विपर्ययः, (३) तर्कश्च ।

**मूलम् - एकस्मिन् धर्मिणि विरुद्धनानाधर्मवैशिष्ट्यावगाहि ज्ञानं संशयः । यथा स्थाणुर्वा, पुरुषो वेति ।**

एकस्मिन् धर्मिणि अर्थात् एकस्मिन् एव पुरोवर्तिनि पदार्थे विरुद्धाः परस्परासमानाधिकरणाः ये नानाधर्माः स्थाणुत्वपुरुषत्वादयस्तेषां वैशिष्ट्यं सम्बन्धः तस्य ज्ञापकं ज्ञानं संशयः ।

यथा कश्चित् शुष्कवृक्षं दूरतो दृष्ट्वा कोऽपि जनः संशयं करोति यत् अयं स्थाणुः वा पुरुषः इति । अत्र एकस्मिन् स्थाणुरूपे विशेष्ये पुरुषत्वपुरुषत्वाभावरूपस्य च विरुद्धधर्मस्य अवगाहनम् । तस्मादिदं संशयात्मकं ज्ञानं प्रथमोऽयथार्थानुभवः ।

## २. विपर्ययः

**मूलम् - मिथ्याज्ञानं विपर्ययः । यथा शुक्ताविदं रजतमिति ।**

विपर्ययोऽर्थात् भ्रमः । शुक्तौ रजतं नास्ति किन्तु कोऽपि द्योतमानां शुक्तिं दृष्ट्वा तां रजतमिति मनुते । तस्मादिदं भ्रमात्मकं ज्ञानं द्वितीयोऽयथार्थानुभवः ।

## ३. तर्कः

**मूलम् - व्याप्यारोपेण व्यापकारोपस्तर्कः । यथा यदि वह्निर्न स्यात्तर्हि धूमोऽपि न स्यादिति ।**

व्याप्यस्य मिथ्याज्ञानेन व्यापकस्य मिथ्याज्ञानकरणमेव तर्कः । यथा यदि अग्निर्न भवेत् तर्हि धूमोऽपि न भवेत् अत्र वह्न्यभावरूपव्याप्यस्य आरोपेण (मिथ्याज्ञानेन) धूमाभावरूपव्यापकस्य आरोपः (मिथ्याज्ञानम्) भवति तस्मादयं तर्कः, इति तृतीयोऽयथार्थानुभवः । पर्वतः यदि वह्न्यभाववान् स्यात् तर्हि धूमाभाववान् स्यात् ।

## ४. स्मृतिद्वैविध्यम्

**मूलम् - स्मृतिरपि द्विविधा । यथार्थाऽयथार्था च । प्रमाजन्या यथार्था । अप्रमाजन्या अयथार्था ।**

या स्मृतिः यथार्थज्ञानजन्या भवति सा यथार्था । या च अयथार्थज्ञानादुत्पन्ना भवति सा अयथार्था । स्मरणम् - स्मृतिः ।

## ५. सुखदुःखयोः स्वरूपम्

**मूलम् - सर्वेषामनुकूलवेदनीयं सुखम् ।** सर्वात्मनाम् अनुकूलम् इति वेद्यं यत् तत् सुखमित्यर्थः । सुखं तदेव यत् सर्वेषां मित्रशत्रूणां प्रियजनकम् ।

**मूलम् - प्रतिकूलवेदनीयं दुखम् ।** दुखं तदेव यत् सर्वेषां मित्रशत्रूणाम् अप्रियजनकम् । सर्वे यं प्रतिकूलम् भावयन्ति तद् दुःखम् ।

## ६. इच्छादीनां लक्षणानि

**मूलम् - इच्छा कामः । क्रोधो द्वेषः । कृतिः प्रयत्नः ।** उद्योग इति पर्यायः । इच्छात्वजातिमत्त्वं इच्छायाः लक्षणम् । सा इच्छा द्विविधा - फलेच्छा उपायेच्छा च । फलं सुखादिकम् । उपायो यागादिः । सुखादिस्वरूपफलस्य इच्छा सा फलेच्छा कथ्यते । सुखादिप्राप्तेः उपायः यागादिः, तस्य उपायस्य इच्छा उपायेच्छा कथ्यते ।

द्वेष्टीत्यनुभवसिद्धद्वेषत्वजातिमत्त्वं द्वेषस्य लक्षणम् । 'असौ द्वेष्टि' 'असौ द्वेष्टि' इत्यनुभवः । इदं मम द्विष्टसाधनम् इति दुःखसाधनताज्ञानेन एव दुःखसाधनस्योपरि द्वेषो भवति । प्रयत्नत्वजातिमत्त्वं प्रयत्नस्य लक्षणम् । प्रयत्नः त्रिविधः प्रवृत्तिनिवृत्तिजीवनयोनिभेदात् ।

१. इच्छाजन्यो गुणः प्रवृत्तिः । २. द्वेषजन्यो गुणः निवृत्तिः । ३. जीवनादृष्टजन्यो गुणो जीवनयोनिः । स च शरीरे प्राणवायुसंचारकारणम् ।

### ७. अदृष्टस्य स्वरूपम्

अदृष्टं धर्माधर्मौ ।

**मूलम् - विहितकर्मजन्यो धर्मः ।** विहितेति वेदविहितम् ।

**मूलम् - निषिद्धकर्मजन्यस्त्वधर्मः ।** निषिद्धेति वेदनिषिद्धेत्यर्थः ।

कर्मनारानद्याः जलस्पर्शेन, कृतस्य धर्मस्यासकृत्कीर्तनेन धर्मजन्यफलभोगेन तत्त्वज्ञानेन च धर्मो नश्यति । अधर्मजन्यफलभोगेन अथवा प्रायश्चित्तादिना अधर्मो नश्यति । एतौ एव अदृष्टाविति कथ्येते वासनाजन्यौ च ।

### ८. आत्ममात्रविशेषगुणाः

**मूलम् - बुध्यादयोऽष्टावात्ममात्र विशेष गुणाः ।**

बुद्धि-सुख-दुःखेच्छाद्वेषप्रयत्नधर्माधर्मा एते अष्टविशेषगुणाः आत्मनि तिष्ठन्ति । तेषु बुद्धीच्छाप्रयत्नाः नित्या अनित्याश्च परमात्मनः ते गुणाः नित्याः । जीवात्मनः अनित्याः । शेषपञ्चगुणाः जीवात्मनि तिष्ठन्ति, तस्मादनित्याः ।

### ९. सभेदसंस्कारस्वरूपम्

**मूलम् - संस्कारस्त्रिविधः वेगो भावना स्थितिस्थापकश्चेति ।**

**१. वेगः पृथिव्यादिचतुष्टयमनोवृत्तिः ।**

**२. अनुभवजन्या स्मृतिहेतुर्भावनात्ममात्रवृत्तिः ।**

**३. अन्यथाकृतस्य पुनस्तदवस्थापादकः स्थितिस्थापकः । कटादिपृथिवीवृत्तिः ।**

सामान्यविशेषगुणोभयवृत्तिगुणत्वव्याप्यजातिमान् संस्कारः ।

१. वेगस्वरूपः संस्कारः, पृथिव्यप्तेजोवायुमनोवृत्तिः । एतेषु मूर्तद्रव्येषु वेगो वर्तते । द्वितीयादिपतनासमवायिकारणं वेगः ।

२. अनुभवजन्यत्वे सति स्मृतिहेतुत्वं भावनायाः लक्षणम् । भावनात्मकसंस्कारः अनुभवात् उत्पद्यते, स्मरणस्य च हेतुः आत्ममात्रवृत्तिश्च ।

३. पृथिवीमात्रसमवेतसंस्कारत्वव्याप्यजातिमत्वं स्थितिस्थापकत्वम् ।

गन्धत्वमादाय गन्धेऽतिव्याप्तिवारणाय संस्कारत्वव्याप्यत्वपदम् । भावनात्वमादाय भावनावारणाय पृथिवीसमवेतत्वम् । अन्यथाकृतः आकुञ्चितः कटः न कार्योपयोगी । स एव विस्तृतः यथाकृतः स्वावस्थापन्नः कार्योपयोगी ।

मूलम् - **चलनात्मकं कर्म ।**

**उर्द्ध्वदेशसंयोगहेतुरुत्क्षेपणम् ।**

**अधोदेशसंयोगहेतुरपक्षेपणम् ।**

**शरीरस्य सन्निकृष्ट संयोगहेतुराकुञ्चनम्**

**विप्रकृष्टसंयोगहेतुः प्रसारणम् ।**

**अन्यत्सर्वं गमनम् ।**

सामान्यम् - **नित्यमेकमनेकानुगतं सामान्यम् । द्रव्यगुणकर्मवृत्ति । तद् द्विविधं-परापरभेदात् । परं सत्ता । अपरं द्रव्यत्वादि ।**

विशेषाः – नित्यद्रव्यवृत्तयो व्यावर्तका विशेषाः ।

**समवायः – नित्यसम्बन्धः समवायः । अयुतसिद्धिः । ययोद्वयोर्मध्ये एकमविनश्यदपराश्रितमेवाव तिष्ठते तावयुतसिद्धौ, यथा – अवयवावयविनै, गुणगुणिनौ, क्रियाक्रियावन्तौ, जातिव्यक्ती, विशेषनित्यद्रव्य येति ।**

**अभावः – अनादिः सान्तः प्रागभावः । उत्पत्तेः पूर्वं कार्यस्य । सादिरनन्तः प्रध्वंशः । उत्पत्यनन्तरं कार्यस्य । त्रैकालिकसंसर्गावटिछन्नप्रतियोगिताकोऽप्यन्ताभावः । तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिता-कोऽन्योन्याभावः ।**

**सर्वेषां पदार्थानां यथायथमुक्तेष्वनन्तर्भावात्सप्तैव पदार्था इति सिद्धम् ।**

विभिन्ने परमाणुद्वये ऽदृष्टवशात् क्रिया जायते, तया व्द्यणुकस्य द्रव्यस्य कारणीभूतः परमाणुद्वयसंयोगो भवति, तस्याऽसमवायिकारणं सा क्रियैवेति भावः । नित्यमेकम् अनेकानुगतं सामान्यम् । विशेषः स्वतन्त्रः पदार्थ इति वैशेषिका मन्वते । **नित्यसम्बन्धः समवाय** इति ।

अभावो नाम अस्मत्कृते प्रतीयमानेभ्यः द्रव्यादिषट् पदार्थेभ्यो भावेभ्यो भिन्नः कश्चन पदार्थ इति नैयायिकाः । स तु न स्वतन्त्रः पदार्थः । अपि तु भावपरतन्त्रो भावज्ञानपरतन्त्रो वा । भावपदार्थानां स्वरूपेणैव अभावस्य स्वरूपं नियमितं भवति । न तु स्वत इति भावः । यतः घटाभावः, पटाभावः, इत्येव अभावस्य प्रतीतिविषयत्वम् अस्ति ।

## ११. उपसंहारः

मोक्षम्प्रति पदार्थज्ञानस्योपयोगितां स्पष्टयति – "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः ।" इत्यादिश्रुत्या आत्मज्ञानस्य साधनं निदिध्यासनं प्रोक्तम् । निदिध्यासनस्य साधनं मननंप्रोक्तम् । तस्मिन् च मनने साधनं पदार्थज्ञानम् । अनया रीत्या आत्मज्ञाने पदार्थज्ञानं परम्परया साधनम् । एवं च तत्त्वज्ञाने सति शरीरपुत्रादौ आत्मत्वस्वीयत्वाभिमानरूपमिथ्याज्ञानस्य नाशः । तेन रागादिदोषाभावः । तेन प्रवृत्त्यनुत्पत्तिः । ततस्तत्कालीनशरीरेण कायव्यूहेन वा भोगतत्त्वज्ञानाभ्यां प्रारब्धकर्मणां नाशः । ततो जन्माभावः ।

**नित्यनैमित्तिकैरेव कुर्वाणो दुरितक्षयम् ।**
**ज्ञानं च विमलीकुर्वन् अभ्यासेन च पाचयेत् ॥**
**अभ्यासात् पक्वविज्ञानः कैवल्यं लभते नरः ।**

इत्यादिवचनात् '**तमेव विदित्वाऽतिमृत्युमेति**' इति श्रुतेश्च, सगुणोपासनकाशीमरणादेरपि तत्त्वज्ञानद्वारा मुक्तिहेतुत्त्वम् । अत एव परमेश्वरः काश्यां तारकमुपदिशति इति सारम् ।

**काणादन्यायमतयोः बालव्युत्पत्तिसिद्धये ।**
**अन्नंभट्टेन विदुषा रचितस्तर्कसंग्रहः ॥**

### स्वाध्यायः

### १. योग्यविकल्पं चित्वा उत्तरं लिखत ।

(१) अयथार्थानुभवः कति विधः ?

(क) त्रिविधः (ख) द्विविधः (ग) चतुर्विधः (घ) एकविधः

(२) मिथ्याज्ञानम् इति

(क) संशयः (ख) विपर्ययः (ग) तर्कः (घ) स्मृतिः

(३) विपर्ययोऽर्थात्

(क) संशयः (ख) तर्कः (ग) भ्रमः (घ) शक्तिः

(४) इच्छाजन्यो गुणः

(क) प्रयत्नः (ख) प्रवृत्तिः (ग) निवृत्तिः (घ) जीवनयोनिः

(५) प्रयत्नः कति विधः ?

(क) त्रिविधः (ख) द्विविधः (ग) चतुर्विधः (घ) एकविधः

## २. रिक्तस्थानं पूरयत ।

(१) सर्वेषां ______________ वेदनीयं सुखम् ।

(२) व्याप्यस्य मिथ्याज्ञानेन व्यापकस्य मिथ्याज्ञानकरणमेव ______________ ।

(३) प्रमाजन्या स्मृतिः ______________ ।

(४) सर्वेषां ______________ वेदनीयं दुखम् ।

(५) ______________ पृथिव्यादिचतुष्टयमनोवृत्तिः ।

## ३. युग्मानि योजयत ।

| अ | ब |
|---|---|
| (१) ईच्छाजन्यो गुणः | (१) त्रिविधः |
| (२) संस्कारः | (२) प्रयत्नः |
| (३) विहितकर्मजन्यः | (३) प्रवृत्तिः |
| (४) द्वेषजन्यो गुणः | (४) जीवनयोनिः |
| (५) कृतिः | (५) धर्मः |
| | (६) निवृत्तिः |

## ४. एकवाक्येन उत्तरं लिखत ।

(१) संशयस्य किं लक्षणम् ?

(२) विपर्ययस्य अपरं नाम किम् ?

(३) सुखदुःखयोः स्वरूपं किम् ?

(४) धर्मस्य लक्षणं किम् ?

(५) संस्कारः कति विधः ?

## ५. द्वित्रवाक्यैः उत्तरं लिखत ।

(१) मिथ्याज्ञानस्य कति भेदाः ?

(२) अयथार्थानुभवस्य भेदान् लिखत ।

(३) विपर्ययस्य स्वरूपं वर्णयत ।

## ६. टिप्पणीं लिखत ।

(१) तर्कस्य लक्षणम्

(२) इच्छादीनां लक्षणानि लिखत ।

(३) अदृष्टस्य स्वरूपं वर्णयत ।

## ७. सविस्तरम् उत्तरं लिखत ।

(१) स्मृतिवैविध्यं लिखत ।

(२) इच्छादीनां लक्षणानि दर्शयत ।

(३) आत्मविशेषस्य लक्षणं लिखत ।

## पदार्थाः

### द्रव्यम्

**( द्रव्यत्वजातिमत्वम् ) ( समवायिकारणत्वम् )**

- पृथिवी (गन्धवती)
  - नित्या (परमाणुरूपाः)
  - अनित्या (कार्यरूपाः)
    - शरीरम् (अस्मादादीनाम्)
    - इन्द्रियम् (ग्रन्थग्राहकम्)
    - विषयः (मृतपाषिदिः)
- आपः (शीतस्पर्शवत्यः)
  - नित्याः (परमाणुरूपाः)
  - अनित्याः (कार्यरूपाः)
    - शरीरम् (वरुणलोके)
    - इन्द्रियम् (रसनाग्राहकम्)
    - विषयः (सरित्समुद्रादिः)
- तेज (उष्णस्पर्शवत्)
  - नित्या (परमाणुरूपाः)
  - अनित्या (कार्यरूपाः)
    - शरीरम् (आदित्यलोके)
    - इन्द्रियम् (रूपग्राहकम्)
    - विषयः
      - भोम् (ब्रह्मादि)
      - दिव्यम् (विद्युदादि)
      - उदर्यम् (उदरस्योऽग्निहेतुः)
      - आज्ञकम् (सुवर्णादि)
- वायः (रूपरहितस्पर्शवशात्)
  - नित्या (परमाणुरूपाः)
  - अनित्या (कार्यरूपाः)
    - शरीरम् (वायुलोके)
    - इन्द्रियम् (स्पर्शग्राहकम्)
    - विषयः (वृक्षादिकम्पनहेतुः)
- आकाशम् (शब्दगुणकम्)
  - (एकः विभुः, नित्यं च)
- कालः (अतीतादिव्यवहारहेतुः)
  - (एकः विभुः, नित्यं च)
- दिक् (प्राच्यादिव्यवहारहेतुः) (एका नित्या विम्भी च)
- आत्मा (ज्ञानाधिकरणम्)
  - जीवात्मा (अनन्तः, विभुः, नित्यः)
  - परमात्मा (ईश्वरः, सर्वशः, एकः)
- मनः (सुखाद्युपलब्धिः साधनमिन्द्रियम्)
  - अनन्तं परमाणुरूपम् नित्यम्

### गुणः

**( द्रव्यकर्मभिन्नत्वे सति सामान्यवान् गुणः )**

- रूपम (चक्षुर्मात्रग्राह्यो गुणः)
  - शुक्लम् → चित्रम्
    - भास्वरशुक्लम् (तेजांसि)
    - अभास्यशुक्लम् (जलम्)
  - नीलम्
  - पीतम्
  - रक्तम्
  - हरितम्
  - कपिशम्
- रसः (रसनाग्रहो गुणः)
  - मधुर
  - अमलः
  - लवणः
  - कटुः
  - कषायः
  - तिलः
- ग्रन्थः (घ्राणग्राह्यो गुणः)
- स्पर्शः (त्योगेन्द्रियमाग्रह्यो गुणः)
- संख्या (एकत्वादिव्यवहारेहेतुः)
  - एकवम्
    - नित्यम्
    - अनित्यम्
  - द्वित्वादिपरार्धपर्यन्ता अनित्यम्
- परिमाणम् (मानवव्यवहारासाधारण कारणम्)
  - अणु
  - महत्
  - दीर्घम्
  - ह्रस्वम्
- पृथकत्वम् पृथकव्यवहाराः साधारण कारणत्वम्
- संयोगः (संयुक्त व्यवहार हेतु)
- विभागः (संयोगनाशको गुणः)
- परत्वम् (परव्यवहार साधारण कारणम्)
  - दूरस्थम् दिक्कृतम् पृथिव्यादिचतुष्यमोवृत्रिनी
  - ज्येष्ठम् कालकृतम्
- अपरत्वम् (अपरव्यवहार साधारण कारणम्)
  - समीपस्थे दिक्कृतम् पृथिव्यादिचतुष्टय-मनोवृत्तिनी कनिष्ठे कालकृतम्

## गुणाः

- गुरुत्वम् (आद्यंतना समवायिकारणम्)
- द्रव्यत्वम् (आद्यष्पंदना समवायिकारणम्)
  - सांसिद्धिकम् (जलम्)
  - नैमितिकम् (पृथिवीतेजसोः)
- स्नेह (चतुर्णादिपिण्डी भावहेतुर्गुणः)
- शब्दः (श्रोत्रग्राह्यो गुणः)
  - ध्वन्यात्मकः (भेर्यादौ)
  - वर्णात्मकः
- बुद्धिः (सर्वव्यवहारहेतुर्गुणः)
  - स्मृतिः (संस्कारमानजन्यं ज्ञानं स्मृतिः)
    - यथार्था अयथार्था
  - अनुभवः (स्मृतिभित्रं अनुभवः)
    - यथार्थः
    - अयथार्थः
- सुखम् (अनुकूल वेदनीयम्)
- दुखम् (प्रतिकूल वेदनीयम्)
- इच्छा (कामः)
- द्वेषः (क्रोधः)
- प्रयत्नः (कृतिः)
- धर्मः (विहीतकर्मजन्यः)
- अधर्मः (निषिद्धकर्मजन्यः)
- संस्कारः
  - वेगः (पृथिव्यादिषट्ध्यमनोवृद्धिः
  - भावना आत्ममात्रवृत्तिः
  - संस्कारः (षटादिपृथिवीवृत्तिः)

**कर्म**

**( चलनात्मकम्**

- उत्क्षेपणम् (ऊर्ध्वदेशसंयोगहेतुः)
- अपक्षेपणम् (अधोदेशसंयोगहेतुः)
- आंकुञ्चनम् (शरीरस्य संयोगहेतुः)
- प्रसारणम् (विप्रकृष्ट देशसंयोगहेतुः)
- गमनम् (अन्यत्सर्वम्

**सामान्यम्**

**( नित्यमेकमनेकरानुगतम् )**

- परम् (अधिकदेशवृत्तित्वम्)
- अपरम् (न्यूनदेशवृत्तित्वम्)

**विशेषः**

**( नित्यद्रव्यवृत्तयो त्यावर्तकरा-विशेषाः )**

**समवायः**

**( नित्यसंबन्धः )**

**अभावः**

**( नम्पदजन्यः )**

- प्रागभावः (अनादिसान्तः)
- प्रध्वंसाभावः (सादिरनतः)
- अत्यन्ताभावः (त्राकालिकसंसर्गावच्छित्र प्रतियोगिताकः)
- अन्योन्याभावः (तादात्म्यसम्बन्धा-वच्छित्रप्रतियोगिताकः)

# वेदान्तदर्शनम्

## १० वेदान्तपरिचयः

### प्रस्तावना

सनातनधर्मानुयायिनां श्रद्धालूनाम् अस्माकं ज्ञानप्राप्तिरेव चरमं लक्ष्यम् । न केवलम् अस्माकमेव अपि तु पाश्चात्यविद्वांसः अपि आजीवनं जीवनस्य सारम् एव शोधयन्ति । यतो हि ज्ञानेनैव सुखं प्राप्यते, धनेन पदार्थेन वा यत्सुखमनुभूयते तत्तु केवलं सामयिकम् ।

लोके हि सर्वेऽपि मनुष्याः प्रायः '**सुखमेव मे स्यात् न दुःखं मनागपि**' इति चिन्तयन्ति । तथापि सुखप्राप्तये किमपि न कुर्वन्ति । शाश्वतसुखस्य मार्गदर्शकाः सन्ति वेदाः । वेदवेदान्तादिषु निहितं ज्ञानं सम्प्राप्यैव शाश्वतं सुखं प्राप्यते । एतादृशानां सुखप्रदायकवेद-वेदान्तादि शास्त्राणाम् किञ्चिद् परिचयं पाठेऽस्मिन् प्राप्नुमः ।

---

### वेदपरिचयः

भारतभूमेः मृत्तिका शिरसा वन्द्या, यतो हि अस्यां भूमौ संस्काररूपं बीजं वपितवन्तः अस्मद्-पूर्वजाः ऋषयश्च । भाग्यवन्तो वयं यद् भारतभूमौ जन्म लब्धवन्तः । ज्ञानपरम्परायाः संस्कारपरम्परायाः जीवनमूल्यानाञ्च वाहकाः वयम् । ज्ञानस्य, संस्कारस्य, जीवनमूल्यस्य च बीजमस्ति वेदः । सम्पूर्णोऽपि वेदः भारतस्य वास्तविकं परिचयं ददाति । '**वेदोऽखिलो धर्ममूलम्**' सनातनधर्मस्य आधारः वेद एव । विद् ज्ञाने इत्यस्मात् धातोः निष्पन्नोऽयं वेदशब्दः ज्ञानपर्यायः वर्तते ।

**वेदः = ज्ञानम्**

वेदः अर्थात् ज्ञानालयः । यत्र च सनातनज्ञानं निहितम् । एतादृशस्य वेदस्य उत्पत्तिविषयेऽपि अस्माभिः ज्ञातव्यम् । वस्तुतः '**अनन्ता वै वेदाः**' इत्युक्तरीत्या वेदस्य आनन्त्यम् अनादित्वं च सिध्यति । अत एव वेदाः अपौरुषेया इत्येव वैदिकाः भणन्ति । अपौरुषेयाणां वेदानाम् उत्पत्तिः कस्मात् अभवत् ? इत्यस्याः जिज्ञासायाः समाधानं ददाति बृहदारण्यकोपनिषद् ।

**अस्य महतो भूतस्य निश्श्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरसः ।** (बृ.उ.२-४-१०)

स्वयं श्रुतिरेव स्वोत्पत्तिविषये वदति यत् परब्रह्मपुरुषोत्तमस्य निश्वासेन चतुर्णां वेदानाम् उत्पत्तिः समभवत् । एतादृशः वेदः पूर्वम् एक एव आसीत् । परन्तु भगवता वेदव्यासेन विषयदृष्ट्या चत्वारः विभागाः कृताः । तमेव विभागं वयं ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्ववेद इति जानीमः । किमर्थं भगवता वेदव्यासेन वेदस्य चत्वारः विभागाः कृताः ? इत्यस्य प्रमाणं प्राप्यते श्रीमद्भागवते -

**ततः सप्तदशे जातः सत्यवत्यां पराशरात् ।**
**चक्रे वेदतरोः शाखां दृष्ट्वा पुंसोऽल्पमेधसः ॥**

कलौ अल्पमेधसः जनान् सन्मार्गे नेतुं वेदस्य विभाजनम् अकरोत् । चत्वारोऽपि वेदाः स्वीयं मौलिकं स्थानं भजन्ते । ऋग्वेदः- स्तवनपरकः, यजुर्वेदः- यजनपरकः, सामवेदः- गानपरकः, अथर्ववेदः- विज्ञानपरकश्च । चतुर्णामपि वेदानाम् उपदेशोऽपि भगवता व्यासेन स्वयोग्येभ्यः शिष्येभ्यः प्रदत्तः ।

**तत्रर्ग्वेदधरो पैलः सामगो जैमिनिः कविः ।**
**वैशम्पायन एवैको निष्णातो यजुषामुत ॥**
**अथर्वाङ्गिरसामासीत् सुमन्तुर्दारुणो मुनिः ॥**
(श्रीमद्भागवत-१-४-२०, २१)

**वेदः**

(अपौरुषेयः)

| ऋग्वेदः | यजुर्वेदः | सामवेदः | अथर्ववेदः |
|---|---|---|---|
| (स्तवनपरकः) | (यजनपरकः) | (गानपरकः) | (विज्ञानपरकः) |
| ↓ | ↓ | ↓ | ↓ |
| पैलः | वैशम्पायनः | जैमिनिः | सुमन्तुः |

इत्येवं रूपेण चतुर्णामपि वेदानां शिष्यप्रशिष्यपरम्पराभिः शाखाप्रशाखारूपेण विभागाः जाताः । अस्माभिः आर्यैः न्यूनातिन्यूनं चतुर्षु अन्यतमस्य वेदस्य अध्ययनं कर्तव्यमेव । स्वयं महर्षिः पतञ्जलिः स्व-महाभाष्ये लिखति यत्-

**ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च, मातापितरौ चास्य स्वर्गे लोके महीयेते ।**

मनुस्मृतावपि वेदाध्ययनस्य फलमाह मनुमहाराजः यथा-

**वेदशास्त्रार्थतत्त्वज्ञो यत्रतत्राश्रमे वसन् ।**
**इहैव लोके तिष्ठन् स ब्रह्मभूयाय कल्पते ॥** (मनुस्मृतिः-१२-१०२)

अतः वेदाध्ययनम् अस्माकं लक्ष्यमेव न, अपि तु कर्तव्यमिति मत्वैव समैः सनातनधर्मानुयायिभिः जीवनं निर्वर्तनीयम् ।

## वेदान्तः (उपनिषद्)

ऋग्यजुस्सामाथर्वनाम्ना चतुर्धा विभक्तः वेदः पुनः प्रतिपाद्यविषयभेदात् चतुर्धा विभज्यते । संहिता, ब्राह्मणम्, आरण्यकम्, उपनिषच्च । प्रत्येकं वेदः एभिः विभागैः विभक्तः ।

न केवलं एकेन भागेन वेदः सम्पूर्णो भवति । यदा चतुर्णां भागानां समाहारो भवति तदानीं वेदः परिपूर्णः सम्भवति ।

**वेदः**

| ऋग्वेदः | यजुर्वेदः | सामवेदः | अथर्ववेदः |
|---|---|---|---|

**४ विभागाः**

| संहिता | ब्राह्मणम् | आरण्यकम् | उपनिषद् |
|---|---|---|---|

एतादृशस्य वेदस्य अन्तिमः भागः वर्तते उपनिषद्भागः । वेदस्य अन्तिमभागत्वात् उपनिषद्भागं वेदान्त इति नाम्ना अपि जानीमः । अर्थात् उपनिषद् इत्युक्ते वेदान्त एव ।

## उपनिषद् = वेदान्तः

वेदस्य आदिमभागद्वये कर्मकाण्डस्य निरूपणम्, तृतीये आरण्यकभागे उपासनायाः निरूपणम् तथा च अन्तिमभागे ज्ञानस्य निरूपणं दृश्यते । विश्वस्य यथार्थज्ञानमवाप्तव्यं चेत् प्रस्थानत्रयम् अनिवार्यरूपेण अध्येयमिति श्रीमच्छङ्कररामानुजवल्लभमध्वनिम्बार्काद्याः आचार्याः उपदिष्टवन्तः । भारतीयानां सनातनधर्मानुयायिनां प्रस्थानत्रयमेव परमं प्रमाणम् । श्रुतिप्रस्थानम्, न्यायप्रस्थानम्, स्मृतिप्रस्थानञ्चेति प्रस्थानत्रयं प्रसिद्धम् । उपनिषदः श्रुतिप्रस्थानम्, ब्रह्मसूत्रं न्यायप्रस्थानम् (तर्कप्रस्थानम्), भगवद्गीता स्मृतिप्रस्थानञ्चास्ति ।

**प्रस्थानत्रयम्**

↓ ↓ ↓

श्रुतिप्रस्थानम् → उपनिषद्

न्यायप्रस्थानम् → ब्रह्मसूत्रम्

स्मृतिप्रस्थानम् → श्रीमद्भगवद्गीता

↓

**( विषयः )**

↓

**मानवजीवनस्य साफल्यम्**

वेदस्य अन्तिमभागत्वात् उपनिषदः वेदसारभूताः । तस्मादेव उपनिषदां प्राथम्यं प्रस्थानत्रये वर्तते । एवं गीता या भगवदुपदिष्टत्वेन भगवद्गीता इत्याख्याता, सापि उपनिषद्रहस्यगर्भिता । अत एव उपनिषदां महत्त्वमत्यधिकमस्ति अस्माकं संस्कृतौ ।

उपनिषन्नाम ब्रह्मविद्या । गुरुकुले गुरोः समीपे उपविश्य अभ्यस्यमाना विद्या, सैषा विद्या गुरुमुखेनैव सम्प्राप्या । परब्रह्मावबोधकरहस्यविद्या एव उपनिषद् उच्यते । उपचारात् ग्रन्थोऽयम् उपनिषद् शब्देन उच्यते । उप, नि इत्युपसर्गद्वयपूर्वकात् षद्लृ इति धातोः विशरणगत्यवसादनेषु क्विपि रूपमिदं निष्पन्नम् उपनिषद् इति । संसारे असारताम् अवगम्य भगवद्गतिप्राप्तये एतासाम् उपनिषदाम् अध्ययनं कर्तव्यम् ।

**'यं वाकेष्वनुवाकेषु निषत्सु उपनिषत्सु च'** इति भारतवचनात् देवताप्रतिपादको भागः निषत् इत्युच्यते । तस्य उप समीपं नयनात् उपनिषत्त्वम् । साररूपेण वदामश्चेत् वैराग्यपुरस्सरं संसारविनाशिनी भगवत्प्रतिपादिका गुरूपदिष्टा गुरोरुपान्ते उपविश्य श्रुता परब्रह्मविद्या उपनिषच्छब्दवाच्या ।

### उपनिषत्सङ्ख्या–

वेदानाम् अनन्तत्वात् उपनिषदामपि आनन्त्यम् इत्येतत्सर्वसम्मतम् । तथापि मुख्यतया काश्चन उपनिषदः परिगणिताः अष्टोत्तरशतमिति । मुक्तिकोपनिषदि विषयस्यास्य सङ्ग्रहः दृश्यते । तद्यथा –

**माण्डूक्यमेकमेवालं मुमुक्षूणां विमुक्तये ।**
**तथाप्यसिद्धं चेत् ज्ञानं दशोपनिषदं पठ ॥**
**तथापि दृढता नो चेत् विज्ञानस्याञ्जनासुत ।**
**द्वात्रिंशाख्योपनिषदं समभ्यस्य निवर्तय ॥**
**विदेहमुक्ताविच्छा चेदष्टोत्तरशतं पठ ॥** (मुक्तिकोपनिषद् – १-२६)

अनेन च ज्ञायते यत् अष्टोत्तरशतोपनिषत्सु प्रधाना तावत् माण्डूक्योपनिषद् । तदध्ययनेन ज्ञानं न भवति चेत् दशोपनिषदां अध्ययनम् आवश्यकम् । तेनापि स्पष्टता न भवति चेद् द्वात्रिंशदुपनिषदाम् अध्ययनं कार्यम् । तदग्रे विदेहमुक्तिम् ईप्सितवताम् अष्टोत्तरशतम् अध्येयमित्यादेशः । प्रसिद्धासु एतासु उपनिषत्सु सर्वैः पाठ्यमानाः दशोपनिषदः अपि अत्र सङ्गृहीताः ।

**ईश-केन-कठ-प्रश्न-मुण्ड, माण्डूक्य-तित्तिरिः ।**
**ऐतरेयं च छान्दोग्यं बृहदारण्यकं तथा ॥**
(मुक्तिकोपनिषद् – १-३०)

दशोपनिषदः अपि चतुर्षु वेदेषु अन्तर्भवन्ति । तद्यथा–

**वेदाः**

- ऋग्वेदः → एतरेयोपनिषद्
- यजुर्वेदः
  - शुक्लयजुर्वेदः → ईशावास्योपनिषद्, बृहदारण्यकोपनिषद्
  - कृष्णयजुर्वेदः → कठोपनिषद्, तैत्तिरियोपनिषद्
- सामवेदः → केनोपनिषद्, छान्दोग्योपनिषद्
- अथर्ववेदः → प्रश्नोपनिषद्, मुण्डकोपनिषद्, माण्डूक्योपनिषद्

इत्येवं दशोपनिषदाम् अध्ययनेन चतुर्णामपि वेदानां सारः अधीतः भवति । अत एव दशोपनिषदां स्थानम् अत्यधिकमहत्वपूर्णमस्ति ।

### उपनिषदां बोधनरीतिः –

विषयमेकं निरूपयितुं नैके प्रकाराः भवन्ति । ते सर्वेऽपि प्रकाराः उपनिषत्सु दृश्यन्ते । परन्तु प्रायः, त्रयः प्रकाराः एव अधिकाधिकरूपेण एतासु उपनिषत्सु द्रष्टुं शक्नुमः ।

१. साक्षादुपदेशः ।

२. प्रश्नोत्तरोपदेशः ।

३. आख्यायिकोपदेशः ।

### साक्षादुपदेशः

यत्र च अन्यं कमपि अनपेक्ष्य साक्षात् विषयोपस्थापनं भवति । यथा ईशावास्योपनिषदि–

**'ईशावास्यमिदं सर्वम् यत्किञ्च जगत्यां जगत्'** इत्यादिषु साक्षात् एव यदुपदेष्टव्यं तदुपदिष्टम् ।

### प्रश्नोत्तरक्रमः

यत्र गुरुशिष्ययोः संवादमाध्यमः भवति । शिष्याः जिज्ञासया प्रश्नान् पृच्छन्ति गुरुः उत्तरमाध्यमेन मानवजीवनस्य रहस्यम् उपदिशति । यथा प्रश्नोपनिषदि षड् ऋषिकुमाराः गुरुं पिप्पलादं प्रति प्रश्नान् अपृच्छन्, समाधानमपि प्राप्नुवन् ।

### आख्यायिका

तृतीयः उपदेशप्रकारः वर्तते कथामाध्यमः । यत्र एकया आख्यायिकया रहस्यं ज्ञापयितुं कश्चन यत्नः क्रियते । यथा केनोपनिषदि देवासुरसंग्राममाध्यमेन परब्रह्मणः अपरिमितसामर्थ्यं निरूपितम् । तथा छान्दोग्ये बृहदारण्यके च नैकाः कथाः आख्यायिकाः च निरूपिताः, याभिः परमतत्त्वं सुगमतया अवगन्तुं शक्यते ।

### उपनिषदां प्रभावः

समस्ते च विश्वे क्रान्तिकारिणः, पारम्परिकाः, देशोद्धारकाः, राष्ट्रभक्ताः, सन्यासिनः, साधवः, महापुरुषाः च दृश्यन्ते । ते सर्वेऽपि उपनिषद्भिः प्रभाविताः । समर्थरामदासः, स्वामिविवेकानन्दः, बालगङ्गाधरतिलकः, श्रीराधाकृष्णन्, गान्धिजी प्रभृतयः उपनिषद्भिः प्रभाविताः । न केवलं भारतीया अपि तु पाश्चात्याः मेक्षस् मुलर्, मैक्डोनाल् प्रभृतयोऽपि प्रभाविताः सन्तः उपनिषदां व्याख्यानानि चक्रुः ।

उपनिषदां प्रभावः लौकिकसाहित्येऽपि दरीदृश्यते । **'न हि ज्ञानेन सदृशम्', 'विद्यया विन्दतेऽमृतम्', 'परोरजसेऽसावदोम्', 'ज्ञानेनैकेऽमृतत्त्वमानशुः', 'सत्यमेव जयते'** इत्यादीनि उपनिषद्वाक्यानि महद्भिः उद्धृतानि दृश्यन्ते । एतादृशः ज्ञानवैभवः अस्माभिः सम्प्राप्तः कोटिजन्मपुण्यप्रभावादेव । तादृशी ज्ञानपरम्परा सहजतया लब्धा, अतः आत्मानं प्रति पूज्यभावः समुदेति । तथा च मनः वक्तुम् इच्छति यत् –

अहो ! अहम्, नमो मह्यम् ।
अहो ! अहम्, नमो मह्यम् ।
अहो ! अहम्, नमो मह्यम् ।

## स्वाध्यायः

### १. योग्यविकल्पं चित्त्वा उत्तरं लिखत ।

(१) वेदशब्दस्य कोऽर्थः ?
(क) निधिः (ख) विधिः (ग) ज्ञानम् (घ) अज्ञानम्

(२) वेदस्य विभाजकः कः ?
(क) पैलः (ख) जैमिनिः (ग) सुमन्तुः (घ) व्यासः

(३) सामवेदस्य प्रतिपाद्यविषयः कः ?
(क) स्तवनम् (ख) यजनम् (ग) गानम् (घ) विज्ञानम्

(४) उपनिषद् वेदस्य कतमं स्थानम् ?
(क) आदिमं (ख) मध्यमं (ग) अन्तिमं (घ) एतेषु किमपि न

(५) श्रुतिप्रस्थानम् किम् ?
(क) उपनिषद् (ख) गीता (ग) ब्रह्मसूत्रम् (घ) पुराणम्

(६) ऋग्वेदस्य कः ऋषिः ?
(क) पैलः (ख) जैमिनिः (ग) सुमन्तुः (घ) व्यासः

(७) आख्यायिका नाम किम् ?
(क) कथा (ख) संवादः (ग) उपदेशः (घ) आत्मा

## २. रिक्तस्थानं पूरयत ।

(१) अस्य महतो ______________ अथर्वाङ्गिरसः ।

(२) ब्राह्मणेन ______________ ज्ञेयश्च ।

(३) ईश-केन ______________ तथा ।

(४) ईशोपनिषदि ______________ उपदेशप्रकारः अस्ति ।

(५) प्रश्नोपनिषदि ______________ उपदेशप्रकारः अस्ति ।

## ३. युग्मानि योजयत ।

| अ | ब |
|---|---|
| (१) उपनिषद् | (१) ऋग्वेदः |
| (२) ब्रह्मसूत्रम् | (२) सामवेदः |
| (३) गीता | (३) यजुर्वेदः |
| (४) ईशोपनिषद् | (४) श्रुतिप्रस्थानम् |
| (५) छान्दोग्योपनिषद् | (५) स्मृतिप्रस्थानम् |
| | (६) तर्कप्रस्थानम् |

## ४. एकवाक्येन उत्तरं लिखत ।

(१) उपनिषद् शब्दे कः धातुः ?

(२) ऐतरेयोपनिषद् कं वेदमनुसरति ?

(३) आख्यायिकया उपदेशः कस्यामुपनिषदि दृश्यते ?

(४) दशोपनिषदां नाम कस्यामुपनिषदि प्राप्यते ?

(५) वेदान् कः विभक्तवान् ?

## ५. द्वित्रवाक्यैः उत्तरं लिखत ।

(१) चतुर्णामपि वेदानां के ऋषयः ?

(२) उपनिषच्छब्दार्थः कः ?

(३) किं दृष्ट्वा व्यासेन वेदाः विभक्ताः ?

(४) वेदस्य चत्वारः विभागाः के ?

## ६. टिप्पणीं लिखत ।

(१) प्रस्थानत्रयी ।

(२) वेदः ।

(३) उपनिषद्बोधप्रकारः ।

## ७. सविस्तरम् उत्तरं लिखत ।

(१) वेदोत्पत्तिविषये पाठानुगुणं व्याख्यानं कुरुत ।

(२) वेदस्य परिचयं यच्छत ।

(३) उपनिषदां लोके कीदृशः प्रभावः ? वर्णयत ।

●

# ११ दशोपनिषदः

## प्रस्तावना

'**ऋते ज्ञानान्न मुक्तिः**' ज्ञानं विना मुक्तिरेव न भवति । तत्सत्यं खलु ! लोकेऽपि एतत् वाक्यं प्रायोगिकरूपेण अन्वेति । यस्य विषयस्य ज्ञानं अस्मद् बुद्धौ अत्यधिकं दृढं वर्तते, तस्य बन्धनं न भवति । यथा कश्चन वैद्यः स्व-अध्ययनकाले सम्यक् न अधीतवान् सः स्वव्यवसायकाले औषधनिर्माणात् बिभेति । यदि सः पूर्वं सम्यक् अधीत्य औषधनिर्माणादिषु रतो भवति तर्हि सः अनन्तरं निर्भीः भवति । वस्तुतः अध्ययनस्य मुख्यम् उद्देश्यमिदमेव । छात्रः न कुत्रचिद् कस्माचिद् भीतः भवेत् तदेव अध्ययनस्य फलम् । उपनिषदाम् इदमेव कर्तव्यम् । तादृशिषु अष्टोत्तरशतोपनिषत्सु दश प्रधानाः सन्ति । तासां किञ्चित् सारं ज्ञास्यामः ।

---

वेदान्तपरिचयः अस्माभिः दशमे पाठे सम्प्राप्तः । तत्र च दशोपनिषदां विषयेऽपि अधीतम् । तद्यथा-

**ईश-केन-कठ-प्रश्न-मुण्ड-माण्डूक्य-तित्तिरिः ।**

**ऐतरेयं च छान्दोग्यं बृहदारण्यकं तथा ॥** (मुक्तिकोपनिषद् - १-३०)

सर्वा अपि उपनिषदः ज्ञानप्रचुराः विद्यन्ते । दशसङ्ख्यकाः इमाः उपनिषदः जीवनोज्जीवनाय मार्गं यच्छन्ति । एतासु दशसु उपनिषत्सु प्राथम्यम् अस्ति ईशावास्योपनिषदः ।

### १. ईशावास्योपनिषद्

ईशावास्योपनिषद् एका एव तादृशी उपनिषद् अस्ति या वेदस्य संहितान्तर्गता वर्तते । अन्याः मूलसंहितान्तर्गताः न सन्ति । अतः एतस्याः प्राथम्यं प्राधान्यञ्च विद्यते । शुक्लयजुर्वेदस्य संहितायाः अन्तिमोऽध्यायः चत्वारिंशोऽध्यायः एव इयम् उपनिषद् । मन्त्रभागस्य अंशत्वादेव एतस्याः अधिकमहिमा । शुक्लयजुर्वेदस्य नवत्रिंशदध्यायपर्यन्तं कर्मकाण्डस्य निरूपणं कृतम् । अन्तिमेऽस्मिन् अध्याये ज्ञानं निरूपितम् । मन्त्रस्य प्रारम्भः एव **ईशावास्यमिदं सर्वं** इत्यनेन विद्यते, इति हेतोरेव एतस्याः उपनिषदः नाम ईशावास्योपनिषद् अथवा ईशोपनिषद् इति श्रूयते । प्रत्येकस्याम् अपि उपनिषदि प्रारम्भे अन्ते च तापत्रयशमनाय शान्तिमन्त्रः पठ्यते । यस्य वेदस्य या उपनिषद् भवति तस्य वेदस्य एव शान्तिमन्त्रः आदावन्ते च पठ्यते । आधिदैविक आधिभौतिक आध्यात्मिकञ्च शान्तिं विना लौकिकज्ञानमपि न भवति चेत् कुत इदमाध्यात्मिकज्ञानम् ? शुक्लयजुर्वेदस्य अन्तर्भूतत्वात् अस्याः शान्तिमन्त्रः -

**पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते ।**

**पूर्णस्य पूर्मणादाय पूर्णमेवावशिष्यते ॥** इति ।

अष्टादशमन्त्रात्मिकायाः अस्याः उपनिषदः प्रथमः मन्त्रः अस्ति -

**ईशावास्यमिदं सर्वं यत्किञ्चजगत्यां जगत् ।**

**तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्यस्विद्धनम् ॥**

सुप्रसिद्धोऽयं मन्त्रः परमपुरुषस्य विभुत्वमुपवर्ण्य मानवस्य कर्तव्यं सूचयति । परमात्मा सर्वत्र व्याप्तः, अतः कर्मणः परिपूर्णरूपेण साङ्गं परिपालनं कर्तव्यम् । कर्मणि च बन्धोरबन्धोर्वा धनं कदापि न स्वीकर्तव्यम् । अर्थात् स्वार्थैकबुद्ध्या

वर्णाश्रमोचितं कर्म न, अपि तु परमार्थैकबुद्ध्या कर्माणि कर्तव्यानि । इयम् उपनिषद् ज्ञानकर्मणोः साहचर्यम् उपवर्णयति । इदमेव विजिज्ञासितव्यम् । ज्ञानरहितं कर्म योग्यफलाय न भवत्येव । अतः वर्णाश्रमोचितं कर्म अवश्यमनुष्ठेयम् । इत्ययं अस्याः ईशावास्योपनिषदः सारः ।

## २. केनोपनिषद्

दशोपनिषत्सु केनोपनिषदः द्वितीयं स्थानं वर्तते । ईशावास्योपनिषदिव अस्याः उपनिषदः प्रारम्भः **केनेषितम्** इत्यस्मात् भवति अतः अस्याः नाम केनोपनिषद् । पञ्चत्रिंशद् मन्त्रात्मिका, चतुर्भिः खण्डैः विभक्ता इयम् उपनिषद् । सामवेदस्य जैमिनीयब्राह्मणे आदिमाष्टाध्यायेषु यज्ञयागादयः, प्राणोपासनम्, पञ्चसाम-सप्तसामानि, गायत्रीसाम, वंशवृक्षः इत्याद्याः विविधाः विषयाः प्रकाशिताः । ततश्च उपनिषद्प्रारम्भः । एतस्याः उपनिषदः द्रष्टा तलवकारः ऋषिः । अतः अस्याः तलवकारोपनिषद् इति नामान्तरम् ।

सामवेदान्तर्गतत्वात् एतस्याः उपनिषदः शान्तिमन्त्रः सामवेदस्य एव वर्तते । तद्यथा

**ॐ आप्यायन्तु ममाङ्गानि वाक्प्राणश्चक्षुः श्रोत्रमथो बलमिन्द्रियाणि च सर्वाणि । सर्वं ब्रह्मौपनिषदम् । माहं ब्रह्मनिराकुर्याम् । मा मा ब्रह्म निराकरोत् । अनिराकरणमस्तु । अनिराकरणं मेऽस्तु । तदात्मनि निरते य उपनिषत्सु धर्मास्ते मयि सन्तु ते मयि सन्तु ।**

**ॐ शान्तिः शान्तिः शान्तिः ।।** इति ।

एतस्याम् उपनिषदि सन्ति चत्वारः खण्डाः । ते च द्विधा विभक्ताः । प्राथमिके विभागे सर्वविज्ञानास्पदं परब्रह्म एव, तच्च ब्रह्म परिपूर्णरूपेण ज्ञातुमेव न शक्यते । सर्वेषु इन्द्रियेषु बलप्रदायकः परमपुरुष एव । तमेव विषयं दृढयितुं अन्तिमाध्याये आख्यायिकया उपदेशः प्रदत्तः । देवासुरसङ्ग्रामे देवानां पराभवं पश्यन् परमपुरुषः देवेभ्यः बलं यच्छति । तत्र विजये प्राप्ते ते देवाः तं परमपुरुषं विस्मृतवन्तः । अनन्तरं सः परमपुरुषः यक्षरूपेण देवान् ज्ञापयति यद् सर्वेषां कर्ता-हर्ताच अहमेव ।

इत्येवं केनोपनिषद् समाप्ता भवति । एतस्याः उपनिषदः प्रथमः मन्त्रः वर्तते ।

**केनेषितं पतति प्रेषितं मनः केन प्राणः प्रथमः प्रैति युक्तः ।**

**केनेषितां वाचमिमां वदन्ति चक्षुश्श्रोत्रं क उ देवो युनक्ति ॥**

## ३. कठोपनिषद्

दशोपनिषत्सु तृतीया कठोपनिषद् अतीव सुप्रसिद्धा । कृष्णयजुर्वेदस्य काठकशाखान्तर्गता वल्लीषट्कात्मिका एवं पञ्चचत्वारिंशदधिकशतद्वयमन्त्रयुक्ता (२४५) । तत्त्वस्य सुखबोधनाय यमनचिकेतसोः माध्यमेन ब्रह्मस्वरूपम् उपदिष्टम् । कृष्णयजुर्वेदस्य इयम् उपनिषद्, अतः एतस्याः शान्तिमन्त्रः कृष्णयजुर्वेदस्य तद्यथा-

**ॐ सह नाववतु । सह नौ भवन्तु । सह वीर्यं करवावहै ।**

**तेजस्विनावधीतमस्तु । मा विद्विषावहै ॥**

**ॐ शान्तिः शान्तिः शान्तिः ।।** इति ।

### सारः

वाजश्रवसः पुत्रः नचिकेताः । पित्रा यज्ञदक्षिणात्वेन दीयमानाः दुग्धदोहाः, जग्धतृणाः, वृद्धाः गाः दानायोग्याः वीक्ष्य असन्तुष्टः सन् स्वपितरं मां कस्मै दास्यसि इति अपृच्छत् । द्वित्रवारं पृष्टं पुत्रं **मृत्यवे त्वां ददामि इति प्रत्युत्तरितवान् ।**

पितृवाक्यपरिपालनाय सः यमनगरं गतवान् । अनुपस्थितम् यमं ज्ञात्वा त्रिरात्रम् उपवासपूर्वकं प्रतीक्षामकरोत् । प्रत्यागतः

यमः त्रिरात्रप्रतिनिधित्वेन वरत्रयं प्रादात् । प्रथमेन वरेण पितृसौमनस्यम्, स्वर्ग्यमग्निं द्वितीयेन, मुक्तात्मनः स्वरूपं तृतीयेन वरेण च यमं प्रार्थितवान् । एतेन तुष्टः यमः तस्मै प्राथमिकं वरद्वयम् अददात् । तृतीयं आत्मतत्त्वज्ञानं प्राप्तुमयं योग्यो न वा इति परीक्षणाय **शतायुषः पुत्रपौत्रान् वृणीष्व** इत्यादिना नचिकेतसं प्रलोभयामास । यस्मिन् कस्मिन्नप्यनासक्तः मुक्तात्मतत्त्वबभुत्सुः सः बालकः नाङ्गीचकार । तस्याधिकारित्वं दृढीकृत्य यमः आत्मतत्त्वं नचिकेतसे उपादिदेश ।

एतादृश्याः कठोपनिषदः प्रथमः मन्त्रः भवति,

**ॐ उशन् ह वै वाजश्रवसः सर्ववेदसं ददौ ।**

**तस्य ह नचिकेता नाम पुत्र आस ॥**

## ४. प्रश्नोपनिषद्

दशानां मुक्तिकोपनिषदुद्धृतानां प्रसिद्धानां मध्ये चतुर्था उपनिषद् प्रश्नोपनिषद् । अस्यां जगतः सृष्टिस्थित्यादिविचाराः, ब्रह्मतत्त्वविचाराश्च सुलभशैल्या प्रश्नोत्तररूपेण निरूपिताः । तस्मादेव अस्याः प्रश्नोपनिषद् इति अन्वर्थं नाम । अथर्ववेदीया उपनिषदियं पठिता पिप्पलादशाखायाम् । अत एव एतस्याः शान्तिमन्त्रः अथर्ववेदस्य । तद्यथा –

**ॐ भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं पश्येमाक्षभिर्यजत्राः ।**

**स्थिरैरङ्गैस्तुष्टुवाँसस्तनूभिः व्यशेम देवहितं यदायुः ॥**

**स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः ।**

**स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु ॥**

**ॐ शान्तिः शान्तिः शान्तिः ।।** इति ।

अस्याः उपदेष्टारः आचार्यपिप्पलादाः । आचार्यपिप्पलादसदृशान् गुरून् अन्विष्टवन्तः षड् ऋषिकुमाराः । तादृशगुरुं अभिलषन्तः षट् शिष्याः तेषां सान्निध्यं प्राप्तवन्तः । पिप्पलादं प्रति भारद्वाजकुलोद्भवः भरद्वाजस्य पुत्रः सुकेशा, सत्यकामः शिबिपुत्रः, सौर्यायणीनामा गर्गगोत्रोद्भवः, आश्वलायननामा कौशल्यः, भृगुगोत्रजः भार्गवः वैदर्भिः, कबन्धी कात्यायनगोत्रजः इत्येवं जिज्ञासवः ब्रह्मविद्यां प्राप्तुम् आगताः । एते षट्मुनिकुमाराः अधीतसाङ्गवेदाः कृततपाः गुरुसमीपं **समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्** इत्युक्तशास्त्रक्रमानुसारेण समित्कुशहस्ताः सम्प्राप्ताः । एतदेव ज्ञापकमस्ति तेषां शिष्याणां गुरुभक्तेः सम्प्रदायाचरणनिष्ठायाश्च । ततश्च सुकेशादीन् परीक्ष्य, तेषां श्रद्धादिना तुष्टः गुरुः पिप्पलादः, तैः षड्भिः पृष्टानां प्रश्नानाम् षड्भिः अध्यायैः सप्तषष्ठिमन्त्रैश्च उत्तररूपेण ब्रह्म उपदिष्टवान् । एतस्याः उपनिषदः प्रथमः मन्त्रः अस्ति –

**हरिः ॐ सुकेशा च भारद्वाजः शैब्यश्च सत्यकामः सौर्यायणी च गार्ग्यः कौशल्यश्चाश्वलायनः भार्गवो वैदर्भिः कबन्धी कात्यायनः ते हैते ब्रह्मचराः ब्रह्मनिष्ठाः परंब्रह्मान्वेषमाणा एष ह वै तत्सर्वं वक्ष्यतीति ते ह समित्पाणयो भगवन्तं पिप्पलादमुपसन्नाः ।**

**ॐ शान्तिः शान्तिः शान्तिः ।।** इति ।

## ५. मुण्डकोपनिषद्

मुण्डकोपनिषद् अथर्ववेदसम्बन्धिनी मुण्डकशाखान्तर्गता । अत एव एतस्याः अपि शान्तिमन्त्रः **भद्रं कर्णेभिः शृणुयाम** इति । वैराग्यसम्पन्नेभ्यः संसारात् मुक्तिं कांक्षितवद्भ्यः परब्रह्मोपासनारूपमोक्षमार्गस्य उपदिश्यमाणत्वात् अस्याः मुण्डकोपनिषद् इति अन्वर्थं नाम । ब्रह्मविद्या सर्वविद्यानाम् आश्रयभूता । वैराग्यसम्पन्नाः श्रवणमनननिदिध्यासनैः तपश्शब्दितपरमात्मानं ये सेवन्ते ते सकलविधभवबन्धनात् मुक्ताः भूत्वा शाश्वतं अपुनरावृत्तिरूपं मोक्षं प्राप्नुवन्तीति अस्याः आशयः ।

त्रिभिः अध्यायैः षट्षष्टि–मन्त्रैश्च विभक्ता इयं उपनिषद्, पुनः प्रत्यध्यायं द्वाभ्यां खण्डाभ्यां विभक्ता वर्तते ।अस्यामुपनिषदि परापरविद्ययोः लक्षणं, परविद्यागोचरस्य ब्रह्मणः भूतयोनित्त्वम्, परब्रह्मप्राप्तये फलाभिसन्धिरहितं कर्मानुष्ठानम्, प्राणरूपेण धनुषा आत्मरूपेण शरेण च ब्रह्मलक्षीकरणम्, समानवृक्षे स्थितयोः जीवपरमात्मनोः अन्यतरस्य परमात्मनः उपास्यत्वं इत्याद्याः नैके विषयाः निरूपिताः ।

मुण्डकोपनिषदः प्राधान्यं आत्मनः सत्यपरत्वकथनेन वर्तते । **सत्यमेव जयते** इति वाक्यं खलु स्वतन्त्रभारतराष्ट्रस्य ध्येयवाक्यत्वेन विराजते ।

अस्याः उपनिषदः प्रथमः मन्त्रः अस्ति,

**ॐ ब्रह्मा देवानां प्रथमः सम्बभूव विश्वस्य कर्ता भुवनस्य गोप्ता ।**

**स ब्रह्मविद्यां सर्वविद्याप्रतिष्ठामथर्वाय ज्येष्ठपुत्राय प्राह ॥**

**ॐ शान्तिः शान्तिः शान्तिः ।।** इति ।

## ६. माण्डूक्योपनिषद्

प्रसिद्धासु दशसु उपनिषत्सु माण्डूक्योपनिषदः षष्ठं स्थानं दृश्यते । केवलं द्वादशमन्त्रात्मिका इयम् उपनिषद् गात्रदृष्ट्या अतीव अण्वी परन्तु अर्थविस्तरदृष्ट्या तु महती । **मूर्तिः लघ्वी कीर्तिः गुर्वी** इत्युक्तरीत्या अस्याः स्थानम् उच्चतममेव ।तदुक्तं मुक्तिकोपनिषदि **माण्डूक्यमेकमेवालं मुमुक्षूणां विमुक्तये** इति ।श्रीशङ्कराचार्यैरपि इयम् उपनिषद् **वेदान्तसारसङ्ग्रहः** इति माण्डूक्यभाष्ये प्रतिपादितम् । इयम् अथर्ववेदसम्बन्धिनी, अतः एतस्याः शान्तिमन्त्रः **भद्रं कर्णेभिः....** इति ।द्वादशमन्त्रात्मिकायामस्यां प्रणवस्य अक्षराणाम्, मात्राणाम्, तत्तत्प्रतिपाद्यानां भगवद्रूपाणां च विवरणं दृश्यते । समस्तवेदसाररूपस्य प्रणवस्य विवरणं प्रस्तूयतेऽत्र । अनया उपनिषदा सह एकोनत्रिंशत् श्लोकाः पठ्यन्ते । शाङ्करसिद्धान्ते एते गौडपादीयाः कारिकाः इति प्रसिद्धाः ।

द्वादशमन्त्रात्मिका इयमुपनिषद् खण्डचतुष्टये विभक्ता वर्तते ।शाङ्करमते खण्डविभागो नास्ति ।प्रमुखतया प्रणवविचारः प्रस्तुतः अस्यामुपनिषदि ।तदेव विव्रियते ।अस्याम् उपनिषदि प्रणवशब्दवाच्यः परमात्मा, परमात्मनः पादचतुष्टयत्वम्, प्रणवे विद्यमानासु मात्रासु भगवतः चत्वारः व्यूहावताराः च प्रतिपाद्यन्ते ।एवं क्रमेण प्रणवस्य विवरणं सम्यक् प्रतिपादितम् ।एतस्याः उपनिषदः प्रथमो मन्त्रः विद्यते –

**हरिः ॐ ।ओमित्येतदक्षरमिदं सर्वम् ।तस्योपव्याख्यानम् ।भूतं भवत् भविष्यदिति ।सर्वमोंकार एव ।यच्चान्यद् त्रिकालातीतं, तदप्योंकार एव ।। इति ।**

## ७. तैत्तिरीयोपनिषद्

दशसु उपनिषत्सु तैत्तिरीयोपनिषदः श्रेष्ठं स्थानं दृश्यते । भारतीयानां सर्वेषां परिपूर्णरूपेण संस्कृतिमुपवर्णयति इयमुपनिषद् । इयं तैत्तिरीयोपनिषद् कृष्णयजुर्वेदस्य तैत्तिरीयशाखान्तर्गततैत्तिरीयारण्यकभागस्य अङ्गमस्ति । तैत्तिरीयारण्यकस्य दश अध्यायाः सन्ति । तेषु दशसु अध्यायेषु सप्तमः, अष्टमः एवं नवम इति अध्यायत्रयमेव तैत्तिरीयोपनिषन्नाम्ना प्रसिद्धा । कृष्णयजुर्वेदस्य इयमुपनिषद्, अतः शान्तिमन्त्रोऽपि कृष्णयजुर्वेदस्य एव ।

**ॐ शं नो मित्रः शं वरुणः । शं नो भवत्वर्यमा । शं न इन्द्रो बृहस्पतिः ।**

**शं नो विष्णुरुरुक्रमः । नमो ब्रह्मणे । नमस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्मासि ।**

**त्वमेव प्रत्यक्षं ब्रह्म वदिष्यामि । ऋतं वदिष्यामि । सत्यं वदिष्यामि ।**

**तन्मामवतु । तद्वक्तारमवतु । अवतु माम् । अवतु वक्तारम् ॥**

**ॐ शान्तिः शान्तिः शान्तिः ।।**

**ॐ सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै ।**

**तेजस्विनावधीतमस्तु मा विद्विषावहै ॥**

**ॐ शान्तिः शान्तिः शान्तिः ।।** इति ।

भारतीय संस्कृतेः प्रारम्भात् अन्तिमसोपानपर्यन्तं सम्पूर्णं स्वरूपं अनया तैत्तिरीयोपनिषदा आदर्शतया वर्ण्यते । अस्याम् उपनिषदि वल्लीत्रयं वर्तते । शिक्षावल्ली, आनन्दवल्ली, भृगुवल्ली चेति । तत्र प्रथमवल्यां एतस्याः संस्कृतेः वैशिष्ट्यस्य सर्वस्यापि आधारभूतो गुरुकुलवासः सम्पूर्णः उपपादितः । अनन्तरं द्वितीयवल्यां विस्तरेण अध्यात्मतत्त्वोपदेशः, तदनन्तरवल्याम् अध्यात्मरूपायाः साङ्गायाः सफलायाः साधनायाः वर्णनम् । अस्यामुपनिषदि अनुवाकाः १२, ९, १० इति क्रमशः विद्यन्ते इति। एवं वल्लीत्रये परिसमाप्यते भारतीयानां संस्कृतिः । एतादृश्याः उपनिषदः प्रथमः मन्त्रः वर्तते –

**ॐ शीक्षां व्याख्यास्यामः । वर्णः स्वरः । मात्रा बलम् । साम सन्तानः । इत्युक्तः शीक्षाध्यायः ॥**

## ८. ऐतरेयोपनिषद्

दशसु उपनिषत्सु अष्टमा उपनिषद् ऐतरेयोपनिषद् । ऋग्वेदस्य ऐतरेयारण्यकस्य पञ्चसु आरण्यकेषु तृतीयारण्यकस्य द्वितीये अध्याये आत्मषट्कत्वेन ऐतरेयोपनिषद् निबद्धा वर्तते । ऋग्वेदान्तर्गतत्वात् अस्याः शान्तिमन्त्रोऽपि ऋग्वेदस्य एव । तद्यथा –

**ॐ वाङ्मे मनसि प्रतिष्ठिता । मनो मे वाचि प्रतिष्ठितम् । आविरावीर्म एधि । वेदस्य म आणीस्थः । श्रुतं मे मा प्रहासीः । अनेनाधीतेनाहोरात्रान् सन्दधामि । ऋतं वदिष्यामि । सत्यं वदिष्यामि । तन्मामवतु । तद्वक्तारमवतु । अवतु माम् । अवतु वक्तारमवतु वक्तारम् । ॐ शान्तिः शान्तिः शान्तिः ।।** इति ।

ऐतरेयोपनिषद्–नामाभिधाने एका कथा अत्यन्तं सुप्रसिद्धा । हारीतमुनिवंशीयः माण्डुकिनामकः कश्चन ऋषिः, तत्पत्नी च इतरा । तस्यां जातोऽयं महामनाः प्राग्जन्मनि अनुशिक्षितं वासुदेवद्वादशाक्षरमन्त्रमेव सदा जपन् मूक इव आसीत् । तेन असन्तुष्टः माण्डुकिऋषिः पिङ्गानाम्नीं द्वितीयां पत्नीं स्वीकृतवान् । तस्याः सकाशात् सः चतुरः पुत्रान् लब्धवान् । ते च वेदवेदान्तापारगाः यज्ञादिकर्मपराः पितरौ तोषयामासुः । अनेन दुःखिता इतरा स्वपुत्रमुपगम्य सरोषम् अवदत् । त्वादृशपुत्रप्राप्त्यपेक्षया वन्ध्यात्वमेव मम वरमासीत् । एतेन अवमानेन जीवनापेक्षया मम मरणमेव वरं मन्ये । तदा त्यक्तमौनः सः मुक्तिमार्गम् उपादिदेश । सः उपदेश एव ऐतरेयोपनिषद् इति नाम्ना प्रसिद्धः । इयम् उपनिषद् षड्भिः अध्यायैः आत्मानमेव निरूपयतीति हेतोः आत्मषट्कमिति नामान्तरम् । एतस्याः उपनिषदः प्रथमो मन्त्रस्तावत्–

**ॐ आत्मा वा इदमेक एवाग्र आसीत् । नान्यत् किञ्चन मिषत् । स ईक्षत लोकान्नु सृजा इति । स इमाल्लोकानसृजत ॥** इति ।

## ९. छान्दोग्योपनिषद्

छान्दोग्योपनिषद् अत्यन्तं सुप्रसिद्धं नाम । अस्याः उपनिषदः सर्वासु अपि उपनिषत्सु अत्यधिकं प्राधान्यम् अस्ति । छन्द इति शब्दः अनेकेषु अर्थेषु उपलभ्यते । अत्रः छन्दः नाम साम । छन्दांसि सामानि गायन्ति, गानतोऽभिधीयते इति छन्दोगाः । छन्दोगानाम् आम्नायः सामवेद एव । स एव छान्दोग्यम् । छान्दोग्यं च सा उपनिषद् – छान्दोग्योपनिषत् ।

सामवेदीय छान्दोग्यब्राह्मणस्य एव अयं उपनिषद्भागः विद्यते । इयमुपनिषद् सर्वाभ्यः अपि बृहती अस्ति । सामवेदस्य तलवकारशाखान्तर्गतायाम् अस्याम् उपनिषदि अष्टप्रपाठकाः सन्ति । सामवेदस्य इयं उपनिषद, अतः एतस्याः उपनिषद, शान्तिमन्त्रोऽपि सामवेदस्य एव । स तु '**आप्यायन्तु ममाङ्गानि**' इति ।

अस्यामुपनिषदि उद्गीथविद्या, प्रणवोपासनम्, पञ्चसामोपासनम्, सप्तसामोपासनम्, मधुविद्या, प्राणविद्या, संवर्गविद्या, गायत्रीविद्या, कौक्षेयज्योतिर्विद्या, शाण्डिल्यविद्या इत्याद्याः मोक्षप्रदाः नानाविद्याः निरूपिताः ।

आचारशुद्धिज्ञापनाय रैक्वाख्यानम् आख्यातम् । गुरुमहिमाज्ञापनाय सत्यकाम जाबालस्य उपाख्यानम् उपदिष्टम् । आरुणेय श्वेतकेतोः कथा अपि श्रूयते । इत्येवं जीवनबोधरूपाः नानाकथाः अपि श्रूयन्ते । एतस्याः प्रथमो मन्त्रः वर्तते–

**हरिः ॐ ओमित्येतदक्षरमुद्गीथमुपासीत ।**

**ओमिति ह्युद्गायति । तस्योपव्याख्यानम् ॥** इति ।

### १० बृहदारण्यकोपनिषद्

बृहदारण्यकोपनिषद् शब्दस्य निर्वचनं श्रीमच्छङ्कराचार्यैः एवं कृतं यद् '**सेयं ब्रह्मविद्या उपनिषद्-शब्दवाच्या तत्पराणां सहेतोः संसारस्य अत्यन्तावसादनात् । सेयं षडध्यायी अरण्ये अनूच्यमानत्वात् आरण्यकम्, बृहत्वात् परिणामतो बृहदारण्यकम्**' इति । बृहदारण्यकभाष्यवार्तिके सुरेश्वराचार्यैः एवं व्युत्पत्तिः दर्शिता ।

**अरण्याध्ययनाच्चैतदारण्यकमितीर्यते ।**

**बृहत्वात् ग्रन्थतोऽर्थाच्च बृहदारण्यकं मतम् ॥** इति ।

सेयं बृहदारण्यकोपनिषद् शतपथब्राह्मणान्तगर्त अन्तिमाऽष्टाध्यायात्मिका । इदं ब्राह्मणं शुक्लयजुर्वेदीयम् । अयं शुक्लयजुर्वेदः महर्षेः याज्ञवल्क्यस्य तपोबलात् आविर्भूतः । अष्टाध्यायात्मिकायाम् अस्यां बृहदारण्यकोपनिषदि प्रथमद्वितीयाध्यायौ । कर्मप्रतिपादनपरौ । तत्र प्रथमः कर्माङ्गप्रवर्ग्यकः, तथा द्वितीयः उपासनप्रतिपादकः । तौ परित्यज्य षडेव अध्यायाः व्याख्याताः पूर्वाचार्यैः । इयमुपनिषद् काण्वमाध्यन्दिनशाखयोः विभक्ता वर्तते । परन्तु पूर्वाचार्यैः रचितानि सर्वाणि भाष्याणि काण्वशाखामनुसृत्यैव उपलभ्यन्ते ।

शुक्लयजुर्वेदान्तर्गतत्वात् अस्याः उपनिषदः शान्तिमन्त्रोऽपि शक्लयजुर्वेदस्य एव, **पूर्णमदः....** इति ।

एतस्याः प्रथमो मन्त्रः यथा–

**हरिः ओम् । उषा वा अश्वस्य मेध्यस्य शिरः । सूर्यश्चक्षुर्वातः प्राणो व्यात्तमग्निर्वैश्वानरः संवत्सर आत्माऽश्वस्य मेध्यस्य । द्यौः पृष्ठमन्तरिक्षमुदरं पृथिवी पाजस्यं दिशः पार्श्वे अवान्तरदिशः पर्शवः, ऋतवोऽङ्गानि मासाश्चार्द्धमासाश्च पर्वाण्यहोरात्राणि प्रतिष्ठा नक्षत्राण्यस्थीनि, नभो मांसानि । उवध्यं सिकताः सिन्धवो गुदा यकृच्च क्लोमानश्च पर्वता ओषधयश्च वनस्पतयश्च लोमानि । उद्यन् पूर्वार्धो निम्लोचन् जघनार्धो यद्विजृम्भते तद्विद्योतते, यद्विधूनुते तत्स्तनयति, यन्मेहति तद्वर्षति, वागेवास्य वाक् ॥**

## स्वाध्यायः

### १. योग्यविकल्पं चित्त्वा उत्तरं लिखत ।

(१) ईशावास्योपनिषदि कति मन्त्राः ?

(क) ११ (ख) १५ (ग) १८ (घ) २६

(२) यमः नचिकेतसं कस्मिन् प्रश्ने प्रलोभयामास ?

(क) प्रथमे (ख) द्वितीये (ग) तृतीये (घ) चतुर्थे

(३) प्रश्नोपनिषदि कति ऋषिकुमाराः ?

(क) सप्त (ख) षट् (ग) पञ्च (घ) चत्वारः

(४) मुण्डकोपनिषदि कति अध्यायाः सन्ति ?

(क) एकः (ख) द्वौ (ग) त्रयः (घ) चत्वारः

(५) दशोपनिषत्सु अत्यन्तलघ्व्याः उपनिषदः नाम किम् ?

(क) ईशोपनिषद् (ख) माण्डूक्योपनिषद् (ग) कठोपनिषद् (घ) केनोपनिषद्

(६) छान्दोग्योपनिषद् कस्मिन् वेदे अस्ति ?

(क) ऋग्वेदे (ख) यजुर्वेदे (ग) सामवेदे (घ) अथर्ववेदे

(७) सत्यकामः कस्य पुत्रः ?

(क) भृगुपुत्रः (ख) गर्गपुत्रः (ग) शिबिपुत्रः (घ) पिप्पलादपुत्रः

## २. रिक्तस्थानं पूरयत ।

(१) ईशावास्यं ______________ धनम् ।

(२) उशन् ______________ आसन् ।

(३) वाङ्मे ______________ वक्तारम् ।

(४) आप्यायन्तु ______________ मयि सन्तु ।

(५) आत्मा ______________ असृजत ।

## ३. युग्मानि योजयत ।

| अ | ब |
|---|---|
| (१) छान्दोग्योपनिषद् | (१) कृष्णयजुर्वेदः |
| (२) बृहदारण्यकोपनिषद् | (२) ऋग्वेदः |
| (३) प्रश्नोपनिषद् | (३) सामवेदः |
| (४) ऐतरेयोपनिषद् | (४) शुक्लयजुर्वेदः |
| (५) तैत्तिरीयोपनिषद् | (५) अथर्ववेदः |
| | (६) धनुर्वेदः |

## ४. एकवाक्येन उत्तरं लिखत ।

(१) केनोपनिषदः द्रष्टा ऋषिः कः ?

(२) छान्दोग्योपनिषदि कति अध्यायाः ?

(३) बृहदारण्यकोपनिषद् कस्मात् वेदात् उपात्ता ?

(४) प्रश्नोपनिषदि कः गुरुः ?

(५) नचिकेताः कति रात्रं विनाहारम् उवास ?

## ५. द्वित्रवाक्यैः उत्तरं लिखत ।

(१) प्रश्नोपनिषदः षण्णाम् ऋषिकुमाराणां नामानि लिखत ।

(२) कठोपनिषदि नचिकेताः वरत्रयत्त्वेन किमयाचत ?

(३) माण्डुक्यस्य प्रथमः मन्त्रः कः ?

## ६. टिप्पणीं लिखत ।

(१) प्रश्नोपनिषदः शान्तिमन्त्रः ।

(२) ऐतरेयोपनिषद्

(३) मण्डूक्योपनिषद्

## ७. सविस्तरम् उत्तरं लिखत ।

(१) तैत्तिरीयोपनिषदः परिचयं यच्छत ।

(२) मुण्डकोपनिषदः विषयवस्तु विवृणुत ।

(३) केनोपनिषदः स्वरूपं स्पष्टयत ।

# १२ वेदान्तदर्शनग्रन्थकारणां परिचयः

## प्रस्तावना

**वेदान्तज्ञानात् व्युत्पत्तिः पूर्यते** इति वचनानुसारं वेदान्ताध्ययनेनैव शब्दार्थयोः परमार्थः अवगन्तुं शक्यते । सर्वेषामपि शास्त्राणां चरमं परमं च लक्ष्यमस्ति मोक्षप्राप्तिः । न केवलं मृत्युलोकतरणमेव, अपितु मृत्युलोके विद्यमाने अपि तद्गतधर्माणां रागद्वेषद्वन्द्वादीनां संस्पर्शः अपि न भवेत् । जीवनस्य प्रत्येकस्मिन् स्तरे परमात्मदर्शनमेव मोक्षः । तदुक्तं गीताचार्यैः –

**समः शत्रौ च मित्रे च तथा मानापमानयोः ।**
**शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः ॥**

(भ. गी. १२/१८)

परमात्मनः यथार्थस्वरूपदर्शनमेव मोक्षः । तद्दर्शनाय अस्माकं जीवनं तदनुकूलं भवेत् । अत एव सामवेदस्य शान्तिमन्त्रः वदति यत् **तदात्मनि निरते य उपनिषत्सु धर्माः ते मयि सन्तु ते मयि सन्तु ।** परमात्मसमीपं गन्तव्यञ्चेत् तदनुकूलम् अस्माभिर्भाव्यम् । तदनुकूलस्थित्या एव जीवनं सार्थकं भवति ।

वेदान्तशास्त्रं न केवलं उपदेशशास्त्रं परन्तु तापत्रयाभितप्तानां सर्वेषां सामान्यजीवानाम् उपजीव्यं वर्तते । एतादृशं वेदान्तशास्त्रं पूर्वाचार्यैः स्वजीवने परिपूर्णरूपेण अनुसृतम् । तथा अन्येषां कृते स्वजीवनेन एव उपदेशः प्रदत्तः । तत्तादृशाः सन्ति इमे अस्मदाचार्यप्रवराः श्रीशङ्कररामानुजवल्लभमध्वनिम्बार्काद्याः । तेषां जीवनं पाठेऽस्मिन् पठिष्यामः ।

## १. श्रीशङ्कराचार्यः

### बाल्यावस्था



सप्तवर्षीयः शङ्करः मातरं सुभद्रामेवमवदत्–मातः ! अहं सन्यासी भवितुमिच्छामि, मह्यमनुज्ञां देहि । तच्छ्रुत्वा जननी साश्रुवदना जाता, उक्तवती च – हे पुत्र ! त्वयि गते को मे आधारः ? अहं त्वदर्थमेव जीवामि, अनुज्ञा न प्राप्ता । अत्यन्तं प्रतिभावान् बालोऽयं प्रथमवयस्येव मातृभाषायां नैपुण्यमवाप । द्वितीये वर्षे रामायण-महाभारतपुराणादीनां कथाः श्रुत्वा ताः कण्ठगताश्चकार । तृतीये एव वर्षे जनकः शिवगुरुः पञ्चत्वमवाप । ततः पञ्चमे वर्षे तद्यज्ञोपवीतसंस्कारः जातः । अध्यायनाय गुरुगृहं प्रेषितः । सप्तमे वर्षे सः वेदवेदान्त-तदङ्ग-शास्त्राणां च अध्ययनं पूर्णमकरोत् ।

### जन्मस्थलं समयश्च-

बालोऽयमेव जगद्गुरूः शङ्कराचार्यः । केरलप्रदेशस्य पूर्णानद्यास्तटे कालिन्दीग्रामे वैशाखशुक्लपञ्चम्यां भगवतः शिवस्य वरदानेन शिवगुरुसुभद्राभ्यां सः जन्म लेभे । समयोऽयं ई. पू. ४०० मन्यते । अत्र केचन ई. पू. ६०० शताब्दीतः ९०० शताब्दीं यावत् समयं मन्यन्ते । कल्याणस्य वेदान्ताङ्के ई. पू. ४०० समयः निर्दिष्टः । भारतीयधर्माः इति ग्रन्थे आचार्यजन्मसमयः ई.स. पू. ७८८ स्वीकृतः ।

### गृहत्यागः

एकदा मात्रा सह स्नातुं बालोऽयं नदीतटं जगाम । तत्र स्नानं कुर्वाणः केनचित् मकरेण गृहीतपादः अभवत् । माता च आक्रन्दनम् अकरोत् । धीरेण बालेन तदोक्तं यत् मातः ! सन्यासाय अनुज्ञां देहि । तर्हि मकरोऽयं मां त्यक्ष्यति । मात्रा च अनुज्ञा दुःखेन प्रदत्ता, अन्ते च शङ्करोक्तिः सफला जाता । गृहत्यागसमये मात्रा वरो याचितः – हे पुत्र ! मेऽन्तसमये त्वया समुपस्थातव्यम् इति । वचनमिदं प्रदाय बालः गृहं ग्रामञ्च तत्याज ।

### दीक्षा

नर्मदातटे स्वामी गोविन्दभगवत्पादः बालमिमं दीक्षितवान् । सोऽपि पूज्यपादः जातः । अल्पे एव काले योगसिद्धीरवाप्य काशीं प्राप्तः । स्वतेजसा प्रतिभया आचरणेन च सर्वत्र प्रख्यातो बभूव । नैके शिष्याः संस्कृतभाषया वेदान्तेन च बोधिताः ।

### शिवसाक्षात्कारः

एकदा भगवान् शङ्करः चाण्डालवेशधारी भूत्वा दर्शनं प्रायच्छत् । ब्रह्मसूत्राणां भाष्यलेखनाय तथा तदनुगुण धर्मप्रचारायादिदेश ।

### भाष्यरचना

तत्रैव गंगातटे आचार्यैः भाष्यं परिपूर्णं विलिखितम् । तदा एकस्मिन् सूत्रे एकेन द्विजेन सह अष्टदिवसात्मकः शास्त्रार्थः विहितः । स न सामान्यब्राह्मणः, अपि तु साक्षाद्वेदव्यासः आसीत् । ततश्च श्रीनगरे शारदादेवीसिद्धपीठे भाष्यं प्रमाणीकृत्य बदरिकाश्रमे अपूर्णाश्चान्ये ग्रन्थाः पूर्णीकृताः । ततः प्रयागे कुमारिलभट्टेन सह समावेशो जातः ।

### शास्त्रार्थविजयः

भट्टसूचनया माहिष्मतीनगर्यां मण्डनमिश्रेण अपूर्वः शास्त्रार्थः जातः । तत्र भारतीदेव्याः श्रृङ्गारिके प्रश्ने आचार्यः अमरुनृपमृतदेहं प्रविश्य, संसारानुभवं प्राप्य वादे विजयं प्राप्तवान् । आचार्यः षोडशे वयसि एव गीतोपनिषद्ब्रह्मसूत्राणां भाष्यं लिलेख, अपरेषु षोडशवर्षेषु निखिले भारते धर्मस्थापनाय परिभ्रमणम् अकरोत् । तस्मिन् समये बौद्धैः वैदिकविधिनिषेधानां नाशः कृतः । आचार्यैः ते पराभाविताः, वैदिकधर्मश्च पुनः संस्थापितः ।

### मठस्थापना

आचार्यैः प्रथमं दक्षिणस्य तुङ्गभद्रातटे श्रृङ्गेर्यां श्रीमठः स्थापितः । तत्र शारदादेवी च प्रतिष्ठापिता । तदानीमेव मातुः अवसानमिमित्तं वचनं परिपालयन् गृहं गत्वा तस्याः अन्त्येष्टिसंस्कारं स्वयं विधाय पुनः विजययात्रा प्रारब्धा । जगन्नाथपुर्यां मठं संस्थाप्य तत्र पद्मपादाचार्यः मठाधीशत्वेन स्थापितः । ततः गुजरातमागत्य द्वारिकायां शारदामठः, बदरिकाश्रमे ज्योतिर्मठश्च संस्थाप्य, तोटकाचार्यः मठाधीशः कृतः । भारतस्य चतुर्दिक्षु चतुर्मठस्थापना आचार्याणामद्भुतं सेवाकार्यमस्ति । एतानि पीठानि संस्थाप्याचार्याः काञ्चीकामकोटिपीठे कामाक्षीं समाराधयन् । अद्यापि शङ्करपीठाचार्याः आचार्यप्रदत्तचन्द्रमौलीश्वर-स्फटिकशिवलिङ्गं, श्रीयन्त्रं च नित्यं सविधि पूजयन्ति ।

### ग्रन्थरचना

आचार्यलिखितग्रन्थाः अनेके वर्तन्ते । तत्र प्रमुखाः निर्दिश्यन्ते ।

| | | |
|---|---|---|
| १. ब्रह्मसूत्रभाष्यम् | २. एकादशोपनिषद्भाष्यम् | ३. गीताभाष्यम् |
| ४. विष्णुसहस्रनामभाष्यम् | ५. सनत्सुजातीयभाष्यम् | ६. हस्तामलकभाष्यम् |

७. विवेकचूडामणिः ८. प्रबोधसुधाकरः ९. उपदेशसाहस्री

१०. अपरोक्षानुभूतिः ११. पञ्चीकरणम् १२. आनन्दलहरी

१३. सौन्दर्यलहरी १४. प्रपञ्चतन्त्रसारः १५. भजगोविन्दम्

आचार्यः द्वात्रिंशत्तमे (३२) वयसि एतान् ग्रन्थान् निरमायि । ते साक्षात्शङ्करावताराः आसन् तद्विषये प्रसिद्धोक्तिः अस्ति **शङ्करः शङ्करः साक्षात् ।**

**परमपधावाप्तिः**

शङ्कराचार्याः ३२ वयसि ई. स. ८२० मध्ये हिमालये केदारनाथे स्वजीवनलीलां परिसमापयामासुः ।

## २. श्रीरामानुजाचार्याः

**जन्मकालः**



भगवद्गुणविभूषिताः श्रीमद्रामानुजाचार्याः द्रविडदेशान्तर्गते श्रीमन्महाभूतपुरिनामके ग्रामे जन्म अलभन् । एते शेषांशजाः सप्तदशांत्तरसहस्रतमे (१०१७) पिंगलसंवत्सरस्य चैत्रशुक्लपंचम्यां तिथौ गुरुवासरे आद्रानक्षत्रे प्रादुरभवन् । एतेषां परमाचार्याणां पितुः नाम केशवसोमयाजी तथा मातुः नाम कान्तिमती च आसीत् । आसूरिवंशोत्पन्नानाम् एतेषाम् आचार्याणां हारितगोत्रं यजुश्शाखा च आसीत् ।

**विविधनामानि-**

परमपूज्यानां श्रीमद्रामानुजाचार्याणाम् अनेकानि नामानि सन्ति । यथा श्रीभाष्यकारः, लक्ष्मणमुनिः, यतिराजः, भूतपुरीन्द्रः, देशिकेन्द्रः, कृपामात्रप्रसन्नाचार्यश्चेत्यादीनि । एतैः परमदयालुभिः आचार्यैः ब्रह्मसूत्रमधिकृत्य अतीवरमणीयं परब्रह्मतत्त्वप्रतिपादकं श्रीभाष्यं रचितम्, अतः श्रीभाष्यकारः इति नाम्ना विख्यातिः प्राप्ता । यदा त्रेतायुगे भगवान् श्रीरामः प्रदुरभूत्, तदा एषः आचार्योऽपि भगवतः श्रीरामस्य भ्रातृरूपेण प्रकटोऽभूत् । अतः तस्य अपरं नाम लक्ष्मणमुनिः इत्यासीत् । न केवलं तावदेव अपि तु एते परमाचार्याः श्रीभूतपुर्यां कृतावताराः । अत एव एते श्रीभूतपुरीन्द्रः इति नाम्ना प्रसिद्धिं प्राप्तवन्तः ।

**आचार्याः**

भगवद्गुणयुक्तानाम् एतेषां श्रीमद्रामानुजाचार्याणां सामान्यदर्शनाचार्यस्तु श्रीयादवप्रकाश आसीत् । तथा च विशिष्टाद्वैतदर्शनाचार्यास्तु महापूर्णः, गोष्टीपूर्णः, श्रीशैलपूर्णः, मालाधरार्यः, श्रीवररङ्गः इत्यादयः आसन् । ऐतेषां महामुनीनां प्राचार्यस्तु श्रीमद्यामुनमुनिः आसीत् । तथा तेषां संन्यासदीक्षागुरुस्तु साक्षात्काञ्चीवरदराजः आसीत् ।

**शिष्याः**

एतेषां कृपामात्रप्रसन्नाचार्याणां श्रीमद्रामानुजाचार्याणाम् अनेके शिष्याः आसन् । तेषु विद्यासम्प्रदायप्रवर्तकाः सिंहासनाधिपतिसंज्ञाकारः कुरेशदाशरथिप्रभृतयः चतुस्सप्तति (७४) संख्याकाः प्रधानशिष्याः आसन् । अपरे च असंख्या आसन् । एतेषां भगवद्गुणयुक्तानामाचार्याणाम् अनेके प्रशस्तशिष्याः आसन् । यथा श्रीमद्वेदमार्गप्रतिष्ठापनाचार्यः, उभयवेदान्ताचार्यः, अभङ्गगरुडाङ्कः, नारायणपादपद्माराधकः, श्रीरङ्गेशजयध्वजः इत्यादयः ।

### कृतयः

परमकृपालुभिः एतैः रामानुजाचार्यैः सर्वेषां जीवानां कल्याणाय स्वजीवनावधौ नवग्रन्थाः विरचिताः । यथा – शरणागतिगद्यम्, श्रीरङ्गगद्यम्, श्रीवैकुण्ठगद्यम्, शारीरकमीमांसाभाष्यम्, नित्यग्रन्थः, भगवद्गीताभाष्यम्, वेदान्तदीपः, वेदान्तसारः, वेदार्थसंग्रहश्चेति ।

### परमपदावाप्तिः

एते परमाचार्याः स्वजीवनकालपर्यन्तं (काञ्चीपुरम्, श्रीवेङ्कटाचलम्, मेलुकोटे, श्रीरङ्गम् इत्यादिषु) दिव्यक्षेत्रेषु निवासं कृत्वा भगवदाराधनं कृतवन्तः । एते कृपाचार्याः दुर्मतिसंवत्सरे माघशुक्लदशम्यां तिथौ मन्दवासरे आर्द्रानक्षत्रे इह लोकात् भगवद्धामगमनं अकुर्वन् । एतेषां जीवनकालस्तु १२० वर्षाणि आसन् ।

## ३. श्रीवल्लभाचार्यः

भारतदेशस्य मध्यकालः मुगलानामसीत् । देशे भक्तिविस्तारः न्यूनतामभजत् । शाङ्करवेदान्तिनां ब्रह्मविचारः नीरसतामजनयत् लोकमानसेषु । तादृशे काले वल्लभाचार्याः भक्तिं वेगवतीं व्यधुः ।



### जन्मस्थलम्

दक्षिणभारते आचार्याः जन्म लेभिरे । तत्र एकः भारद्वाजगोत्रीयः तैलङ्गविप्रपरिवारः न्यवसत् । तत्र वंशे प्रतिवंशं सोमयज्ञः क्रियमाणः आसीत् । तन्मते १०० सोमयज्ञेषु समाप्तेषु देवांशपुत्रप्राप्तिः जायते ।

### जन्म

कुलपरम्परानुसारं लक्ष्मणभट्टः स्वभार्यया सह १०० तमं यज्ञं कृतवान् । ततः काशीं अगच्छत्, तस्य छत्तीस्गढस्य रायपुरजनपदान्तर्गते चम्पारण्ये एव चैत्रशुक्लैकादश्यां शुभदिने आचार्याः इलम्मादेव्याः प्रादुरभवन् । तन्नाम वल्लभेति कृतम् ।

### विद्याभ्यासः

श्रीमाधवेन्द्रगुरोः सकाशात् वेदादिशास्त्राणि बालोऽयं पपाठ । तेजस्वी अयं बालसरस्वतीवाक्पतिः नाम्ना प्रसिद्धो बभूव । त्रयोदश (१३) वर्षेषु एव बालोऽयं वेदाङ्गानि, पुराणानि, धर्मशास्त्राणि चाधीत्य विद्वत्सभासु भागमगृह्णत् ।

### शास्त्रार्थः

षोडशवर्षीयः वल्लभः जगन्नाथपुरीमागत्य जगदीशमन्दिरे शाङ्करवेदान्तिभिः सह शास्त्रार्थे विजयमवाप । तत्रैव कृष्णदासः मेधनः आचार्यशेमुषीप्रभावितः तत्प्रथमशिष्यो बभूव । उज्जयिन्यां दामोदरहरसानी अपि शिष्यः बभूव ।

### ग्रन्थरचना

आचार्यः विजयनगरं पुनरागत्य चत्वारि वर्षाणि गहनं शास्त्राभ्यासं विधाय **तत्त्वार्थदीपनिबन्धनं** नामकं ग्रन्थं रचयामास । एवमेव श्रीमद्भागवतस्य भगवद्गीतायाः उपनिषदाञ्च शुद्धाद्वैतं तत्त्वं प्रजासमक्षं प्रकाशयामास । तदर्थमेवाचार्यैः प्रवासारम्भः कृतः, यत्र यत्र च भागवतीकथा कृता, तत्र तत्र अद्यापि महाप्रभोः बेठक इति प्रसिद्धिः वर्तते ।

### विवाहः

आचार्याणां देवेन-भट्टस्य पुत्र्या महालक्ष्म्या सह विवाहः जातः ।

### आचार्यपदप्राप्तिः

विजयनगरनृपकृष्णदेवसमक्षं सप्तविंशति-(२७) दिवसात्मके शास्त्रार्थे विद्वद्भिः सह शाङ्करवेदान्तिनः पराभाविताः । राज्ञा च आचार्यपदवी प्रदत्ता ।

### भगवत्साक्षात्कारः

आचार्याः व्रजगोकुलयात्रायां गोविन्दतटं प्रापुः । तत्र श्रावणशुक्लैकादश्यां मध्यरात्रौ भगवतः श्रीकृष्णस्य साक्षात्कारः जातः । अनेन ब्रह्मसम्बन्धेन प्रमुदिताः ते शरणार्थिभ्यः ब्रह्मसम्बन्धम् अयच्छन् ।

### सम्प्रदायस्थापना

आचार्यैः अडैलग्रामे यमुनातटे उषित्वा तत्रैव पुष्टिसम्प्रदायः संस्थापितः । पुष्टिर्नाम भगवदनुग्रहः, इदमेव तेषामुपदेशहार्दमासीत् ।

## ४. श्रीमध्वाचायः

### प्रादुर्भावः



विक्रमसंवत् चतुर्नवत्यधिकद्वादशशततमे १२९४ माघशुक्लसप्तम्यां मद्रासजनपदान्तर्गते उडुपीक्षेत्रे वेललिग्रामे भार्गवगोत्रे नारायणभट्टस्य भार्यायां वेदवत्यां लोकोत्तरोऽयं पुरुषः प्रकटीबभूव ।

### नामसंस्कारः

पिता श्रीनारायणभट्टः वेदविधिनाऽस्य नामसंस्करणं चकार । वासुदेवेति अभिधानं च विदधत् ।

### बाल्यम्

बाल्ये वयसि वायुदेवावतारभूतः बालोऽयं क्रीडादिषु महतीं रुचिं दधार । जनाश्च तं बालं भीमनाम्ना सम्बोधयन् ।

### अध्ययनं संन्यासश्च

बाल्ये पठनरुचिर्जाता, तस्मात् सहसैव वेद वेदाङ्गपुराणादिशास्त्राणि अनायासेनैव अधिगतानि । ततश्च संन्यस्तुकामः पितरं संन्यासं ययाचे । परं दम्पत्योः स्नेहः स्वाभाविकः तथापि जन्मसिद्धपुत्रस्य योगसिद्धीः चमत्कारान् प्रभावांश्चावलोक्य संन्यासायानुमतिः प्रदत्ता । एकादशे वर्षे श्री अच्युतपक्षाचार्यगुरोः सकाशात् दीक्षां गृहीत्वा पूर्णप्रज्ञाख्यं नाम दधार । वास्तविकं चाध्ययनं संन्यासस्वीकारानन्तरं सम्पन्नम् । शनैः शनैः शिष्य एव गुरुमतं खण्डयित्वा तं योग्यरहस्यपरिपूर्णार्थम् उपादिशत् । आचार्याः पश्चात् यात्रामकुर्वन् । मार्गे च बहुत्र शास्त्रार्थं विधाय नैकान् पराभूय भक्तिमार्गः संस्थापितः । एकस्मिन् स्थाने वेद महाभारत विष्णुसहस्रनाम्नां क्रमशः त्र्यर्थाः दशार्थाः शतार्थाश्च आचार्यैः उपपादिताः । गीताभाष्यं समाप्य ते बदरीनाथं प्रापुः । तत्रैव भगवता ज्ञानावतारेण श्रीव्यासेन शालग्रामत्रयमाचार्येभ्यः प्रदत्तम् । भक्तिसंस्थापनाय आदेशोऽपि प्राप्तः ।

**स्थापना**

आचार्यैः नैकाः श्रीविग्रहाः प्रतिष्ठापिताः । तत्र व्यासप्रदत्तशालग्रामाः क्रमेण सुब्रह्मण्ये उडुपीनगरे मध्यतले च प्रतिष्ठापिताः । तुलुबान्तिके नौकायानेन सह जलमग्ना गोपीचन्दनाच्छादिता श्रीकृष्णचन्द्रमूर्तिः स्वप्नादेशानुसारं निष्कास्य, उडुपीनगरे च प्रतिष्ठापिता ।

**परमपदावाप्तिः**

सरवन्तस्थाने परमधामजिगमिषवः आचार्याः पद्मनाभतीर्थेभ्यः भगवद्रामविग्रहं व्यासप्रदत्तशालग्रामत्रयञ्च प्रदाय द्वैतमतप्रचारं च आदिश्य क्षमामिमां तत्यजुः ।

## ५. श्रीनिम्बार्काचार्यः



भारतभूः आचार्याणां महापुरुषाणां च वर्तते । अत्र नैके महापुरुषाः भक्तिमार्गप्रवर्तकाः ज्ञानमार्गप्रवर्तकाः कर्ममार्गप्रवर्तकाः अभवन्, भवन्ति, भविष्यन्ति च । तत्रापि भारतस्य दक्षिणप्रान्तः आचार्याणां जन्मादाताऽस्ति ।

**जन्मस्थलम्**

दक्षिणे देशे गोदावरीनदीतटस्थे वैदूर्यपत्तनस्यान्तिके अरुणाश्रमे श्रीअरुणमुनेः भार्यायाः जयन्तीदेव्याः गर्भावतीर्णाः आचार्यचरणाः । केचन एतज्जनकत्वेन जगन्नाथं मन्वानाः, भगवदायुधस्य सुदर्शनस्य अवतारं चाचार्यं स्वीकुर्वन्ति ।

**समयः**

सूर्यावताराणाम् आचार्याणां श्रीनिम्बार्काणां समयविषये विपश्चितां विमतिः दृश्यते । केचन भक्ताः द्वापरयुगम्, केचन पञ्चशताब्दीं च आचार्यसमयं स्वीकुर्वन्ति । परं वर्तमानान्वेषकाः महता प्रयत्नेन प्रमाणैश्च एकादशशताब्दीं आचार्याणां समयत्वेन वदन्ति ।

**सम्प्रदायः**

आचार्याणां विषये एवं श्रूयते यदेतदुपनयनसंस्कारकाले स्वयं देवर्षिः नारदः समुपस्थाय आचार्येभ्यः श्रीकृष्णोपासनायाः उपदेशं चकार । अतः आचार्याणां गुरुः नारदः, तद्गुरुः सनकादयः एवमयं सम्प्रदायः सनकादिसम्प्रदायनाम्ना प्रख्यातो बभूव ।

**जीवनम्**

अस्य पूर्वतनीयं नाम नियमानन्द आसीत् । एकदा आचार्याः मथुरायाः समीपे यमुनातटवर्तिनि ध्रुवक्षेत्रे न्यवसन्, तदा एकः दण्डी जैनसाधुर्वा समागतः । आचार्यसाध्वोः आध्यात्मिकचर्चाभवत् । तत्र वैदिकसिद्धान्तविरुद्धं विषयं साधुः उपपादयत् । तदा आचार्याः अत्यन्तं खेदमापुः । यदा आचार्यहृदये भगवता वेदना दृष्टा, तदा एका लीला कृता । आश्रमान्तिकस्थे निम्बवृक्षे सूर्यो प्रकाशितः । सर्वे आश्चर्यम् अन्वभवन् । आचार्यहृदयं च प्रेमाप्लावितमभूत् । आचार्यदृष्ट्या तु तदाराध्यः भगवान् स्वयं श्रीकृष्णः सूर्यरूपेण समुपस्थितः । ते चातिथिमभोजयन् तदैव सूर्योऽस्तं गतः । भक्ताः भगवत्कृपामिमां आचार्ययोगसिद्धिरूपेण अगृह्णन् । तद्दिनादेव आचार्य-नामाभिधानं निम्बादित्यः निम्बार्कः वा इत्यभवत् ।

### ग्रन्थरचना

आचार्यचरणैः कति ग्रन्थाः रचिता स्युः ? इति निर्णेतुमशक्यम् । साम्प्रतं वेदान्तसूत्रेषु लिखितं भाष्यम्-वेदान्तपारिजातसौरभमेकमेव प्राप्यते ।

### शिष्यपरम्परा

आचार्याणां विरक्तशिष्यस्य अनुयायिनः विरक्ताः । गृहस्थशिष्यस्य हरिव्यासस्य अनुयायिनः गृहस्थाः शिष्याः भवन्ति । सम्प्रदायेऽस्मिन् श्रीराधाकृष्णपूजा भवति । भक्ताः गोपीचन्दनं धारयन्ति । श्रीमद्भागवतञ्च सम्प्रदायेऽस्मिन् प्रधानशास्त्रत्वेन स्वीकृतमस्ति ।

## स्वाध्यायः

### १. योग्यविकल्पं चित्वा उत्तरं लिखत ।

(१) जगद्गुरुशङ्कराचार्यस्य जन्म कस्मिन् राज्ये अभवत् ?

(क) कर्णाटके (ख) गुजराते (ग) महाराष्ट्रे (घ) केरले

(२) वैशाखमासस्य शुक्लपक्षस्य कस्यां तिथौ शङ्कराचार्यस्य जन्म अभवत् ?

(क) तृतीयायाम् (ख) पञ्चम्याम् (ग) दशम्याम् (घ) द्वादश्याम्

(३) विशिष्टाद्वैतवेदान्तस्य प्रवर्तकः कः ?

(क) शङ्कराचार्यः (ख) मध्वाचार्यः (ग) रामानुजाचार्यः (घ) निम्बार्काचार्यः

(४) भगवान् सूर्यनारायणः कस्मै दर्शनं दत्तवान् ?

(क) शङ्कराचार्यः (ख) मध्वाचार्यः (ग) रामानुजाचार्यः (घ) निम्बार्काचार्यः

(५) वायुदेवस्य अवतारः कः ?

(क) शङ्कराचार्यः (ख) मध्वाचार्यः (ग) रामानुजाचार्यः (घ) निम्बार्काचार्यः

(६) गुजरातराज्ये शङ्कराचार्यैः कः मठः स्थापितः ?

(क) शङ्करमठः (ख) श्रीमठः (ग) शारदामठः (घ) देवीमठः

(७) सनकादयः कस्य आदिगुरवः ?

(क) रामानुजस्य (ख) शङ्करस्य (ग) वल्लभस्य (घ) निम्बार्कस्य

### २. रिक्तस्थानं पूरयत ।

(१) निम्बार्काचार्यस्य सिद्धान्तः ______________ नाम्ना प्रसिद्धः ।

(२) रामानुजाचार्यस्य जन्म ______________ ग्रामे अभवत् ।

(३) शङ्कराचार्यस्य जन्म ______________ नद्याः तटे जातः ।

(४) शङ्कराचार्यस्य ______________ वर्षाणि पृथिव्यां निवासः आसीत् ।

(५) रामानुजाचार्यैः ______________ ग्रन्थाः रचिताः ।

### ३. युग्मानि योजयत ।

| अ | ब |
|---|---|
| (१) अद्वैतः | (१) निम्बाकाचार्यः |
| (२) विशिष्टाद्वैतः | (२) मध्वाचार्यः |
| (३) द्वैतः | (३) बलदेवाचार्यः |
| (४) शुद्धाद्वैतः | (४) रामानुजाचार्यः |
| (५) द्वैताद्वैतः | (५) वल्लभाचार्यः |
| | (६) शङ्कराचार्यः |

### ४. एकवाक्येन उत्तरं लिखत ।

(१) रामानुजाचार्यस्य मातापित्रोः नाम किमासीत् ?

(२) वल्लभाचार्यस्य पत्न्याः नाम किमासीत् ?

(३) कस्य गुरुः नारदः वर्तते ?

(४) सुदर्शनस्य अवताररूपाः के ?

(५) शङ्कराचार्यः कस्मिन् वयसि सन्यस्ताः अभूवन् ?

### ५. द्वित्रवाक्यैः उत्तरं लिखत ।

(१) रामानुजाचार्यस्य त्रयाणां ग्रन्थानां नामानि लिखत ।

(२) शङ्कराचार्यैः लिखितानां त्रयाणां ग्रन्थानाम् उल्लेखः कार्यः ।

(३) वल्लभाचार्याः कुत्र कुत्र भगवदाराधनं कृतवन्तः ?

### ६. टिप्पणीं लिखत ।

(१) वल्लभाचार्यः

(२) मध्वाचार्यः

(३) निम्बार्काचार्यः

### ७. सविस्तरम् उत्तरं लिखत ।

(१) रामानुजाचार्यस्य जीवनं परिचाययत ।

(२) शङ्कराचार्यस्य बाल्यकालस्य विवरणं कुरुत ।

(३) शङ्कराचार्यैः कति ग्रन्थाः लिखिताः ? नामानि लिखत ।

# १३ ब्रह्मसूत्रपरिचयः

## प्रास्ताविकम्

दर्शनशास्त्राणि सर्वेभ्यः दृष्टिं यच्छन्ति । तत्त्वदर्शनं दृष्टिं विना न भवति । दर्शनम् अपि यथार्थं भवेत् । कपोलकल्पितेन दर्शनेन वस्तुनः, पदार्थस्य च यथार्थं ज्ञानं न भवति । विना यथार्थज्ञानं अज्ञानं न नश्यति । वेदान्तदर्शनं पदार्थस्य मूलरूपं दर्शयति । मूलतत्वज्ञानाय अस्मान् शास्त्रमिदम् उपकरोति । तदर्थम् एव वेदान्ते प्रस्थानत्रयम् आविर्भूतम् । तत्र च श्रुतिप्रस्थानम्, स्मृतिप्रस्थानम्, तर्कप्रस्थानम् इत्येतैः ब्रह्मज्ञानाय मार्गः प्रशस्तो भवति । तत्र तर्कप्रस्थानम् श्रुतिस्मृत्योः प्रस्थानयोः साररूपम् वर्तते । श्रुतिस्मृत्योः तार्किकम् उपपादनं प्रस्थानेऽस्मिन् दृश्यते । विना तर्कं शास्त्रं शासयितुं न शक्नोति, तदर्थमेव तर्कप्रस्थानं प्रस्थितम् । तद्विषये पाठेऽस्मिन् कश्चन विचारः प्रस्तूयते ।

## ब्रह्मसूत्रम्

तर्कप्रस्थानम् न्यायप्रस्थानम् इति नामान्तरेण अपि सुप्रसिद्धम् । भगवता वेदव्यासेन ब्रह्मसूत्राणि विरचय्य प्रस्थानमिदं प्रवर्तितम् । ब्रह्मसूत्राणि श्रीमद्भगवद्गीतौपनिषदोः जटिलान् अर्थान् सूत्रयन्ति । विना ब्रह्मसूत्रं गीतोपनिषदोः अर्थावबोधः दुष्करो भवति । प्रायः सर्वाणि अपि शास्त्राणि सूत्रग्रन्थमूलकानि एव सन्ति । भारतस्य प्राचीनाः नैकान् ग्रन्थान् रचितवन्तः । ते सर्वेऽपि सूत्रेषु एव ग्रथिताः । अगाधज्ञानसागरः स्वल्पपात्रभूते सूत्रे ग्रथितव्यम् इति कञ्चन सरलात् कठिनं प्रति मार्गः प्रादर्शि अस्मद्पूर्वजैः । तद्यथा **यथा पिण्डे तथा ब्रह्माण्डे** इति सूत्रेण समस्तस्य ब्रह्माण्डस्य निरुपणम् सरलतया कृतम् । तद्वत् ज्ञानसागरः सूत्रेषु ग्रथितः भगवता वेदव्यासेन । किन्नाम सूत्रम् ?

**स्वल्पाक्षरमसन्दिग्धं सारवद्विश्वतो मुखम् ।**
**अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदुः ॥**

**सूत्रम्**

अल्पाक्षरं | विश्वतोमुखम् | असन्दिग्धम् | सारवत् | अस्तोभम् | अनवद्यम्

| | | |
|---|---|---|
| अल्पाक्षरम् | = | स्वल्पाक्षरैर्पदैर्वा युक्तम् । |
| असन्दिग्धम् | = | सन्दिग्धपदानाम् । |
| सारवद् | = | सारयुक्तम् । |
| विश्वतोमुखम् | = | बहुमुखव्याख्यानयोग्यम् । |
| अस्तोभं | = | अर्थज्ञानबाधरहितम् । |
| अनवद्यं | = | अनिन्द्यम् |

उदाहरणरूपेण पश्यामश्चेत् –

### मातृदेवो भव

इदमेकं सूत्रम् । सूत्रेणानेन अल्पाक्षरैः समस्तस्य जीवनस्य सारः ग्रथितः । न कश्चन बाधयितुं शक्नुयात् तादृशमिदं सूत्रम् ।

एतादृशानि बृहन्ति सूत्राणि सूत्रितानि महर्षिभिः बादरायणैः ब्रह्मस्वरूपावगमनाय । न केवलं भगवता बादरायणेन एव सूत्राणि रचितानि । अपि च षड्वेदाङ्गानि आस्तिकनास्तिकदर्शनानि अपि सूत्रितानि विद्यन्ते । भक्तिसूत्राणि अपि नारदशाण्डिल्ययोः सन्ति । व्याकरणशास्त्रे तु अर्धमात्रालाघवेन पुत्रोत्सवः, पुत्रजन्मानन्दः अनुभूयते ।

किन्नाम ब्रह्म ? ब्रह्म अर्थात् यद् बृहत् अस्ति तद् । ब्रह्म तदेव भवति यद् सर्वेभ्यः परं भवेत्, अनादिः भवेत् । तदेव ब्रह्म । आदिशङ्कराः विष्णुसहस्रनाम्नि आमनन्ति यद् **तपो वेदाश्च विप्राश्च ज्ञानं च ब्रह्म-संज्ञितम्** इति । तथा च श्रीमद्रामानुजाचार्याः निगदन्ति यद् **स्वरूपेण गुणतश्च यत् निरतिशयं बृहत् तद् ब्रह्म ।** अन्ये सर्वेऽपि आचार्याः इममेव अनुसरन्ति ।

एतादृशं ब्रह्म स्वल्पाक्षरैः यत्र ग्रथितं तदेव ब्रह्मसूत्रम् । सूत्राणि इमानि भगवता व्यासेन एव सूत्रितानि । परन्तु यस्य आचार्यस्य यादृशी दृष्टिः तादृशः अर्थः उपपादितः । केनचित् अक्षरस्वारस्येन, केनचित् क्लिष्टकल्पनया अथवा अध्याहारार्थापत्तिभ्याम् अर्थः चिन्तितः । अत एव तदाधारेण विषयभेदः सिद्धान्तभेदः अपि सर्वत्र दृश्यते । एतस्य ब्रह्मसूत्रस्य शारीरकमीमांसा इति नामान्तरं दृश्यते । शरीरे भवं शारीरम् । तदधिकृत्य रचितमिदं शारीरकशास्त्रम्, अर्थात् ब्रह्मशास्त्रम् । प्रायः एतेषां सूत्राणां संख्या षट्पञ्चाशदधिक पञ्चशतम् (५५६) वर्तते । परन्तु आचार्याः स्वसिद्धान्तानुगुणं सूत्रसंङ्ख्यां व्यत्यस्तं कुर्वन्ति । तद्यथा

### ब्रह्मसूत्राणां सङ्ख्या

| शङ्करः | रामानुजः | वल्लभः | भास्करः | मध्वः | निम्बार्कः | विज्ञानभिक्षुः | श्रीकण्ठः | बलदेवः |
|---|---|---|---|---|---|---|---|---|
| ५५५ | ५४५ | ५५५ | ५४७ | ५६२ | ५४१ | ५५६ | ५४५ | ५५६ |

एतदाधारेण वक्तुं शक्नुमः यद् आचार्याणां सर्वेषां परस्परं साम्प्रदायिकभेद एव न, अपितु पाठभेदः सूत्रभेदश्च बहुधा दृश्यते ।

उदाहरणरूपेण पश्यामश्चेद् शङ्कररामानुजानुसारं **जन्माद्यस्य यतः, शास्त्रयोनित्वात्** इति सूत्रद्वयम् । परन्तु वल्लभाचार्यस्य मतानुसारं **जन्माद्यस्य यतः शास्त्रयोनित्वात्** इति सूत्रमेकमेव । बलदेवाचार्यं त्यक्त्वा सर्वेऽपि आचार्याः **हेयत्वावचनाच्च** इति प्रतिपादयन्ति । परन्तु बलदेवः **हेयत्वं वचनाच्च** इत्येवं पृथक् उपपादयति । ब्रह्मसूत्रे चत्वारः अध्यायाः, प्रत्येकस्मिन्नपि अध्याये पाठभेदेन सूत्रसङ्ख्याभेदः भवति । सर्वेषाम् अपि अध्यायानां सूत्रसङ्ख्या अत्र विस्तरभयात् वक्तुं न शक्यते, परन्तु उदाहरणदृष्ट्या प्रथमाध्यायस्य विषये पश्यामः –

### ब्रह्मसूत्रप्रथमाध्यायसूत्रसंख्या

| शङ्करः | रामानुजः | वल्लभः | भास्करः | मध्वः | निम्बार्कः | विज्ञानभिक्षुः | श्रीकण्ठः | बलदेवः |
|---|---|---|---|---|---|---|---|---|
| १३४ | १३८ | १३४ | १३३ | १३५ | १३७ | १३४ | १३८ | १३५ |

इत्येवं रूपेण प्रत्येकस्मिन्नपि अध्याये आचार्यानुगुणं कश्चन संङख्याभेदः वर्तते । चत्वारः अपि अध्यायाः चतुर्भिः पादैः युक्ताः सन्ति । तत्रापि नैके विषयाः । विषयाधारेण अधिकरणभेदः भवति । यथा सूत्रसङख्यायां मतभेदः तथा अधिकरणसंङ्ख्यायामपि मतभेदः । तद्यथा –

**अधिकरणसंख्या**

| | | | |
|---|---|---|---|
| आचार्यः | श्रीशंङ्करः | – | १९१ |
| आचार्यः | श्रीरामानुजः | – | १५६ |
| आचार्यः | श्रीवल्लभः | – | १६२ |
| आचार्यः | श्रीमध्वः | – | २२३ |
| आचार्यः | श्रीनिम्बार्कः | – | १५१ |
| आचार्यः | श्रीबलदेवः | – | १९८ |
| आचार्यः | श्रीकण्ठः | – | १७२ |

भास्करविज्ञानभिक्षुभ्याम् अधिकरणविषये किमपि नोक्तम् ।

ब्रह्मसूत्रे चत्वारः अध्यायाः सन्ति ।

(१) समन्वयाध्यायः

अध्यायेऽस्मिन् अनेकासां श्रुतीनां परब्रह्मस्वरूपावगमनाय परस्परसमन्वयः साधितः ।

(२) अविरोधाध्यायः

अस्मिन् अध्याये विरुद्धदर्शनानि खण्डयित्वा युक्तिप्रमाणाभ्यां वेदान्तमते अविरोधः प्रस्थापितः ।


(३) साधनाध्यायः

अत्र जीवब्रह्मणोः लक्षणानि विनिर्दिश्य, मोक्षस्य अन्तरङ्गबहिरङ्गसाधनानाम् उल्लेखः दृश्यते ।

(४) फलाध्यायः

अस्मिन् अध्याये जीवन्मुक्तिः, जीवस्य उत्क्रान्तिः, सगुणनिर्गुणोपासानयोः फलभेदः इत्यादि विषयाः निरूपिताः ।

इत्येवं रूपेण ब्रह्मसूत्राणाम् अध्ययनात् परमात्मज्ञानं सुकरं भवतीति ज्ञातुं शक्यते ।



**ब्रह्मसूत्रकारपरिचयः**

सम्पूर्णमपि वैदिकं लौकिकञ्च साहित्यं व्यासमूलकं तत्संस्पृष्टं वा वर्तते । महर्षिव्यास एव वेदविभाजनकर्ता, महाभारतस्य रचयिता, अष्टादशपुराणप्रस्तोता, योगशास्त्रशास्ता तथा तर्कप्रस्थानरूपब्रह्मसूत्रप्रस्तोता इत्यत्र सर्वेषामपि भारतीयैतिह्यविदां विपञ्चिद्वराणाञ्चैकमत्यं वर्तते । अर्थात् महर्षिः स्वस्य कार्यगरिम्णा महिम्ना च पाराशर्यः, वेदव्यासः, कृष्णद्वैपायनः, सत्यवतीसुतः चेति साहित्ये प्रथितः संस्तुतश्च ।

**समय :**

सोऽयं महर्षिः व्यासः महाभारतस्य युद्धकाले समुपस्थित आसीदिति महाभारतस्य अध्ययनेन सम्यग्ज्ञातं भवति । युद्धसमयविषये समयविदां विदुषां भूयान्भेदः वर्तते । केचन तत्र ई. पू. त्रिसहस्र (३०००) वर्षमितं कालं व्यवस्थापयन्ति । अपरे ई. पू. १४०० वा १५०० वर्षमितः कालः इति वदन्ति । परं ईसवीयद्वितीये तृतीये वा शतके ग्रन्थोऽयं विद्यमान आसीदिति सर्व एव अविरोधेन स्वीकुर्वन्ति । ते च हेतुत्वेन पुरस्कुर्वन्ति यत् – ४४२ एकस्मिन् शिलालेखे उक्तम् शतसाहस्र्यां संहितायां वेदव्यासेनोक्तम् – इति वचनं विनिगमकरूपेण । एतैश्च प्रमाणैः श्रीव्यासस्य समयः ई. पू. पञ्चशतवर्षेभ्यः पूर्वतनं निर्धार्यते । पौराणिकदृष्ट्या तु भगवदवतारभूतोऽयं अतीव प्राचीन इति । श्रीमद्भागवतस्य प्रथमस्कन्धस्य चतुर्थाध्याये श्रीव्यासप्रादुर्भावः वर्णितोऽस्ति । पञ्चमाध्याये श्रीनारदोपदेशेन श्रीकृष्णयशोगाथा–गुम्फनाय प्रचोदनादिकं विस्तृतं वर्णितं दृश्यते ।

यथा –

**द्वापरे समनुप्राप्ते तृतीये युगपर्यये ।**
**जातः पराशराद्योगी वासव्यां कलया हरेः ॥**

(श्रीमद्भागवतम् – ०१-०४-१४)

**प्रतिभा कार्याणि च**

अयं हि पराशरस्य पुत्रत्वात् पाराशर्यः, वेदान् विव्यास तेन च व्यासः, कृष्णवर्णत्वात्कृष्णः, द्वीपसम्भवाच्च द्वैपायनः, बदरीवनतपस्तप्तत्वात् निवासाधिकतया वा – बादरायणः, एवं पुराणादिषु ग्रन्थेषु – विविधाम् आख्यां धारयति ।

अनेन महामहिमशालिना समाजाय समयोचितं सरलं सरसं च ज्ञानं धर्मसाधकम्, अर्थदायकम् कामकम् मोक्षकारकम् च वेदविस्तारकर्मभिः पुराणरचनाभिः च अदायि ।

भगवता वेदव्यासेन नैके ग्रन्थाः रचिताः । ते यथा –

(१) महाभारतम्

(२) अष्टादशपुराणानि ।

(३) व्यासस्मृतिः

(४) ब्रह्मसूत्राणि

(५) योगदर्शनभाष्यम् इत्येवमनेकानि शास्त्राणि रचितानि ।

पौराणिकैतिह्यदर्शनेन श्रीव्यासः भगवतः ज्ञानावतारः जगति अन्धकारविनाशाय मोहमायानिरासाय ज्ञानदीपप्रज्वलनाय भक्तजनानन्दहेतवे च अवततार ।

## स्वाध्यायः

### १. योग्यविकल्पं चित्वा उत्तरं लिखत ।

(१) ब्रह्मसूत्रं केन विरचितम् ?

(क) पराशरेण (ख) व्यासेन (ग) गर्गेण (घ) वैशम्पायनेन

(२) एतेषु सूत्रलक्षणे किम् अन्तर्भूतं न भवति ?

(क) असन्दिग्धं (ख) सारवत् (ग) अस्तोभम् (घ) अवद्यम्

(३) भगवतः व्यासस्य मातुः नाम किमासीत् ?

(क) सत्यवती (ख) गंगा (ग) कुन्ता (घ) देवकी

(४) ब्रह्मसूत्रे कति अध्यायाः ?

(क) त्रयः (ख) चत्वारः (ग) पञ्च (घ) षट्

(५) ब्रह्मसूत्रस्य प्रत्यध्याये कति पादाः सन्ति ?

(क) त्रयः (ख) चत्वारः (ग) पञ्च (घ) षट्

(६) रामानुजाचार्यानुसारं ब्रह्मसूत्रे कति सूत्राणि ?

(क) ५५५ (ख) ५४५ (ग) ५४७ (घ) ५६२

(७) शङ्कराचार्यानुसारं ब्रह्मसूत्रे कति सूत्राणि ?

(क) ५५५ (ख) ५४५ (ग) ५४७ (घ) ५६२

## २. रिक्तस्थानं पूरयत ।

(१) स्वल्पाक्षरं ______________ विदुः ।

(२) आचार्य श्रीशङ्करस्य मतानुसारं ब्रह्मसूत्रे ______________ अधिकरणानि सन्ति ?

(३) ब्रह्मसूत्रे प्रथमाध्यायस्य नाम ______________ अस्ति ।

(४) ब्रह्मसूत्रम् अर्थात् प्रस्थानत्रयेषु ______________ प्रस्थानम् ।

(५) शारीरकशास्त्रस्य द्वितीयं नाम ______________ अस्ति ।

## ३. युग्मानि योजयत ।

| अ | ब |
|---|---|
| (१) श्रीशङ्कराचार्यः | (१) १७२. अधिकरणानि |
| (२) श्रीरामानुजाचार्यः | (२) १९१. अधिकरणानि |
| (३) श्रीवल्लभाचार्यः | (३) १५६. अधिकरणानि |
| (४) श्रीमध्वाचार्यः | (४) १६२. अधिकरणानि |
| (५) श्रीनिम्बार्काचार्यः | (५) १५१. अधिकरणानि |
| | (६) १९१. अधिकरणानि |

## ४. एकवाक्येन उत्तरं लिखत ।

(१) भगवतः वेदव्यासस्य मातापित्रोः नाम लिखत ।

(२) भगवतः वेदव्यासस्य जन्म कस्मिन् युगे जातः ?

(३) ब्रह्मसूत्रस्य द्वितीयाध्यायस्य किन्नाम ?

(४) ब्रह्मसूत्रस्य तृतीयाध्यायस्य किन्नाम ?

(५) ब्रह्मसूत्रस्य चतुर्थाध्यायस्य किन्नाम ?

## ५. द्वित्रवाक्यैः उत्तरं लिखत ।

(१) फलाध्यायस्य प्रतिपाद्यः विषयः कः ?

(२) अविरोधाध्याये किं प्रतिपादितम् ?

(३) साधनाध्याये किं निरूपितम् ?

## ६. टिप्पणीं लिखत ।

(१) ब्रह्मसूत्रम् ।

(२) सूत्रम् ।

(३) महर्षिः व्यासः ।

## ७. सविस्तरम् उत्तरं लिखत ।

(१) ब्रह्मसूत्रे सूत्रसंख्याविषये आचार्याणां मतभेदम् उपवर्णयत ।

(२) सूत्रलक्षणं विवृणुत ।


(३) आचार्याणां परस्परं सूत्रसंख्याभेदः कथम् ?

# १४ श्रीमद्भगवद्गीतापरिचयः

## प्रस्तावना

भारतीयसंस्कृतेः महान् ग्रन्थोऽस्ति श्रीमद्भगवद्गीता । भगवद्गीता भारतीयानां आत्ममनसोः निरन्तरं प्रचोदकः परमपवित्रः ग्रन्थोऽस्ति । भगवतः दिव्यवाणिरिति ख्यातायाः गीतायाः महोन्नतं दार्शनिकं स्थानं विद्यते । भगवद्गीता न केवलं भारतीयभाषासु, अपि तु विविधासु वैदेशिकभाषासु अनूदिता सति सम्पूर्णे जगति सुप्रसिद्धाऽस्ति । अस्या आध्यात्मिकया महोन्नत्या जगति सर्वेऽपि आश्चर्यचकिताः सन्ति । सनातनधर्मस्य सारसर्वस्वं बोधयित्री भगवद्गीता भारतीयसंस्कृतेः संवर्धने मुख्यं पात्रं निर्वहति ।

## गीताशब्दार्थः



महर्षिणा वेदव्यासेन प्रणीता, पञ्चमवेदेति प्रख्याता, महाभारतस्य भीष्मपर्वणि समागता श्रीमद्भगवद्गीता वेदोपनिषदां सारसंग्रहोऽस्ति ।

**सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः ।**
**पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत् ॥**

(गीतामाहात्म्यम्-३)

भगवद्गीता प्रस्थानत्रयेषु अन्यतमाऽस्ति । सप्तशतश्लोकैः, अष्टादशाध्यायैश्च निरूपिता भगवद्गीता अपूर्वः ग्रन्थोऽस्ति । लघु-लघुश्लोकैः अध्यात्मरहस्यं बोधयन्ती भगवद्गीता अत्यन्तं प्रभावशालिनी प्रतिभाति ।

श्रीकृष्णेन अर्जुनाय प्रतिबोधितम् उपदेशामृतमेव भगवद्गीताऽस्ति । भगवतः गीता, भगवता गीता वेति भगवद्गीताशब्दार्थः निरुच्यते । भगवतः उदात्ततां, प्रसन्नतां दिव्यानुभूतिं चोत्पाद्य आत्मानन्दप्रदायिनी गीता एव भगवद्गीता ।

## गीतायां योगशब्दार्थः

गीतायां योगशब्दस्य नैके अर्थाः दृग्गोचरीभवन्ति । तत्र प्राधान्येन अर्थत्रयम् स्वीक्रियते ।

युजिर् योगे इति धातोः निष्पन्नः योगशब्दः, यस्याऽर्थोस्ति सिध्यसिध्योः समरूपेण परमात्मना सह नित्यसम्बन्धः, यथा - **समत्वं योग उच्यते** (भ.गी.२-४८) एष एवार्थः गीतायां प्रामुख्येन दृश्यते ।

युज् समाधौ इति धातोः निष्पन्नः योगशब्दः, यस्यार्थोऽस्ति-चित्तस्य स्थिरता अर्थात् समाधौ स्थितिः, यथा-

**यत्रोपरमते चित्तं निरुद्धं योगसेवया (भ.गी. ६-२०) इति ।**

युज् संयमने इति धातोः निष्पन्नः योगशब्दः, यस्यार्थोऽस्ति - संयमनम्, सामर्थ्यम्, प्रभावश्च ।

यथा - **पश्य मे योगमैश्वरम् (भ.गी. ९-५)**

गीतायां यत्र कुत्राऽपि योगशब्दः समायातोऽस्ति तत्र सर्वत्र उपर्युक्तेषु त्रिष्वर्थेषु एकस्य मुख्यता तथा शेषयोर्द्वयोः गौणताऽस्ति । **युजिर् योगेति** समारब्धे योगशब्दे समतार्थः मुख्योऽस्ति, परन्तु समतायां समागतायां स्थिरतासामर्थ्ये स्वत एवागच्छतः । **युज् समाधौ** इति धातुजे योगशब्दे स्थिरताया मुख्यतास्ति, स्थिरतायां समागतायां समता सामर्थ्ये स्वत एव

आगच्छतः । **युज् संयमने** इति धातोः प्रादुर्भूतस्य योगशब्दस्य मुख्यार्थोऽस्ति सामर्थ्यम्, परन्तु सामर्थ्ये समागते समतास्थिरते स्वत एव आयातः । अतः गीताया योगशब्दः अतीव व्यापकः गम्भीरार्थकश्चास्ति ।

### योगत्रयपरिचयः

भगवद्गीतायां कर्मयोगः, भक्तियोगः, ज्ञानयोगश्चेति त्रयो योगाः सन्ति ।

| योगः | कर्मयोगः | ज्ञानयोगः | भक्तियोगः |
|---|---|---|---|
| सम्बन्धः | शरीरम् | शरीरी (जीवात्मा) | शरीर-शरीरिणोः स्वामी (परमात्मा) |
| उपयोगः | जगत् | आत्मा | भगवान् |

शरीरमधिकृत्य कर्मयोगः, शरीरिणमधिकृत्य ज्ञानयोगः, तथा शरीर-शरीरिणोः स्वामिनमधिकृत्य (परमात्त्मानम्) भक्तियोगश्च प्रवर्तते । अर्थात् मनुष्यः कर्मयोगेन जगतः, ज्ञानयोगेन आत्मनः, भक्तियोगेन च भगवत उपयोगी भवितुर्महति ।

संसारे वस्तुना व्यक्त्या च सह अस्माकं संयोगः भवति । यत्र संयोगो भवति तत्रैव कर्तव्यपालनस्य आवश्यकता विद्यते । वस्तुनः संयोगे सति तस्मिन् ममतां विहाय तस्य अन्येषां सेवायै उपयोगः अस्माकं कर्तव्यं भवति । व्यक्तेः संयोगे सति तस्यां व्यक्तौ ममतां विहाय तस्य सेवाकरणं, तस्मै सुखप्रदानं च भवत्यस्माकं कर्तव्यम् । यो जनः कामनाममताभ्यां रहितस्सन् कर्तव्यपालनं करोति, सः संसारस्य संयोगाद् वियुक्तो भवति, योगञ्च प्राप्नोति । **तं विद्याद् दुःखसंयोगवियोगं योगसंज्ञितम्** (भ.गी. ६-२३) । संयोगस्य वियोगस्तु भवति, परन्तु योगस्य वियोगः कदापि न भवति । योगप्राप्त्या मनुष्यः राग-द्वेष-काम-क्रोधादिविकारैः सदा मुक्तो भवति । तथा सः स्वाधीनता-निर्विकारता-असंगता-समतादिगुणैः विभूषितो भवति ।

### प्रस्थानत्रयेषु गीता

श्रीमद्भगद्गीतायाः महिमा अगाधः असीमश्चास्ति । अयं भगवद्गीताग्रन्थः प्रस्थानत्रयेषु परिगण्यते । मनुष्यमात्रस्य उद्धारार्थं त्रयोराजमार्गाः प्रस्थानत्रयनाम्ना अभिधीयन्ते । प्रथमं वैदिकप्रस्थानम् - यच्च उपनिषन्नाम्ना कथ्यते । द्वितीयं दार्शनिकप्रस्थानम् - यञ्च ब्रह्मसूत्रमिति कथयन्ति । तृतीयं स्मार्तप्रस्थानम् - यञ्च भगवद्गीतेति आमनन्ति । उपनिषत्सु मन्त्राः, ब्रह्मसूत्रेषु सूत्राणि तथा भगवद्गीतायां श्लोकाः सन्ति । भगवद्गीतायां श्लोकेषु सत्स्वपि भगवद्वाणीति कारणतः एते मन्त्रतुल्याः भवन्ति । एते श्लोकाः गभीरार्थकाः सन्तीति कारणतः सूत्रतुल्यानि भवन्ति । उपनिषदः तदधिकारिपुरुषैः काम्यन्ते चेत्, ब्रह्मसूत्राणि विद्वद्भिः सेव्यन्ते, परन्तु भगवद्गीता सर्वमानवैः संसेव्यास्ति ।

### गीतायाः संक्षिप्तपरिचयः

महाभारतस्य युद्धारम्भे मोहमुपगताय विषीदते अर्जुनाय श्रीकृष्णेन य उपदेशः प्रदत्तः स एव भगवद्गीतानाम्ना ज्ञायते । तदुक्तं गीतामाहात्म्ये-

**पार्थाय प्रतिबोधितां भगवता नारायणेन स्वयम् ।**
**व्यासेन ग्रथितां पुराणमुनिना मध्ये महाभारतम् ॥**
**अद्वैतामृतवर्षिणीं भगवतीमष्टादशाध्यायिनीम् ।**
**अम्ब ! त्वामनुसन्दधामि भगवद्गीते भवद्वेषिणीम् ॥**

(गीतामाहात्म्यम्-१)

**सरलार्थः** – इवं गीता कृष्णवतारिणा भगवता नारायणेन स्वयं पृथानन्दनाय नराय प्रतिबोधितास्ति । प्राचीनमुनिना महर्षिणा व्यासेन महाभारतस्य मध्ये ग्रन्थरूपेण निबद्धास्ति । अष्टादशाध्यायात्मिका भगवद्वाङ्मयरूपिणी गीता अद्वैतरूपाम् अमृतवर्षां वर्षयति । अतः हे मातः ! भगवद्गीते । संसारोच्छेदकारिणि ! त्वां तवसाधकोऽहं सर्वदा अनुसंधानं करोमि इति भावः ।

## गीताविचारः

भगवद्गीतायां सर्वेषां योगानां समन्वयो दृश्यते । मानवजीवनस्य पथप्रदर्शिका भगवद्गीता–कर्मयोगं, भक्तियोगं, ज्ञानयोगं, ध्यानयोगञ्च विवृणोति । गीताश्लोकेषु मानवजीवनस्य संचोदकानां सूक्ष्मविचाराणां भावप्रवाहः सन्ततं प्रवहति । व्यक्तेः जीवने नैराश्यं दूरीकृत्य आत्मविश्वासमुत्पाद्य नैतिकमूल्यानां संवर्धनेन च महत्तरं सन्देशं प्रददाति गीता ।

जीवनस्य नैकविधसमस्यानां समाधाने, संकष्टानां निवारणे च गीता सर्वदाऽस्मान् प्रेरयति । सुख–दुःखेषु कथं व्यवहरणीयमिति शिक्षयति । प्रवृत्तिमार्गेम् अनिवार्यमिति दर्शयन्ती भगवद्गीता स्वयमेव निवृत्तिमार्गस्य राजपथम् उद्घाटयति ।

अत एव विद्वांसः भगवद्गीतां जीवनधर्मशास्त्रम् जीवनयोगशास्त्रम् चेति कथयन्ति ।

## गीतायाः स्वरूपम्

लोकेऽस्मिन् ज्ञानप्रदानि मनोरञ्जकानि सत् शिक्षाप्रदायकानि साधनभूतानि चानेकानि पुस्तकानि सन्ति, किन्तु न सर्वाणि सर्वेभ्यो रोचन्ते, यतः **मुण्डे मुण्डे मतिर्भिन्ना** इति श्रीमद्भगवद्गीता तादृशः ग्रन्थोऽस्ति, यस्याः नामापि कर्णशष्कुलीं स्पृशदेव तनुं पुलकयति, हृदयं हर्षयति, वृत्ती रमयति, बुद्धिं स्थिरयति, तरलयति च विचारसरणिम् ।

ज्ञानामृतमिदं शोकानलसन्तप्तानां सुखशान्तिकरम्, कर्तव्यमार्गात्परिभ्रष्टानां सन्मार्गप्रदर्शकम्, संसारसागरसंतितीर्षूणां सन्तरणसेतुश्चास्ति । प्रायः दुःखमयं हि जगत्, दुःखनिवृत्तिश्च जीवनस्य लक्ष्यम् । अध्यात्मशास्त्रचिन्तनेन, तदाचरणेन च दुःखनिवृत्तिर्भवति । गीतायामध्यात्मशास्त्रविवेचनं सम्यगुपलभ्यते । तच्चाध्यात्मशास्त्रं शोकसन्तप्तान् जनान् सान्त्वयति, परमपदपथिकान् सन्मार्गं प्रदर्शयति, शिक्षयति च सद्विवेकान् । अत एव अध्यात्मतत्त्वप्रतिपादिकायाः सर्वज्ञानमय्याः गीतायाः श्रवणम्, मननं निदिध्यासनञ्चावश्यं कर्तव्यमेव ।

सवेषां दार्शनिकतत्त्वनां मनोरमं समन्वयं येन विधिना भगवद्गीता सम्पादयति, स तु परमरमणीयः परमोपादेयश्चास्ति । यावन्ति भाष्याणि, टीकाः, अनुवादाश्च गीताया उपलभ्यन्ते तावन्ति अन्यस्य कस्यापि ग्रन्थस्य नैवोपलभ्यन्ते । भगवद्गीता सर्वजनहिताय भुवि स्वकीयमस्तित्वं वहति ।

भक्ति – ज्ञान – कर्मणामभूतपूर्वः समन्वयो गीतायामनुपमरूपेण लोचनगोचरीक्रियते । अस्यां ब्रह्मज्ञानम्, योगविद्या, निष्कामकर्मणो महत्त्वम्, भक्तियोगादयोऽनेके विषयाः व्याख्याताः । गूढतमा विषयाऽपि सरलतमभाषायामत्र स्पष्टीकृताः सन्ति । गीतायां वेदोपनिषदां शास्त्राणाञ्च सारः निहितो वर्तते । सर्वजनसुखाय, सर्वजनहिताय च भगवता प्रतिपादितेयं गीता विश्वेऽस्मिन् अमृतदायिनी जीवनसर्वस्वभूता च वर्तते ।

## श्रीमद्भगवद्गीतायाः महिमा

भगवद्गीता अलौकिकः वैविध्यपूर्णश्च ग्रन्थोऽस्ति । अत्र साधकोपयोगिनीनां सार्वासां सामग्रीणामुपलब्धिः । भवति । गीताया इदमेव वैशिष्ट्यम्– यदत्र कस्यचिद् समुदायविशेषस्य निन्दा प्रशंसा वा नास्ति, प्रत्युत वास्तविकतत्त्वानामेव वर्णनमस्ति । वास्तविकं तत्त्वं (परमात्मा) तदस्ति – यद् परिवर्तनशीलप्रकृत्या तथा प्रकृतिजन्यपदार्थैश्च सह सर्वथा भिन्नस्सन्नपि, सर्वेषु देश–काल–वस्तु–

व्यक्ति–परिस्थित्यादिषु नित्यं–निरन्तरं एकरसेन एकरूपेण च वरीवर्ति । यो मनुष्यः यत्रास्ति, यथा चास्ति, वास्तविकं तत्त्वं तत्र तथैव पूर्णरूपेण विद्यते । परन्तु परिवर्तनशीलेषु प्रकृतिजन्यपदार्थेषु व्यक्तिषु च रागद्वेषकारणाभ्यां तदनुभवो न भवति । सर्वथा रागद्वेषाभ्यां रहितस्य तस्य स्वानुभवो जायते ।

भगवद्गीताया उपदेशः अलौकिकोऽस्ति । गीताया उपरि बह्व्यः टीकाः अलिख्यन्त, तथा बह्व्यः टीकाः लिख्यमानाः सन्दृश्यन्ते । तथापि साधूनां, महात्मनां, विदुषां मनस्सु गीतायाः नूत्न–नूतना भावाः प्रकाशन्ते । अस्य गम्भीरार्थकस्य ग्रन्थस्योपरि यावानपि विचारः क्रियते, तथाप्यस्य कोऽपि पारं न गच्छति । प्रत्येकं दर्शनस्य पृथग् पृथग् अधिकारिणः भवन्ति, परन्तु गीताया इयं विलक्षणतास्ति यत् स्वोन्नतिं (आत्मोन्नतिं) कामयमाना सर्वेऽप्यस्याः अधिकारिणो भवन्ति । गीता कमपि वादमादृत्य न चलति, अर्थात् – द्वैत–अद्वैत–विशिष्टाद्वैत–द्वैताद्वैत–विशुद्धाद्वैत–अचिन्त्यभेदादि कमपि वादं, कञ्चिदेकं सम्प्रदायं, सिद्धान्तं वा अश्रित्य न प्रवर्तते । गीताया मुख्यं लक्ष्यमिदमस्ति यत् मानवः कस्यचिद् वादस्य, मतस्य, सिद्धान्तस्य वा अनुयायी भवेत्, परन्तु तस्य प्रत्येकस्यां परिस्थितौ कल्याणं स्यात्, स कस्याञ्चिदपि परिस्थितौ परमात्मप्राप्त्या वञ्चितो न स्यात् । यतो हि जीवमात्रस्य मनुष्ययोनौ जन्म केवलं स्वकल्याणर्थमेव जायते । संसारे तादृशी कापि परिस्थितिर्नास्ति, यस्यां मनुष्यस्य कल्याणं न भवितुमर्हति । कारणमस्ति यत् – परमात्मतत्त्वं प्रत्येकस्यां परिस्थितौ समानरूपेण विद्यते । अतः साधकस्य समक्षं या कापि परिस्थितिः स्यात्, तस्याः केवलं सदुपयोगः कर्तव्यः । सदुपयोगस्य अयमभिप्रायोऽस्ति यत् – दुःखदायिपरिस्थितौ सत्यां सुखेच्छाया त्यागः, तथा सुखदायिपरिस्थितौ आगतायां सुखभोगे लोलुपतायाः त्यागः, अपि च तस्य सुखस्य अन्येषां सेवायामुपयोगः कर्तव्यः । अनेन प्रकारेण सदुपयोगेन मनुष्यः सुखदायि – दुःखदायि परिस्थितिभ्यां ऊर्ध्वगतिं प्राप्नोति, अर्थात् तस्य कल्याणं जायते ।

### गीताया उत्पत्तिविचारः

धर्मभूमौ कुरुक्षेत्रे एकस्मिन् भागे कौरवसेना संस्थितास्ति, तथाऽपरे भागे पाण्डवसेना । सेनयोरुभयोर्मध्ये श्वेताश्वैर्युक्तः एकः महारथः विराजते । तस्य रथस्य एकस्मिन् भागे भगवान् श्रीकृष्णः उपविष्टोऽस्ति, तथाऽपरे भागे अर्जुनः । अर्जुनः उभयोस्सेनयोर्मध्ये स्वरथं स्थापयितुं भगवन्तं कथयति । भगवान् श्रीकृष्णः द्वयोस्सेनयोर्मध्ये भीष्म–द्रोणादीनां समक्षं रथं संस्थाप्य अर्जुनं कथयति यत् – युद्धार्थं समवेतान् कुरून् पश्य इति । सेनयोर्द्वयोः स्वजनानां, सम्बन्धिनाञ्च दर्शनेन अर्जुने कौटुम्बिकमोहः अजाग्रत, यस्य परिणामेन अर्जुनः युद्धस्य विचारं धनुर्बाणं च परित्यज्य रथमध्य उपाविशत् ।

एवं रथोपविष्टे पार्थे, कुत अयम् अस्थाने समुत्थितः शोक इति आक्षिप्य, तमिमं विषमस्थं शोकम् अविद्वत्सेवितं परलोकविरोधिनं अकीर्तिकरम् अतिक्षुद्रं हृदयदौर्बल्यं परित्यज्य युद्धाय उतिष्ठ इति श्रीकृष्णः अर्जुनम् उदोधयति ।

परन्तु पार्थः पुनरपि स्नेहकारुण्यधर्माधर्मभयाकुलो भगवदुक्तं हिततमम् अजानन् इत्थं कथयति – भीष्मद्रोणादिकान् बहुमन्तव्यान् गुरून् कथमहं हनिष्यामि ? कथन्तरां भोगेष्वतिमात्रप्रसक्तान् तान् हत्वा तैः भुज्यमानान् तानेव भोगान् तद्रुधिरेण उपसिच्य तेषु आसनेषु उपविश्य भुञ्जीय ? तद्वधलब्धविजयात् अधर्म्यात् अस्माकं धर्माधर्मौ अजानद्भिः तैः हननम् एव गरीय इति मे प्रतिभाति इत्युक्त्वा, शरणागताय तव शिष्याय मह्यं यच्छ्रेयः तन्निश्चितं ब्रूहि इति अतिमात्रकृपणो भगवत्पदाम्बुजम् उपससार ।

एवम् अस्थाने समुपस्थितस्नेहकारुण्याभ्याम् अप्रकृतिं गतं क्षत्रियाणां परमं धर्मं युद्धमपि अधर्मं मन्वानं धर्मबुभुत्सया च शरणागतं पार्थम् उद्दिश्य – फलाभिसन्धिरहितस्य स्वधर्मस्य युद्धस्य आचरणम् आत्मयाथार्थ्यज्ञानेन विना न भवतीति मत्वा भगवता परमपुरुषेण श्रीकृष्णेन गीताख्यम् अध्यात्मशास्त्रावतरणं कृतम् । तदुक्तम् –

**अस्थाने स्नेहकारुण्यधर्माधर्मधियाकुलम् ।**

**पार्थं प्रपन्नमुद्दिश्य शास्त्रावतरणं कृतम् ॥** (गीतार्थसंग्रह-५)

**श्रीकृष्णार्जुनयोः प्रश्नोत्तरस्वरूपम्**

महाभारतस्य भीष्मपर्वणि २३ तः ४० अध्यायपर्यन्तं निरूपिता श्रीमद्भगवद्गीता श्रीकृष्णार्जुनयोः संवादरूपास्ति । अतः प्रत्येकम् अध्यायान्ते श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे इति शोश्रूयते । अपि चास्याः गीतोपदेश इत्यपि नामान्तरं विद्यते । अत्र कृष्णावतारी योगेश्वरः भगवान् वासुदेव एव साक्षात् प्रवक्ता, शिष्यत्वेन शरणागतः तत्त्वजिज्ञासुः पार्थ एव उत्तमश्रोता । अनयोः प्रश्नोत्तरूपास्ति भगवद्गीता । व्यासप्रसादात् इममद्भुतं रोमहर्षणं श्रीकृष्णार्जुनसंवादं श्रुत्वा अष्टादशाध्यायान्ते सञ्जयः कथयति । यथा -

**इत्यहं वासुदेवस्य पार्थस्य च महात्मनः ।**

**संवादमिममश्रौषमद्भुतं रोमहर्षणम् ॥** (भ.गी. १८-७४)

**व्यासप्रासादाच्छ्रुतवानेतद् गुह्यमहं परम् ।**

**योगं योगेश्वरात् कृष्णात्साक्षात्कथयतः स्वयम् ॥** (भ.गी. १८-७५)

**भगवद्गीतायाः अध्यायानां सारः**

**(१) अर्जुनविषादयोगः**

श्रीमद्भगवद्गीतायाः प्रथमाध्याये अर्जुनस्य स्वजानानां सम्बन्धिनाञ्च दर्शनेन सञ्जातस्य विषादस्य वर्णनात् अर्जुनविषादयोग इति नामाभिधानं कृतं दृश्यते ।

**(२) सांख्ययोगः**

द्वितीये भगवता श्रीकृष्णेन अर्जुनं प्रति शरीरात् पृथग्भूतस्य आत्मतत्त्वस्य अर्थात् सांख्यज्ञानस्योपदेशात् अध्यायोऽयं सांख्ययोगनाम्ना प्रसिद्धिं गतः ।

**(३) कर्मयोगः**

तृतीये भगवता श्रीकृष्णेन अर्जुनं प्रति कर्मस्वरूपस्य, कर्मणः माहात्म्यस्य च कथनात् अध्यायोऽयं कर्मयोगनाम्ना ख्यातिं गतः ।

**(४) ज्ञानकर्मसन्यासयोगः**

चतुर्थे ज्ञानकर्मणोः परमात्मनि सन्यास (समर्पणस्य) कथनात् अध्यायोऽयं ज्ञानकर्मसन्यासयोगनाम्ना विख्यातोऽस्ति ।

**(५) कर्मसन्यासयोगः**

पञ्चमे सर्वविधकर्मणां परमात्मनि सन्यासकरणस्य कथनात् अध्यायोऽयं आत्मसंयमयोगनाम्ना संकीर्त्यते ।

**(६) ज्ञानविज्ञानयोगः**

सप्तमे विज्ञानरूपस्य विशेषज्ञानसहितस्य भगवत्तत्त्वज्ञानस्य निरूपणात् अध्यायोऽयं ज्ञानविज्ञानयोगनाम्ना संश्रूयते ।

**(७) अक्षरब्रह्मयोगः**

अष्टमेऽध्याये अक्षर-ब्रह्म-अध्यात्म-कर्मादितत्त्वानां वर्णनाद् अध्यायोऽयम् अक्षरब्रह्मयोगनाम्ना प्रसिद्धोऽस्ति ।

### (८) राजविद्याराजगुह्ययोगः

नवमेऽध्याये भगवता अत्यन्तं गोपनीयायाः राजविद्यायाः विस्तृतवर्णनात् राजविद्याराजगुह्ययोगनाम्ना प्रथितोऽयमध्यायः ।

### (९) विभूतियोगः

दशमेऽध्याये भगवता स्वस्य विभूतीनां अर्थात् ऐश्वर्यस्य निरूपणात् विभूतियोगनाम्ना विख्यातोऽस्ति अयमध्यायः ।

### (१०) विश्वरूपदर्शनयोगः

एकादशे भगवता अर्जुनं प्रति स्वस्य विराड्रूपस्य दर्शनात् अध्यायोऽयं विश्वरूपदर्शनयोगनाम्ना प्रथितोऽस्ति ।

### (११) भक्तियोगः

द्वादशे अनन्यभक्तियुक्तः भगवद्भक्त एव भगवते विशेषेण प्रियो भवतीति कथनात् अध्यायोऽयं भक्तियोगनाम्ना संश्रूयते ।

### (१२) क्षेत्रक्षेत्रज्ञयोगः

त्रयोदशेऽध्याये क्षेत्ररूपिणः शरीरस्य, क्षेत्रज्ञस्य अर्थात् जीवात्मनः स्वरूपस्य विभागपूर्वकं निरूपणात् अध्यायोऽयं क्षेत्र-क्षेत्रज्ञविभागयोगनाम्ना प्रसिद्धिमवाप ।

### (१३) गुणत्रयविभागयोगः

चतुर्दशेऽध्याये सत्वरजस्तम इति त्रयाणां गुणानां स्वरूपवर्णनात् अध्यायोऽयं गुणत्रयविभागयोगनाम्ना विख्यातिं गतो लोके ।

### (१४) पुरुषोत्तमयोगः

पञ्चदशेऽध्याये भगवता स्वेन स्वस्य पुरुषोत्तमत्वस्य वर्णनात् पुरुषोत्तमयोगनाम्ना प्रसिद्धोऽयम् अध्यायः ।

### (१५) दैवासुरसम्पद्विभागयोगः

अभय-दान-दमादि दैवीगुणसम्पन्नानां तथा दम्भ-दर्प-अभिमानादि आसुरीगुणयुक्तानां पुरुषाणाञ्च विभागकथनात् अध्यायोऽयं दैवासुरसम्पद्विभागयोगनाम्ना प्रख्यातोऽस्ति ।

### (१६) श्रद्धात्रयविभागयोगः

सप्तदशे भगवता सत्वरजस्तम इति त्रिप्रकारिकायाः श्रद्धायाः स्वरूपनिरूपणात् अध्यायोऽयं श्रद्धात्रयविभागयोगनाम्ना प्रसिद्धोऽस्ति ।

### (१७) मोक्षसंन्यासयोगः

अष्टादशे ज्ञान-कर्म-कर्तृ-बुद्धि-सुखादीनां स्वरूपवर्णनान्ते मोक्षस्यापि परमात्मनि सन्यासं कर्तव्यमिति कथनात् अध्यायोऽयं मोक्षसंन्यासयोगनाम्ना प्रोच्यते ।

**उपसंहारः**

एवं गीतायां ये उपदेशाः प्रदत्ताः ते सर्वे जीवनस्योन्नतिकारकाः, सर्वशास्त्राणां सारभूताः, कर्तव्यपथप्रदर्शकाश्च सन्ति । एवं जीवनसंदेशदात्री, नैराश्यहारिणी, नित्यमेवोपास्या, क्षीरतरंगिणीव रसदा सुखदा च श्रीमद्भगवद्गीता सर्वेभ्यो मानवेभ्यः स्वकर्तव्यस्य ज्ञानं प्रदाय मोक्षाय कल्पते । गीतोपदेशानुकूलमाचरणं कृत्वा सर्वैरेव मानवैः स्वजीवनमुन्नतं कर्तव्यम् । सुखशान्त्यर्थमपि अस्माभिरस्या उपदेशाः समाचरणीयाः । सर्वशास्त्रमयी गीतेयम् अस्माभिः श्रद्धया परमादरेण च सुगीता कर्तव्या । उक्तमपि स्वयं महर्षिणा वेदव्यासेन–

**गीता सुगीता कर्तव्या किमन्यैः शास्त्रविस्तरैः ।**
**या स्वयं पद्मनाभस्य मुखपद्माद्विनिस्सृता ॥**

## स्वाध्यायः

### १. योग्यविकल्पं चित्त्वा उत्तरं लिखत ।

(१) भगवद्गीता महाभारतस्य कस्मिन् पर्वणि समागता ?

(क) आदिपर्वणि (ख) सभापर्वणि (ग) भीष्मपर्वणि (घ) शान्तिपर्वणि

(२) भगवद्गीतायाः श्लोकसंख्यास्ति ।

(क) १०० (ख) २०० (ग) ५०० (घ) ७००

(३) युजिर् योगे इति समारब्धस्य योगशब्दस्यार्थोऽस्ति ।

(क) ममता (ख) समता (ग) स्थिरता (घ) चञ्चलता

(४) शरीरिणमधिकृत्य कः योगोऽस्ति ?

(क) भक्तियोगः (ख) ध्यानयोगः (ग) कर्मयोगः (घ) ज्ञानयोगः

(५) भगवद्गीताया द्वितीयाध्यायस्य नामास्ति ।

(क) विभूतियोगः (ख) भक्तियोगः (ग) सांख्ययोगः (घ) पुरुषोत्तमयोगः

(६) भगवद्गीता किं प्रस्थानं कथ्यते ।

(क) वैदिकम् (ख) स्मार्तम् (ग) दार्शनिकम् (घ) आस्तिकम्

(७) अर्जुनस्य रथः कैः युक्तोऽस्ति ?

(क) हरिताश्वैः (ख) श्वेताश्वैः (ग) कृष्णाश्वैः (घ) पीताश्वैः

### २. रिक्तस्थानं पूरयत ।

(१) भारतीयसंस्कृतेः महान् ग्रन्थोऽस्ति ______________ ।

(२) भगवद्गीता वेदोपनिषदां ______________ अस्ति ।

(३) गीतायां योगशब्दस्य प्राधान्येन ______________ अर्थाः सन्ति ।

(४) शरीरमधिकृत्य ______________ योगः प्रवर्तते ।

(५) गीता ______________ अमृतवर्षां वर्षयति ।

(६) गीताया दशमाध्यायस्य ______________ नामास्ति ।

(७) सम्बन्धिनां दर्शनेन अर्जुने ______________ अजाग्रत ।

**३. युग्मानि योजयत ।**

| अ | ब |
|---|---|
| (१) गीता | पुरुषोत्तमयोग: |
| (२) पञ्चदशोऽध्याय: | मुखपद्माद्विनिस्सृता |
| (३) योग: | सप्तम: |
| (४) ज्ञानविज्ञानयोग: | दु:खसंयोगवियोग: |
| (५) प्रपन्न: | केशव: |
| | अर्जुन: |

**४. एकवाक्येन उत्तरं लिखत ।**

(१) भगवद्गीता कीदृश: ग्रन्थोऽस्ति ?

(२) पञ्चमवेदेति प्रख्याता का ?

(३) भक्तियोग: कमधिकृत्य प्रवर्तते ?

(४) कर्मसन्यासयोग: क अध्यायोऽस्ति ?

(५) गीतायां केषां समन्वयो दृश्यते ?

**५. द्वित्रवाक्यै: उत्तरं लिखत ।**

(१) योगत्रयपरिचयं लिखत ।

(२) अर्जुनस्य विषादकारणं स्पष्टयत ।

(३) गीताविचारान् निरूपयत ।

**६. टिप्पणीं लिखत ।**

(१) गीतायां योगशब्दार्थ: ।

(२) गीताया: संक्षिप्तपरिचय: ।

(३) प्रस्थानत्रयेषु गीता ।

**७. सविस्तरम् उत्तरं लिखत ।**

(१) गीताया: जीवनोपयोगितां प्रतिपादयत ।

(२) भगवद्गीताया: महिमानं स्पष्टयत ।

(३) गीताया उत्पत्तिप्रसङ्गं निरूपयत ।

# १५ ज्ञानयोगः

## प्रस्तावना

यथा आहार-निद्रा-भय-मैथुनानि सर्वेषु प्राणिषु तथा मनुष्ये अपि विद्यते । मानवस्य वैशिष्ट्यं नाम तस्य ज्ञानम् । ''**ज्ञा अवबोधने**'' इति धातोः निष्पन्नः ज्ञानशब्दः प्राधान्येन तत्त्वज्ञानबोधकेति अंगीकुर्वन्ति विद्वांसः । यतो हि ''**मोक्षे धीर्ज्ञानम् अन्यत्र विज्ञानं शिल्पशास्त्रयोः**'' इति अमरकोशकारः निगदति । इदं ज्ञानं द्विविधम् - प्रपञ्चज्ञानम्, आत्मज्ञानञ्चेति । बाह्यप्रपञ्चज्ञानम् - इन्द्रियम्, मनः, बुद्धिः इत्येतेषां व्यापारेण जायते । केषाञ्चन प्राणिनाम् इन्द्रियशक्तिः अधिका स्यात् । किन्तु बुद्धिः मनश्च मानवविशेषः । मानवः स्वस्य विशेषबुद्धिशक्त्या प्रकृत्याः सूक्ष्मानुसन्धानं कृतवान् अस्ति । बहिः अदृश्यमानानि निगूढसत्यानि वैज्ञानिक-प्रयोगाणां द्वारा मानवः आविष्कृतवान् अस्ति । अस्य विज्ञानस्य आधारेण प्रकृतिशक्तीः वशीकृत्य भोगसाधनानि, यन्त्रोपकरणानि आविष्कृतवानस्ति । अस्य फलरूपेण मानवजीवनस्य भौतिकस्तरः नितरां परिष्कृतः अस्ति । अस्याः प्रगतेः अन्तं न विद्यते । बाह्यज्ञानक्षेत्रे अयम् अद्‌भुतः विजयः ।

## आत्मज्ञानस्य आवश्यकता

अहं सदा सुखी स्याम् । दुःखस्य लवलेश अपि मम जीवने न स्यात् इत्येषः मानवस्य मूलभूतः आशयः । मानवस्य सर्वेषां प्रयत्नानां प्रेरणास्रोतः इदमेव । दार्शनिकाः योगिनश्च अस्मिन् विषये गम्भीरं चिन्तनं कृत्वा ज्ञातवन्तः यत् - वैज्ञानिकप्रगत्या बाह्यसम्पत्तेः बाहुल्यं यथा सिध्यति तथा नैजसुखं ततः न वर्धत इति । रोगः, वार्धक्यं, मरणञ्च मानवजीवनस्य दुःखमूलानि । जननमप्यन्यतरं दुखम् । वैज्ञानिकसंशोधनैः एतेषाम् - आत्यन्तिकं निर्मूलनम् असाध्यम् । अस्माकं जीवनं दुःखस्य पञ्जरे निहितं विद्यते । अतः बाह्यजगति अन्वेषणं क्रमशः न्यूनीकृत्य सर्वेषाम् अनुभवानां मूलकर्तुः **अहम्** इत्येतस्य अवगमनात् एव सुखस्य प्राप्तिः इत्येषः दर्शनशास्त्राणां निश्चितः अभिप्रायः । अहं कः ? इत्येतस्य विषये अस्माकं ज्ञानं न विद्यते । न केवलं तावदेव अपितु, एतस्मिन् विषये - संशयः विपर्ययाश्च विद्यन्ते । एतेभ्यः मुक्तिं सम्पाद्य यथार्थज्ञानसम्पादनमेव सुखप्राप्तेः मार्ग इति घोषयन्ति शास्त्राणि । अयं मार्ग एव ज्ञानयोगः ।

## शास्त्रेषु उल्लेखाः

''**विद्यया विन्दतेऽमृतम्**'' - **ईशोपनिषत्** २/४, ''**तरति शोकमात्मवित् - छान्दोग्योपनिषत्**'' - ७/१/३, **तमेवं विद्वान् अमृत इह भवति । नान्यः पन्थाः विद्यतेऽयनाय** - यजुर्वेदीयः । **यज्ज्ञात्वाऽमृतमश्नुते** - भगवद्गीता - १३/१२ ।

### गीतायां ज्ञानयोगः

श्रीमद्भगवद्गीतायां सा ज्ञानगंगा प्रवहति यामवगाह्य जनाः निर्मलत्वं यान्ति, यतो हि जगतीतलेऽस्मिन् ज्ञानसदृशं पवित्रतमं वस्तु किमपि न विद्यते । तदुक्तं गीतायाम् -

**न हि ज्ञानेन सदृशं पवित्रमिह विद्यते ।**
**तत्स्वयं योगसंसिद्धः कालेनात्मनि विन्दति ॥** (भगी ४/३८)

तथाविधं ज्ञानं नित्य-नैमित्तिक-प्रायश्चित्त-उपासनारूपकर्मयोगानुष्ठानेन नितान्तनिर्मलस्वान्तः साधकः साधनायाः परिपक्वतावस्थायां योग्यसमये स्वयमेव प्राप्नोति ।

**विशेषार्थः** संसारे यज्ञदानतपपूजाव्रतोपवासजपध्यानप्राणायामादि यावन्ति साधनानि सन्ति तथा गंगा – यमुना – नर्मदादि यावन्ति । तीर्थानि सन्ति, तानि सर्वाणि मनुष्यस्य पापानि विनाश्य तं पवित्रीकुर्वन्ति । परन्तु तेषु सर्वेष्वपि तत्त्वज्ञानसमानं पवित्रकारकं किमपि साधनं तीर्थं वा नास्ति, यतो हि तानि सर्वाणि तत्त्वज्ञानस्य साधनानि सन्ति तथा तत्त्वज्ञानं तेषां सर्वेषां साध्यमस्ति ।

अपि च तादृशं पवित्रतमं ज्ञानं कः प्राप्नोति ? किञ्च लभते इति प्रश्नद्वयस्योत्तरं युगपत् एकेनैव श्लोकेन स्वयं भगवान् निरूपयति ।

यथा – **श्रद्धावाँल्लभते ज्ञानं तत्परः संयतेन्द्रियः ।**

**ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति ।** (भ.गी. ४–३७)

**सरलार्थः** एवं गुरूपदेशात् साधनापरायणः जितेन्द्रियः पूर्णश्रद्धावान् साधकः ज्ञानं प्राप्नोति । तथाविधं ब्रह्मज्ञानं सम्प्राप्य साधकः अचिरेणैव कालेन परमां शान्तिमवाप्नोति ।

**विशेषार्थः** **''श्रद्धावान् लभते ज्ञानम्''** श्रद्धा–विश्वास–विवेकानामावश्यकता सर्वेषां साधकानामस्ति । कर्मयोगे – ज्ञानयोगे च विवेकस्य मुख्यतास्ति तथा भक्तियोगे श्रद्धा – विश्वासयोः मुख्यता विद्यते । परमात्मनि महापुरुषेषु, धर्मे, शास्त्रेषु च प्रत्यक्षमिव आदरपूर्वको विश्वासः श्रद्धा कथ्यते । यावत् पर्यन्तं परमात्मतत्त्वस्य अनुभवो न भवति, तावत् पर्यन्तं परमात्मनि प्रत्यक्षादधिकः विश्वासः अवश्यं भवेत् । वस्तुतः परमात्मा देशकालादिभ्यः दूरे नास्ति, तस्य दूरत्वं केवलं काल्पनिकमेव । स तु दूरेऽस्तीति मान्यताया कारणत एव सर्वत्र विद्यमानोऽपि परमात्मा अनुभवे नायाति । परमात्मा अस्मासु विद्यते इति मान्यता एव श्रद्धाऽस्ति । कीदृशोऽपि जनः भवेत् यदि सः एकमात्रं परमात्मानं प्राप्तुमिच्छति, तथा परमात्मा मयि सन्निहितोऽस्तीति श्रद्धावानस्ति, तर्हि तस्य अवश्यं परमात्मतत्त्वज्ञानं जायते । अभियुक्तानामिदं वचनमत्र स्मर्तव्यमस्ति ।

यथा – **यस्य देवे परा भक्तिः यथा देवे तथा गुरौ ।**

**तस्यैते कथिताह्यर्थाः प्रकाशन्ते महात्मनः ॥** (श्वे. उप.)

**''ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधि गच्छति ।''** परमशान्तेः अनुभूतिः न भवति, यतो हि वयं अस्मासु विद्यमानं वस्तुनं बहिरेव शोधयामः । परमशान्तिः प्राणिमात्रेषु स्वतः सिद्धोऽस्ति । परन्तु मनुष्यः परमशान्तिस्वरूपात् परमात्मनः सकाशात् विमुखो भूत्वा सांसारिकेषु वस्तुषु शान्तिमन्वेषयति । अत एव जन्मजन्मान्तरपर्यन्तं शान्त्या अन्वेषणे परिभ्रमन्नपि न शान्तिमाप्नोति । उत्पत्तिविनाशशीलेषु वस्तुषु शान्तिः कथं वा लभ्येत ? तत्त्वज्ञानस्य अनुभवानन्तरं यदा दुःखरूपसंसारेण सर्वथा सम्बन्धविच्छेदो भवति, तदा स्वतस्सिद्धस्य परमशान्तेः तत्काल एव अनुभवो भवति ।

अपि च तादृशस्य परमशान्तिप्रदायकस्य ज्ञानस्य प्राप्त्युपायः कः ? इति अर्जुनस्य मनसि विद्यमानस्य प्रश्नस्योत्तरं स्वयं भगवान् एव कथयति ।

**तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया ।**

**उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः ॥** (भ.गी. ४/३४)



**सरलार्थः** तादृशम् आत्मविषयकं ज्ञानं तत्त्वदर्शिनां गुरूणां – स्वलाघवद्योतकेन गुरोरतिशयमहिमाप्रदर्शकेन नमस्कारेण, आसमाधानं वारं वारं तत्त्वबुभुत्साविषयकप्रश्नकरणेन गुरोराश्रमस्य सेवया च ज्ञातव्यं भवति । कृतादरेण सेवया च परितुष्टाः तत्त्वदर्शिनः गुरवः तत्त्वबुभुत्सवे शिष्याय निर्मलं ज्ञानम् उपदेक्ष्यन्ति ।

**विशेषार्थः तद्विद्धिप्रणिपातेन परिप्रश्नेन सेवया** – ज्ञानप्राप्त्यर्थं गुरुनिकटं गत्वा तस्मै साष्टाङ्गं दण्डवत् प्रणामं कुर्यात् । तात्पर्यमिदमस्ति यत् – गुरोस्समीपे सदा निम्नपुरुषवत् वर्तितव्यम्, ''**नीचवत् सेवेत सद्गुरुम्**'' येन अस्माकं शरीरेण गुरोः कदापि अनादरः तिरस्कारो वा न जायेत । नम्रतया सरलतया जिज्ञासुभावेन च तस्यान्ते निवसेत् सेवेच्च । स्वयमात्मानं समर्पयेत्, शरीरेण वस्तुभिश्च गुरुं सेवेत, येन सः प्रसन्नो भवेत् तादृशं कार्यं कर्तव्यम् । तस्य प्रसन्नता प्राप्तव्या चेत् स्वयं तस्य अधीनो भवेत् । तस्य संकेतस्य, आज्ञायाश्च अनुकूलं कार्यं कुर्यात् । एषैव वास्तविकी सेवा प्रोच्यते । परिप्रश्नेन – केवलं परमात्मतत्त्वज्ञानार्थं जिज्ञासुभावेन सरलतया विनम्रतापूर्वकञ्च गुरुं पृच्छेत् । स्वविद्वत्ताप्रदर्शनार्थम् अथवा तस्य परीक्षणार्थं वा प्रश्नः न करणीयः । यथा – अहं कोऽस्मि ? संसारः कोऽस्ति ? परमात्मतत्त्वस्य अनुभवः कथं भवति ? मम जीवने काः बाधाः सन्ति ? ताः बाधाः कथं निवार्यन्ते ? तत्वं किमर्थं बुद्धौ नायाति ? इत्यादीन् प्रश्नान् केवलं स्वबोधाय पृच्छेत् । **उपदेक्ष्यन्ति ते ज्ञानम्** – महापुरुषाः दण्डवत्प्रणामेन तेषां सेवया तथा सरलतापूर्वकं प्रश्नकरणेन च तत्त्वज्ञानमुपदिशन्ति । अस्य इदं तात्पर्यं नास्ति यत् – महापुरुषाणामेतेषां सर्वेषामपेक्षा अस्तीति । वास्तविकरूपेण तेषां प्रणामस्य सेवायाश्च काचिदपि अपेक्षा न भवति । परन्तु यदा साधकः अनेन प्रकारेण जिज्ञासां करोति तथा सरलतापूर्वकं महापुरुषाणां सान्निध्ये निवसति तदा तस्य महापुरुषस्यान्तःकरणे शिष्यं प्रति विशेषभावः समुदेति, येन साधकस्य बहवः लाभाः भवन्ति । यदि साधकः अनेन प्रकारेण तस्य गुरोः समीपे न वर्तेत तर्हि तस्य ज्ञानप्राप्त्यावपि क्लेशः भवति ।

गुरूपदिष्टस्य आत्मज्ञानस्य महिमानं श्रावयति भगवान् श्रीकृष्णः ।

यथा – **यथैधांसि समिद्धोऽग्निः भस्मसात् कुरुतेऽर्जुन ।**
**ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते तथा ॥** (भ.गी ४/३७)

**सरलार्थः** अत्यन्तं गहनमिमं विषयं सरलेन लौकिकोदाहरणेन विशदीकरोति केशवः । यथा – प्रज्वलितो पावकः महान्तमपि इन्धनराशिं क्षणमात्रेण भस्मीकरोति, एवमेव आत्मयाथात्म्यज्ञानरूपोऽग्निः जीवात्मगतम् अनादिकालप्रवृत्तम् अनेककर्मसञ्चयं भस्मीकरोति ।

**विशेषार्थः ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुतेऽर्जुन ।** यथाऽग्निः काष्ठं भस्मीकरोति तथैव तत्त्वज्ञानरूपोऽग्निः सञ्चित – प्रारब्ध – क्रियमाणेति विविधानि कर्माणि भस्मीकरोति । यथाऽग्नौ काष्ठस्य अत्यन्तमभावो भवति तथा तत्त्वज्ञाने सम्पूर्णकर्मणां अत्यन्तमभावो भवति । तत्त्वज्ञानेन अनेकजन्मनां सञ्चितकर्माणि सर्वथा विनश्यन्ति । यतो हि सर्वाणि सञ्चितकर्माणि अज्ञानाश्रितानि सन्ति, अतः ज्ञानोदयादेव तानि सर्वाणि विनश्यन्ति । तत्त्वज्ञानादनन्तरं कर्तृत्वाभिमानं न भवति, अतः सर्वाणि क्रियमाणकर्माणि अकर्माणि भवन्ति – अर्थात् फलजनकानि न भवन्ति । प्रारब्धकर्मण अवशेषं तु यावच्छरीरधारणं तावद् भवत्येव, परन्तु ज्ञानिनामुपरि तस्य कोऽपि प्रभावः न भवति । कारणमस्ति यत् तत्त्वज्ञानानन्तरं भोक्तृत्वं न विद्यते, अतः अनुकूलायां प्रतिकूलायाञ्च परिस्थितौ समागतायाम् अपि । सः सुखी दुःखी वा न भवति । एवं तत्त्वज्ञानानन्तरं सञ्चित – प्रारब्ध – क्रियमाणैः त्रिभिः कर्मभिः न कश्चिद् सम्बन्धः तिष्ठति । कर्मभिः स्वसम्बन्धनाशात् कर्माणि न भवन्ति, भस्म एव भवति, अर्थात् सर्वाणि

कर्माणि अकर्माणि भवन्ति । सम्बन्धविच्छेदात् संसारस्य स्वतन्त्रसत्ताया अनुभवोऽपि न जायते, प्रत्युत एकं परमात्मतत्त्वमेव अवशिष्यते । तात्पर्यमिदमस्ति यत् ज्ञानोदयानन्तरं कर्मभिः संसारेण वा सर्वथा सम्बन्धविच्छेदो भवति ।

**ज्ञानयोगस्वरूपम्**

इत्थं ज्ञानयोगस्य महिमानं तत्प्राप्त्युपायांश्च निरूप्य आत्मानात्मविवेचनं विना सांसारिकविषयमोहो न निर्गच्छतीति मत्त्वा भगवान् वासुदेवः विषीदन्तं प्रपन्नं पार्थमुद्दिश्य अविनाशिनम् आत्मतत्त्वमुपदिशति ।

यथा – **अविनाशि तु तद्विद्धि येन सर्वमिदं ततम् ।**
**विनाशमव्ययस्यास्य न कश्चित् कर्तुमर्हति ॥** (भ.गी २/१७)

**सरलार्थः** येन आत्मना इदं सम्पूर्णं ब्रह्माण्डं व्याप्तमस्ति, अर्थात् – यः अणु – रेणु – तृण – काष्ठादि ब्रह्माण्डान्तर्गतेषु सर्वेषु पदार्थेषु ओतप्रोतरूपेण व्याप्तोऽस्ति, स आत्माऽस्ति । यतो हि क्षरणस्वभावरहितस्य शाश्वतस्यास्य आत्मनः प्रणाशं कर्तुं न कोऽपि समर्थोऽस्ति संसारे ।

एवं च – **अन्तवन्त इमे देहाः नित्यस्योक्ताः शरीरिणः ।**
**अनाशिनोऽप्रमेयस्य तस्माद्युध्यस्व भारत ॥** (भ.गी २/१८)

**सरलार्थः** आत्मानात्मविवेचनारहितं, तत एव मोहग्रस्तं शरणागतं पार्थं प्रबोधयन् परमात्मा – शरीर – शरीरिणोः स्वभावविषये कथयति । हे पार्थ ! विनाशरहितस्य प्रत्यक्षादिप्रमाणैःअप्रमेयस्य शाश्वतस्य आत्मनः इमानि क्षरणशीलानि शरीराणि सन्ति । तस्माद्धेतोः आत्मनः नित्यत्वात् शरीरविनाश एव भवति, न तु शरीराश्रितस्य शरीरिणः, अतः शोकं मा कुरु, युद्धं कुरु इति भावः । अमुमेव विषयं पुनरपि स्पष्टयति परमात्मा ।

यथा – **न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता वा न भूयः ।**
**अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे ॥** (भ.गी २/२०)

**सरलार्थः** अयं शरीरी आत्मा न कदाचित् जन्म लभते, न वा मृतो भवति । कल्पादौ जननं कल्पान्ते मरणं च आत्मानं न स्पृशतः । अयं जन्मरहितः, विनाशरहितः सनातनः, पुरातनोऽपि नवः, सर्वदा अपूर्ववद् अनुभाव्यः विद्यते । सः देहेन हतेऽपि अहतो भवति ।

अपि च अग्रिमश्लोके आत्मनः अहन्तृत्वं प्रतिपादयन्नाह केशवः

**य एनं वेत्ति हन्तारं यश्चैनं मन्यते हतम् ।**
**उभौ तौ न विजानीतो नायं हन्ति न हन्यते ॥** (भ.गी २/१९)

शरीरवानेष आत्मा न कमपि हन्ति, न केनाऽपि हन्यते, वचनस्यास्य अभिप्रायोऽस्ति यत् – आत्मा न कस्याश्चित् क्रियायाः कर्ता, न तु कर्म, न कस्यचिद्विकारोऽस्ति । यो मानवः शरीरवत् शरीरिणमपि हन्तारं, हतं च मन्यते सः वास्तवरूपेण शरीर – शरीरिणोः स्वभावविवेकं न जानाति, स तु मूढ एवेति भावः ।

अपि च – **वेदाविनाशिनं नित्यं य एनमजमव्ययम् ।**
**कथं स पुरुषः पार्थ कं घातयति हन्ति कम् ॥** (भ.गी २/२)

**सरलार्थः** पुनरपि परमात्मा पृथानन्दनमुद्दिश्य कथयति – हे पार्थ ! यो मनुष्यः शरीरिणं, विनाशरहितं, शाश्वतं, जन्मरहितं व्यत्ययरहितं च सर्वदा जानाति, सः केन प्रकारेण कं वा नाशयति ? कं वा घातयति ? इति ।

**विशेषार्थः** श्लोकस्यास्य अभिप्रायोऽस्ति यत् – उत्पद्यमानं वस्तु स्वत एव विनश्यति, तस्य विनाशनस्य आवश्यकता एव न भवति । परंतु यद्वस्तु नोत्पद्यते तस्य कदापि विनाशो न भवति । वयं चतुरशीतिलक्ष्यसंख्याकानां शरीराणां धारणं कृतवन्तः, परन्तु एकमपि शरीरम् अस्माभिः सह नास्ति, वयमपि केनचित् शरीरेण सह न स्मः, अपि तु पृथगेव स्मः । एतादृशी विवेकशक्तिः तेषु शरीरेषु नासीत्, प्रत्युत मनुष्यशरीर एवास्ति । यदि वयं विषयमेनं न जानीमः तर्हि भगवता प्रदत्तस्य विवेकस्य अनादरं कुर्म इत्यर्थः ।

**वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि ।**

**तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही ॥** (भ.गी २/२२)

**सरलार्थः** यथा मानवः पुरातनानि वस्त्राणि परित्यज्य अन्यानि नूतनानि वस्त्राणि धारयति, तथैव आत्मा प्राचीनानि शरीराणि त्यक्त्वा अपराणि नूतनानि शरीराणि प्रविशति ।

**विशेषार्थः** यथा मानवः अनेकेषां वस्त्राणां परिवर्तनानन्तरमपि एक एव भवति, तथैवात्मा अनेकेषु योनिषु, अनेकेषां शरीराणां धारणानन्तरमपि अपरिवर्त्यः भवति । यथा–पुरातनानां वस्त्राणां त्यागात् न वयं म्रियेम, न वा नूतनानां वस्त्राणां धारणेन जायेम, तथैव पुरातनशरीराणां त्यागादात्मा न म्रियते, न वा नूतनशरीराणां धारणेन जायते । तात्पर्यमस्ति यत् – शरीरं म्रियते, न तु आत्मा । अन्यथा आत्मनः मरणे पुण्यपापयोः फलं कोऽनुभवेत् ? अन्यां योनिं कोऽनुप्रविशेत् ? बन्धनं कस्य स्यात् ? मुक्तश्च कः भवेत् ?

पूर्वतनश्लोकैः दृष्टान्तमुखेन विवृतमात्मानं सम्प्रति प्रकारान्तरेण निरूपयति ।

**नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः ।**

**न चैनं क्लेदयन्त्यापो न शोषयति मारुतः ॥** (भ.गी २/२३)

**सरलार्थः** पूर्वोक्तमात्मानं शस्त्राणि छेत्तुं नार्हन्ति । पावकोऽपि दग्धुं न क्षमते, जलमपि आर्द्रयितुं न शक्नोति, पवनोऽपि न शक्नोति शोषयितुम् । अर्थात् एते अग्निवाय्वादिप्राकृतिकतत्त्वानि, छेदन–दहन–क्लेदन–शोषणादिकर्माणि वा अप्राकृतमात्मानं विकारयितुं न प्रभवन्ति ।

**अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च ।**

**नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः ॥** (भ.गी २/२४)

**सरलार्थः** अयमात्मा सर्वथा अच्छेदनीयः, दग्धुमनर्हः, अक्लेदनीयः, अशोषणीयश्च वर्तते । तथा सर्वदा सर्वत्र व्यापकोऽयं निश्चलः स्थिरस्वभावः अनादिश्च वरीवर्ति ।

**विशेषार्थः** अत्र आत्मनः सर्वगतेति वर्णनेन स्वयं देहगतो नास्ति, प्रत्युत सर्वगतोऽस्ति इति अनुभूतिरेव जीवन्मुक्तिः भवति । यथा शरीरं संसारे संस्थितमस्ति, तथात्मा शरीरसंस्थितो नास्ति । परन्तु कामनामतयोः तादात्म्यकारणतः आत्मनः शरीरेण साकं एकता प्रतीयते ।

अपि च मन्निमित्तात् सर्वेषां बान्धवानां मृत्युर्भवतीति शोकं कुर्वतः अर्जुनस्य शोककारणं जन्ममृत्योः रहस्यं सनातनसत्यं च समुद्घाटयति भगवान् वासुदेवः ।

यथा **जातस्य हि ध्रुवो मृत्युः ध्रुवं जन्म मृतस्य च ।**

**तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हति ॥** (भ.गी २/२७)

**सरलार्थः** यस्य जन्म जातं तस्य मरणं निश्चितम्, यश्च म्रियते स पुनः जायत एव । तस्मात् चक्रवत् परिवर्तनशीले अपरिहार्ये च जन्ममरणयोर्विचारे तव शोकः योग्यः नास्ति ।

**विशेषार्थः** कस्यचिद् प्रियजनस्य मृत्युर्भवति, धनं नष्टं भवति चेत् मनुष्यस्य शोको भवति । एवमेव भविष्यविषयेऽपि चिन्ता भवति, यथा – यदि मम भार्या मरिष्यति तर्हि किं भविष्यति ? पुत्रो मरिष्यति चेत् किं भविष्यति इत्यादि । एतादृशः शोकः चिन्ता वा अविवेककारणादेव भवति । यतो हि संसारः परिवर्तनशीलः वर्तते । परिस्थित्याः परिवर्तनमावश्यकं विद्यते । यदि परिस्थितिः न परिवर्तते तर्हि संसारः कथं चलिष्यति ? मनुष्यः बाल्याद् यौवनं कथं प्राप्नुयात्, मूर्खः विद्वान् कथं भविष्यति ? रोगी निरोगी कथं भविष्यति ? बीजात् वृक्षः कथं भवेत् ? परिवर्तनं विना संसारः स्थिरचित्रवत् भवेत्, वास्तविकरूपेण मरणशील एव मरिष्यति, अमृतस्वरूपः कदापि न मरिष्यति । सर्वेषां प्रत्यक्षानुभवोऽस्ति यत् – मृत्योः पश्चात् शरीरं तु अस्माकं सम्मुखे एव पतति, परन्तु शरीरस्य स्वामी (जीवात्मा) तत निर्गच्छति । यदि सत्यमेतत् स्वीक्रियते तर्हि पुनः चिन्ताशोकयोः नास्त्यवसरः ।

अपि च – **अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत ।**

**अव्यक्तनिधनान्येव तत्र का परिवेदना ॥** (भ.गी २/२८)

**सरलार्थः** हे भारत ! सर्वेऽपि प्राणिनः जन्मनः पूर्वम् अप्रकटरूपेणासन् । मरणानन्तरमपि दृग्गोचराः न भवन्ति । केवलं जन्ममरणयोरन्तराल एव सन्दृश्यते । अतः अस्मिन् विषये का वा चिन्ता ?

**विशेषार्थः** य आदावन्ते च नास्ति, तस्याभावः नित्यः – निरन्तरश्च भवति । तथा य आदावन्ते च अस्ति तस्य भावोऽपि नित्यः निरन्तरश्च भवति । यस्य अभावः नित्यं निरन्तरं च भवति तद् असद् (शरीरम्) अस्ति । तथा यस्य भावः नित्यः निरन्तरश्च भवति सः सत् (शरीरी) अस्ति ।

**ज्ञानयोगस्य – अवधारणा ।**

(१) दृश्यमानं जगत् जडं परिच्छिन्नं नाशवच्च वर्तते । परमात्मा तु अनन्तः चैतन्यस्वरूपः अविनाशी च विद्यते । **अविनाशी तु तद्विद्धि ।** (भ.गी २/१७)

(२) अनात्मोपाधीन् त्यक्त्वा अहं शुद्धः सच्चित्स्वरूपोऽस्मि इत्यनया ज्ञानवृत्या स्वरूपे संस्थितिरेव आत्मदर्शनम् । एक धनिकः स्वप्ने अहं दरिद्रः अपरिमितानि दुःखानि सहमानः तिष्ठामि इति अपश्यत् । यदा सः जागर्ति तदा अवगच्छति यद् नाहं दरिद्रः, अपितु धनवान् । स्वप्ने दृष्टः दरिद्रः, एवं जागृदवस्थायां तिष्ठन् धनिकश्च एक एव इत्येवंविधेन ज्ञानेन यदा जीवभावस्य नाशः भवति तदा मनुष्यः आत्मस्वरूपं जानाति । एवं स्वरूपे संस्थितिरेव ज्ञानयोगः ।

**न हि ज्ञानेन सदृशं पवित्रमिह विद्यते ।**

**तत्स्वयं योगसंसिद्धः कालेनात्मनि विन्दति ॥**

## स्वाध्यायः

### १. योग्यविकल्पं चित्त्वा उत्तरं लिखत ।

(१) मानवे किं वैशिष्ट्यम् ?

(क) इन्द्रियम् (ख) ज्ञानम् (ग) भयम् (घ) आहारः

(२) तत्त्वज्ञानं सर्वेषां किं रूपमस्ति ?

(क) साधनम् (ख) साध्यम् (ग) प्रमाणम् (घ) प्रमेयः

(३) कः ज्ञानं लभते ?

(क) गुणवान् (ख) रूपवान् (ग) धनवान् (घ) श्रद्धावान्

(४) अन्तवन्ति कानि सन्ति ?

(क) मनांसि (ख) इन्द्रियाणि (ग) शरीराणि (घ) वस्तूनि

(५) पावकः आत्मानं किं न करोति ?

(क) छेदयति (ख) क्लेदयति (ग) शोषयति (घ) दहति

### २. रिक्तस्थानं पूरयत ।

(१) तत्त्वज्ञानरूपोऽग्निः ______________ भस्मीकरोति ।

(२) बुद्धिः मनश्च ______________ विशेषः ।

(३) अस्माकं जीवनं ______________ पञ्जरे निहितं वर्तते ।

(४) जगतीतले ज्ञानसदृशं ______________ वस्तु किमपि न विद्यते ।

(५) ______________ सम्प्राप्य साधकः परमां शान्तिमवाप्नोति ।

### ३. युग्मकं योजयत ।

| अ | ब |
|---|---|
| (१) भक्तिः | श्रद्धा |
| (२) ज्ञानम् | विवेकः |
| (३) आत्मा | अव्यक्तादीनि |
| (४) भूतानि | अजः |
| (५) यथार्थज्ञानम् | सूक्तिः |
| | मुक्तिः |

## ४. एकवाक्येन उत्तरं लिखत ।

(१) शास्त्राणि सुखप्राप्तेः कं मार्गं घोषयन्ति ?

(२) मानवः प्रकृत्याः सूक्ष्मानुसन्धानं कया करोति ?

(३) जनाः काम् अवगाह्य निर्मलत्वं यान्ति ?

(४) पावकः कं भस्मीकरोति ?

(५) सर्वाणि भूतानि केवलं कदा सन्दृश्यन्ते ?

## ५. द्वित्रवाक्यैः उत्तरं लिखत ।

(१) **अव्यक्तादीनि भूतानि** इति श्लोकस्य अभिप्रायः कः ?

(२) मानवस्य सर्वेषां प्रयत्नानां प्रेरणास्रोतः किं वर्तते ?

(३) ज्ञानयोगः कोऽस्ति ?

## ६. टिप्पणीं लिखत ।

(१) श्रद्धावान् लभते ज्ञानम् ।

(२) जातस्य हि ध्रुवो मृत्युः ।

(३) नैनं छिन्दन्ति शस्त्राणि

## ७. विस्तृतमुत्तरं लिखत ।

(१) आत्मज्ञानस्य आवश्यकतां प्रतिपादयत ।

(२) **ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुतेऽर्जुन** इति श्लोकस्याभिप्रायं प्रकाशयत ।

(३) **न हि ज्ञानेन सदृशं पवित्रमिहविद्यते** इति श्लोकाभिप्रायं स्पष्टयत ।

●

# १६ भक्तियोगः

### प्रस्तावना

भगवतः गीता भगवद्गीता । अस्याः गीतोपदेशः इत्यपि नामान्तरं वर्तते । श्रीकृष्णः अत्र उपदेशकः, श्रोता च अर्जुनः । हिन्दूनां धर्मग्रन्थत्वेन विद्यते एषा भगवद्गीता । गीतायाम् अष्टादशाऽध्यायाः सन्ति । अस्याः मोक्षशास्त्रम्, ब्रह्मविद्या, गीतोपनिषत् इत्यादीनि नामान्तराणि अपि सन्ति । प्रत्येकम् अध्यायस्य पृथक् नाम वर्तते । कृष्णार्जुनयोः संवादानुसारम् अध्यायाः विभक्ताः सन्ति । तत्र सप्तमाध्यायात् आद्वादशं भक्तियोगः कथ्यते ।

### भक्तिशब्दार्थः ।

सेवार्थकाद् भज्धातोः क्तिन् प्रत्यये भक्तिरिति शब्दो निष्पद्यते । एकाग्रेण मनसा परमशक्तेराराधनम्, सेवनम्, भगवद्भजनम्, पूज्यसेवनं वा भक्तिरुच्यते । सम्पूर्णस्य जगतः स्थावरजंगमवस्तूनामेकमेव कारणम्, एक एव रक्षको पालको वा परमेश्वर उच्यते । सर्वैः सह प्रेमपूर्णव्यवहारः कर्तव्य इति भगवत आज्ञा, दीनहीनपतितजनानां क्लेशापहरणमेव परमात्मनः आदेशः । तं प्रति विश्वासः, प्रीतिः, तदादेशरूपाणां शास्त्रनियमानां पालनं वा भगवद्भक्तिरिति मन्यते ।

**मोक्षसाधनसामग्र्यां भक्तिरेव गरीयसी** इति शंकरभगवत्पादीयं वचनं भक्तेरावश्यकतां साधनान्तरेभ्यस्तस्याः वैशिष्ट्यं च प्रद्योतयति आह च भगवान् श्रीकृष्णः – **भक्त्या त्वनन्यया शक्यः अहमेवंविधोऽर्जुन । भक्त्या तुष्यति केवलं न तु धनैः भक्तिप्रियो माधवः** इति अभियुक्तोक्तिः । एवं च साधकैरवश्यं भक्तिः सम्पादनीया इत्युक्तं भवति ।

देवर्षिनारदप्रणीतभक्तिसूत्रेषु भक्तेः स्वरूपम् एवं निरूपितमस्ति ।

**अथाऽतो भक्तिं व्याऽख्यास्यामः । १ ।**

**सा त्वस्मिन् परमप्रेमरूपा । २ ।**

**अमृतस्वरूपा च । ३ ।**

**सरलार्थः** परमात्मनि अनन्यप्रेमस्वरूपा निर्मला या भावनास्ति सैव भक्तिरुच्यते । दिने दिने प्रवर्धमाना विनाशरहिता सा अमृतस्वरूपा भवति । अपि च – **यल्लब्ध्वा पुमान् सिद्धो भवति, अमृतो भवति, तृप्तो भवति** । ४ । **यं प्राप्य न किञ्चिद् – वाञ्छति, न शोचति, न द्वेष्टि, न रमते, नोत्साही भवति** । ५ । **यज्ज्ञात्वा मत्तो भवति, स्तब्धो भवति, आत्मारामो भवति** । ६ ।

**सरलार्थः** पूर्वतनेषु चतुर्षु सूत्रेषु भक्तेः स्वरूपं विविच्य, अग्रिमेषु त्रिषु सूत्रेषु भक्तिफलं निरूप्यते ।

पूर्वोक्ताम् अमृतस्वरूपां भक्तिं प्राप्य मानवः सिद्धो भवति, न हि कश्चित् तस्य साध्यं वर्तते । जरामरणादिदुःखरहितः सन् स अमृतो भवति, पूर्णकामश्च भवति । अलौकिकानन्ददायिनं तं भक्तिरसं निपीय भक्तः न किञ्चित् लौकिकं सुखमिच्छति । मानापमान – जयपराजयादिद्वन्द्वसहिष्णुः सन् लौकिकव्यवहारेषु न किञ्चिद् दुःखमनुभवति । रागद्वेषयोः निर्मूलनात् न कस्यचिद् विरोधं कुरुते, नात्यन्तं कस्मैचिद् स्निह्यति । नात्यन्तं विषयेषु उत्साही भवति । अलौकिकानन्ददायिन्यः परमात्मनः भक्तिरसं निपीय भक्तो कदाचिद् उन्मत्त इव आचरति, कदाचित् परमात्मविचारे निमग्नः सन् लौकिकव्यापारान् विस्मृत्य तूष्णीको भवति, कदाचित् भक्तिरसपानेन सन्तुष्टमानसे आत्मरतिर्भवति, ब्राह्मीस्थितिं चाप्नोति ।

### वेदेषु भक्तिशब्दार्थः ।

अखण्डोऽपि आम्नायः प्रतिपाद्यविषयभेदात् कर्मोपासनाज्ञानकाण्डत्वेन त्रिधा विभिक्तो दृश्यते । तत्र मन्त्रब्राह्मणभागौ कर्मकाण्डं प्रतिपादयतः । उपनिषद्रूपोऽन्तिमोभागः ज्ञानकाण्डत्वेन लोके प्रसिद्धः । तृतीयः आरण्यकभागः प्रायः उपासनापरकः दरीदृश्यते । तथापि सम्पूर्णेऽपि वेदे उपासनाख्या–भक्तिः तत्र तत्र दृग्गोचरीभवति । ऋग्वेदस्य हिरण्यगर्भसूक्ते एकः मन्त्रः प्राप्यते ।

**य आत्मदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः ।**

**यस्य छायाऽमृतं यस्य मृत्युः कस्मै देवाय हविषा विधेम ॥** (ऋग्वेद. ८-७-३)

**सरलार्थः** यः परमेश्वरः आत्मज्ञानदाता, भौतिकाध्यात्मिकबलयोर्दाता, यं सर्वेपि लोका उपासते, यस्य उत्कृष्टं शासनं आज्ञां च सर्वाऽपि प्राकृतिकशक्तयः तथा विद्वज्जनाश्च स्वीकुर्वन्ति, यस्य कृपादृष्ट्याम् अमरत्वमस्ति, यस्य अस्वीकारे मृत्युर्भवति, तस्य सुखस्वरूपस्य परमेश्वरस्य विशेषभक्त्या श्रद्धया च वयम् उपासनां कुर्मः ।

ब्रह्मसूत्रशांकरभाष्ये चतुर्थाध्यायस्य प्रथमपादे आवृत्यधिकरणे विषयोऽयम् अवलोक्यते । "**विद्युपास्त्योश्च वेदान्तेषु अव्यतिरेकेण प्रयोगो दृश्यते । किञ्चिद्विधिनोपक्रम्य उपासिनोपसंहरति, यथा - यस्तद्वेद यत्स वेद स मयैतदुक्तः** (छा. ४-१-४) इति । **अनु म एतां भगवो देवतां शाधि यां देवतामुपास्से** (छा. ४-४-२) इति ।

**सरलार्थः** हे भगवन् रैक्व ! भवान् मह्यं तस्याः देवताया उपदेशं कुरु यां भवान् उपास्ते इति ।

क्वचिच्च उपासिनोपक्रम्य विधिनोपसंहरति, यथा-"**मनो ब्रह्मेत्युपासीत**" (छा. ३-१८-१) इति "**भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन य एवं वेद**" (छा. ३-१८-३) ।

**सरलार्थः** यः उपासनाद्वारा ब्रह्मतत्त्वं जानाति सः विशेषरूपेण प्रकाशते, सूर्यवत्प्रज्वलति, कीर्तिमान् यशस्वी ब्रह्मवर्चस्वी च भवति ।

**शास्त्रेषु भक्तिस्वरूपम्** -

श्रीमन्निगमान्तदेशिकाचार्यैः विरचिते तत्त्वमुक्ताकलापाख्ये ग्रंथे भक्तेर्मुक्तिसाधनत्त्वम् सुचारुतया संग्रहीतमस्ति ।

**भक्तिर्मुक्तेरुपायः श्रुतिशतविहितः, सा च धीः प्रीतिरूपा ।**

**तन्निष्पत्यै फलेच्छाद्युपधिविरहितं कर्म वर्णाश्रमादेः ॥**

**ज्ञानध्यानादिवाचां समफलविषया सैव युक्ता प्रतिष्ठा ।**

**सामान्योक्तिः समानप्रकरणपठिता पर्यवस्येद्विशेषे ॥** (जीवसरः २९)

**सरलार्थः** श्रुतिशतैः प्रतिपादिता भक्तिरेव मुक्तिसाधनमस्ति । यथा - "**देवं भजते, देवमुपास्ते, ब्रह्मोपास्ते, आत्मानमुपासीत**" इत्यादि श्रुतयः । सा च भक्तिः स्वोपास्यदेवतायाम् अतिशयप्रेमरुपा भवति । "**महनीयविषये प्रीतिर्भक्तिः**" इत्याचार्याः । वर्णाश्रमादिधर्माणां हि प्राजापत्यलोकावाप्तिः फलं स्मर्यते । अथापि एतादृश फलेच्छादिरूपोपाधिरहितं ब्राह्मणत्वादिवर्णांगभूतम्, ब्रह्मचर्याद्याश्रमाङ्गभूतं च कर्म चित्तशुद्धिद्वारा भक्त्युत्पत्तेरुपायो भवति । ज्ञानध्यानोपासनाशब्दानां मुक्तिरूपसमानफलवती भक्तिरेव प्रतिष्ठिता युक्तियुक्ता च भवति । अत्रैकः न्यायः अनुसन्धेयः वर्तते । **समानप्रकरणपठिता सामान्योक्तिः विशेषे पर्यवस्येत्** अर्थात् - मोक्षसाधनस्वरूपसमानार्थप्रकरणेषु दृश्यमानः सामान्यशब्दप्रयोगः विशेषार्थवाच्ये पर्यवस्यति । अर्थात् मुक्तौ तारतम्याभावात् ज्ञानवेदनादिसामान्यपदानां भक्तिरूपज्ञानविशेषबोधकत्वं शक्त्यैव सम्भवति ।

"**भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन । ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परंतप ।**" इति गीतावचनानुसारं, **यस्य देवे पराभक्तिः, आत्मानमुपासीत** इत्यादि श्रुतिस्मृतिवचनैश्च प्रतिपादिता भक्तिरेवमुक्तिसाधनमिति सिध्यति ।

**पुराणेषु भक्तियोग**

तस्याश्च भक्तेर्नवविधत्वमुक्तं भागवते -

**श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् ।**

**अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ॥** (भाग. ५.२३)

प्रसिद्धश्चायं नवविधभक्तानां परिचायकः श्लोकः –

**श्रीकृष्णश्रवणे परीक्षिदभवत् वैय्यासकिः कीर्तने ।**
**प्रह्लादः स्मरणे तदङ्घ्रिभजने लक्ष्मीः पृथुः पूजने ॥**
**अक्रूरस्त्वभिवन्दने कपिपतिर्दास्ये च सख्येऽर्जुनः ।**
**सर्वस्यात्मनिवेदने बलिरभूत् कैवल्यमेषां समम् ॥**

**सरलार्थः** व्यासपुत्रस्य शुकदेवस्य मुखात् श्रीमद्भागवतकथाश्रवणाद् राजा परीक्षितः श्रवणभक्त्या मुक्तिमवाप । व्यासपुत्रो शुकदेवः अनवरतं श्रीकृष्णस्य कीर्तनेन संकीर्तनभक्त्या मुक्तिभाक् बभूव । दैत्यपुत्रः प्रह्लादोऽपि पित्रा हिरण्यकशिपुना अनेकविधैरुपायैः मृत्यकूपं पातितस्सन्नपि सततं हरिस्मरणेन स्मरणभक्त्या विष्णुपदमवाप । रमापि अनवरतं नारायणस्य पादसेवनेन मुक्तिमवाप । महाराजः पृथुः विष्णोरर्चनभक्त्या निःश्रेयसं जगामेति पुराणप्रसिद्धमेव । अक्रूरस्तु श्रीकृष्णस्य अभिवन्दनेन मुक्तिं जगाम । हनुमान् रामकार्यसाधनेन दासभक्त्या चिरञ्जीवित्वमवाप । आजीवनं सख्यभावेन श्रीकृष्णं संसेव्य अर्जुनोऽपि कैवल्याधिकारी बभूव । दानवेन्द्रो बलिरपि स्ववचपरिपालनार्थम् आचार्यशुक्रवचनमुल्लङ्घ्य वामनाय स्वसमर्पणेन आत्मनिवेदनभक्त्या कैवल्यलक्ष्याः करं जग्राह ।

एवञ्चैते भक्ताः नवधाभक्त्या मोक्षगामिनो बभूवुः । अत्र यद्यपि पन्थानो विविधाः परं प्राप्यस्तु एक एव । भक्तिप्रियो वासुदेवः भक्तस्य आचरणं-वयः-विद्यां-जातिं-पौरुषं-रूपं-धनं वा नापेक्ष्यते अपितु केवलां निर्मलां भक्तिम् । तदुक्तमभियुक्तैः –

**व्याधस्याचरणं ध्रुवस्य च वयो विद्यागजेन्द्रस्य का ।**
**का जातिर्विदुरस्य यादवपतेः उग्रस्य किं पौरुषम् ॥**
**कुब्जायाः कमनीयरूपमधिकं किं तत् सुधाम्नोर्धनम् ।**
**भक्त्या तुष्यति केवलं न धनैः भक्तिप्रियो माधवः ॥**

अमुमेवविषयं प्रतिपादयति स्वयं भगवान् वासुदेवः ।

**पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ।**
**तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ॥** (भ.गी. ९/२६)

**विशेषार्थः** यो भक्तः अनायासेन यथासाध्यं पत्रं पुष्पं फलं जलं वा प्रेमपूर्वकं भगवते अर्पयति, तद्भगवान् साक्षात् स्वीकरोति । यथा – द्रौपद्याः तुलसीपत्रं स्वीकृत्य भगवान् त्रीन् लोकान् अतर्पयत् । गजेन्द्रः सरोवरस्य एकं पुष्पं भगवते समर्प्य नमस्कृतवान्, भगवान् तु गजेन्द्रस्य उद्धारमेव अकरोत् । शबर्या दत्तं फलं खादित्वा भगवान् तावत् प्रसन्नोऽभूत् । रन्तिदेवः अन्त्यजरूपेण आगताय भगवते जलं पायितवान्, तेन च भगवतः साक्षात् दर्शनमेव सम्पादितवान् ।

श्लोकस्य भावोऽस्ति यत् – पदार्थानां प्रमुखता नास्ति, प्रत्युत भक्तस्य भावनाया मुख्यतास्ति, यतो हि भगवान् भावग्राही विद्यते । "**भावग्राही जनार्दनः**" न तु पदार्थानाम् । अतः अर्पयितुः भावः भक्तिपूर्णः स्यात् । अस्माभिः दृश्यते न वा, परन्तु भावपूर्वकं प्रदत्तं भोगं भगवान् अवश्यमेव स्वीकरोति ।

मनुष्यः यदा पदार्थानामाहुतिं प्रददाति । तदा स यज्ञो भवति । वस्तूनि अन्येभ्यः प्रयच्छति चेत् तद्दानं कथ्यते । संयमपूर्वकं स्वकार्यार्थमपि अपरिग्रहात् तपो जायते । तथा भगवते अर्पणेन भगवता सह योगः (नित्यसम्बन्धः) भवति । एते सर्वेऽपि एकस्यैव त्यागस्य विविधस्वरूपाः सन्ति । **त्यागेनैके अमृतत्वमानशुः** इति श्रुतिः ।

**भक्तस्वरूपम् ।**

भक्तेः स्वरूपनिरूपणानन्तरं गीतायां भक्तियोगाख्ये द्वादशेऽध्याये प्रियभक्तस्य गुणलक्षणयोर्विषये कथयति भगवान् वासुदेवः –

**अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च ।**
**निर्ममो निरहङ्कारः समदुःखसुखः क्षमी ॥ १२/१३ ॥**
**सन्तुष्टः सततं योगी यतात्मा दृढनिश्चयः ।**
**मय्यर्पितमनोबुद्धिः यो मद्भक्तस्स मे प्रियः ॥ १२/१४ ॥**

**सरलार्थः** यः कस्यामपि परिस्थितौ विचलितो न भवति । यः इर्ष्यारहितः समस्तप्राणिनां कृते मित्रभावयुतः दयालुश्च भवति, यः ममत्वरहितः अहंकारहीनः, सुख-दुःखे समभावयुक्तः क्षमाशीलश्च भवति, अपि च निरन्तरं सन्तुष्टः, भगवद्भक्तौ रतः, आत्मसंयमी, दृढसंकल्पवान् च भवति, यः सर्वदा स्वमनः बुद्धिं च मयि परमात्मनि सन्निवेश्य तिष्ठति, एतादृशः भक्तः मम अतीव प्रियः वर्तते ।

**गीतायां भक्तियोगः**



भक्तियोगः गीताज्ञानस्य अमृतफलम् अस्ति । अयमेव राजविद्या शब्देनापि प्रोक्तः । अपि चायं सर्वेषां रहस्यानां रहस्यम् अस्ति । भक्तिं विना साधकस्य साधनरूपम् आचरणम् अपूर्णमेव तिष्ठति । विराड्पुरुषस्य दर्शनान्ते भगवान् श्रीकृष्णः प्रतिपादयति यत् – देवदुर्लभस्य विराड्रूपिणः साक्षात्कारः न वेदेन, न तपसा, न दानेन, न चेज्यया विधातुं शक्यते, अपितु अनन्यभक्त्यैव सम्भवति । अनयैव जीवः ईश्वरं साक्षात्कर्तुं तत्त्वतो ज्ञातुं च शक्नोति, भगवता सह ऐक्यभावमपि लब्धुं प्रभवति । अनन्यभक्तितत्त्वस्य स्वरूपं श्रीमद्भगवद्गीतायामेवं निरूपितम् ।

**मत्कर्मकृद् मत्परमो मद्भक्तः संगवर्जितः ।**
**निर्वैरः सर्वभूतेषु यः स मामेति पाण्डव ॥** (भ.गी. ११/५५)

साधकः यज्ञ – दान – तपःप्रभृतीनि सर्वाणि कर्तव्यकर्माणि भगवद्रूपाणि मत्वा साधनारतः भवेत् । भगवन्तमेव परमाश्रयं मत्वा तत्प्राप्त्यर्थं सततं प्रयत्नशीलः भवेत् । तादृशभक्तियोगस्य अनुष्ठाता, अनासक्तः सर्वप्राणिषु शत्रुभावरहितश्च जनः भक्तोऽस्ति । भक्तस्य साधनायाः स्वरूपमेव भक्तिरस्ति । भगवत्प्राप्तिरेव भक्तेः फलं विद्यते । श्रीमद्भगवद्गीता लोककल्याणाय सगुण – सकाम – भक्तिमार्गस्य उपदेशं प्रददाति । भक्तिः उपासनापद्धतिम् अवलम्ब्य प्रवर्तिताऽस्ति । गीतायाम् – इतरसाधनेभ्यः अविरोधेन भक्तियोगः प्रतिपादितोऽस्ति । गीताया भक्तियोगे भक्तस्य महत्त्वं सर्वोपरि निर्धारितम् अस्ति । आर्तभक्तः, जिज्ञासुभक्तः अर्थार्थीभक्तः, ज्ञानीभक्तश्चेति भक्तानां चातुर्विध्यं प्रतिपादितमस्ति ।

यथा – **चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन ।**
**आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ॥** (भ.गी. ७/१६)

**विशेषार्थः अर्थार्थीभक्तः** – यस्य केवलं न्याययुक्तस्य सुख-सामग्रीणामिच्छा भवति, अर्थात् धन-सम्पत्ति-वैभवादीनामिच्छा भवति, परन्तु तां केवलं ईश्वरात् एव इच्छति नत्वन्येभ्यः, सः भक्तः अर्थार्थीभक्त इति कथ्यते ।

चतुष्प्रकारकेषु भक्तेषु अर्थार्थी आरम्भिकः भक्तः विद्यते । पूर्वसंस्कारवशात् तस्य धनेच्छा तु भवति, सः धनार्थं चेष्टामपि करोति, परन्तु सः जानाति यत् भगवत्समानः धनेच्छायाः पूरयिता नास्त्यन्य इति । एवं ज्ञात्वा सः धनप्राप्त्यर्थं तत्परतापूर्वकं भगवन्नाम-जप - कीर्तनानि, भगवत्स्वरूपध्यानञ्च सर्वदा आचरति । धनप्राप्त्यर्थं तस्य केवलं भगवदुपर्येव विश्वासः निष्ठा च भवति । अर्थार्थी भक्तेषु मुख्यतया ध्रुवस्य नामग्रहणं भवति ।

**आर्तभक्तः** प्राणसंकटे, आपत्काले, प्रतिकूलघटनायां च दुःखीभूय स्वदुःखनिवारणार्थं भगवन्तं प्रार्थयति, तथा दुःखनिवारणं केवलं ईश्वरात् एव कामयते, अन्येषामुपायानां संस्मरणमपि न करोति, स आर्तभक्त इति उच्यते । आर्तभक्तस्य कृते उत्तरायाः वृत्तान्तं सुन्दरमुदाहरणमस्ति । यतो हि - यदा तस्या आपत्तिः समागता, तदा सा भगवन्तं विहाय अन्यस्य कस्यचिदुपायस्य सहायं नाङ्गीकृतवती । अन्योपायानामुपरि तस्याः दृष्टिरेव न गता । सा केवलं भगवत्सहायमेव प्रार्थितवती । अर्थात् कामनायां सत्यामपि आर्तभक्तः तस्याः पूर्तिं केवलं भगवत एव अभिलषति ।

**जिज्ञासुभक्तः** यस्मिन् स्वस्वरूपं भगवतत्वञ्च ज्ञातुं तीव्रेच्छा समुदेति, सः जिज्ञासुभक्तः कथ्यते । यथा - वास्तविकं मत्स्वरुपं किम् ? भगवत्तत्वं किमस्ति ? तत्त्वज्ञानार्थं शास्त्रस्य, गुरोः वा श्रवण-मनन-निदिध्यासनादिन्युपायानामाश्रयं विना केवलं भगवन्तमेव आश्रित्य तं तत्त्वं केवलं भगवन्मुखादेव ज्ञातुमिच्छति सः जिज्ञासुभक्तः प्रोच्यते ।

जिज्ञासुभक्तः सः भवति यस्य जिज्ञास्यं केवलं भगवत्तत्वं तथा उपायोऽपि केवला भगवद्भक्तिरेव भवति, अर्थात् उपेय-उपाययोरनन्यता भवति । अत्र उद्धवदृष्टान्तः भवितुमर्हति । भगवान् वासुदेवः उद्धवस्य दिव्यज्ञानोपदेशं चकार, या च उद्धवगीता नाम्ना प्रसिद्धास्ति ।

**ज्ञानीभक्तः** ज्ञानी भक्तस्य अनुकूलादनुकूला - प्रतिकूलात्प्रतिकूला परिस्थितिः, व्यक्तिः - वस्त्वादीनि सर्वाणि भगवत्स्वरूपाण्येव दृश्यन्ते, अर्थात् तद्दृष्ट्या अनुकूला प्रतिकूला च परिस्थितिः केवलं भगवल्लीलामात्रं भवति । यथा भगवति स्वस्य अनुकूलताप्राप्त्यर्थं प्रतिकूलतानिवारणार्थं बोधप्राप्त्यर्थं वा काचिदपि अभिलाषा न भवति, स तु भक्तानां प्रेम्णा एव सन्तुष्टो भवति, तथैव ज्ञानिभक्तेषु कापि अभिलाषा न भवति, स तु केवलं भगवत्प्रेम्णि एव आनन्दतुन्दिलो भवति ।

ज्ञानिभक्तेषु गोपीनां नामोल्लेखः भवति । देवर्षिः नारदोऽपि **यथा व्रजगोपिकानाम्** (भ.सू. २१) इत्युक्त्वा गोपीः प्रेमिभक्तानां आदर्शान् मनुते । यतो हि गोपिषु स्वसुखस्य सर्वथा त्याग आसीत् । प्रियतमस्य भगवतः सुखमेव तासां सुखमासीत् । ज्ञानिभक्तस्य आकर्षणं केवलं भगवद्विषये भवति । तस्य कापि व्यक्तिगतेच्छा न तिष्ठति, अत एव सः श्रेष्ठोऽस्ति ।

एषु चतुर्षु भक्तेषु ज्ञानिनः श्रेष्ठता प्रतिपादितास्ति । ज्ञानी भक्तः भगवत आत्मरूपो भवति । यथोक्तम् - "**तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते ।**" एवं श्रीमद्भगवद्गीता विविधमार्गेषु समन्वयं प्रदर्श्य साधनामार्गं सुगमं सुलभं च करोति ।

### गीतायां भक्तियोगविवेचनम्

गीतावचनानुसारं कर्म - ज्ञान - ध्यान - भक्तिमार्गाः एकस्यैव ईश्वरस्य प्राप्त्युपायाः सन्ति । अध्यात्मसाधकः एषां मार्गाणां यथेच्छम् उपयोगं कर्तुं शक्नोति । गीतायाः साधनामार्गस्य प्रारम्भो निष्कामकर्मणा अनन्यशरणागतिभावेन च भवति । निष्कामकर्मणोऽनुष्ठानेन, नियमपूर्वकं ध्यानयोगस्य अभ्यासेन च साधको ब्रह्मभावं प्राप्नोति । तस्य चेतसि समत्वभावना जागर्ति । एषैव ब्राह्मीस्थितिः गीतायां प्रतिपादिता ।

यदा ब्राह्मीस्थितिः समुदिता भवति, तदा साधकः उत्कृष्टां भक्तिं लभते । भक्तेरुदयानन्तरमेव परमज्ञानस्य अधिकारी भवति । परमज्ञानेनैव भगवतः स्वभावं स्वरूपं विभूतिगुणांश्च यथार्थतो जानाति । परमज्ञानस्य फलम् ईश्वरोपलब्धिरस्ति । ईश्वरोपलब्धये प्रपत्तिरावश्यकी । प्रपत्तिमार्गेऽन्यमार्गाणां नैसर्गिकं पर्यवसानमस्ति । गीतायाः गुह्यं ज्ञानमिदमेवास्ति । उक्तञ्च-

**मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।**

**मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः ॥** (भ.गी. ९/३४)

वस्तुतो ज्ञानकर्मणोरुभयो: समन्वय: भक्तौ दृश्यते, भक्त एव यथार्थत: ज्ञानी कर्मयोगी च भवितुं शक्नोति । स्वयं भगवता श्रीकृष्णेनोक्तम् - शास्त्रज्ञानस्य, प्रत्यक्षदर्शनस्य, भगवदैक्यस्य च प्राप्तिरनन्यभक्त्यैव सम्भवति । सात्विकीं श्रद्धां, दैवीं सम्पत्तिं च विना अनन्यभक्तिर्नैव सम्भवति । अतो भगवद्भक्त्यै अभय-सत्वशुध्यादि सद्गुणानाम् उपार्जनं नितान्तम् आवश्यकमस्ति । इयम् अनन्यभक्ति: सद्गुणाश्च सात्विकश्रद्धयैव उद्भवन्ति । अतो दैवींसम्पत्तिं लब्ध्वा कर्मज्ञाने तदुपयोगं विधाय अनन्यभक्तिरेव आचरणीयेति गीताया: सन्देशोऽस्ति ।

### भक्तिज्ञानयो: परस्परं सापेक्षा ।

भक्तिज्ञानयोर्मध्ये आन्तरिकविरोध: नास्त्येव:, व, यतो हि यावत् ज्ञानं न भविष्यति तावत् भक्ति: कुत: सम्भवा ? ज्ञानेनैव ईश्वरानुराग: समुदेति । भक्तिं विना ज्ञानमपि नीरसं भवति, ज्ञानविहीना भक्तिरपि नेत्रहीनेवास्ति । उभयो: परस्परं सम्बन्धोऽस्ति । यश्च भक्तोऽस्ति स: न कदापि ज्ञानमुपेक्षते । ज्ञानी अपि भक्तेरुपेक्षां कर्तुं न क्षमते ।

### उपसंहार: ।

एवं भगवद्गीताया: दार्शनिकविचाराणाम् अयमेवाशयोऽस्ति यत् ईश्वरं प्रति समर्पणभावेन अनासक्तिभावेन च कर्म कुर्वाणो जन: न कदापि कर्मबन्धने निपतति, न च सांसारिकता तस्मिन् प्रभावमुत्पादयति । जीवनसंग्रामेऽसौ कर्मयोगी ज्ञानस्योपयोगेन सह भक्तिमाचर्यमाणो मुक्तिं लभते ।

**अनन्याश्चिन्तयन्तो मां ये जना: पर्युपासते ।**
**तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥**

## स्वाध्याय:

### १. योग्यं विकल्पं चित्वा उत्तरं लिखत ।

(१) मुक्तिसाधनमस्ति ।

(क) शक्ति: (ख) युक्ति: (ग) भक्ति: (घ) आसक्ति:

(२) श्रवणभक्त्या क: मुक्तिमवाप ?

(क) अर्जुन: (ख) परीक्षित् (ग) बलि: (घ) पृथु:

(३) जनार्दन: ................. भवति ।

(क) गुणग्राही (ख) भावग्राही (ग) धनग्राही (घ) रूपग्राही

(४) जना: कतिधा भगवन्तं भजन्ते ?

(क) द्विधा (ख) त्रिधा (ग) पञ्चधा (घ) चतुर्विधा

(५) परमज्ञानस्य फलमस्ति ।

(क) धनप्राप्ति: (ख) ईश्वरोपलब्धि: (ग) वस्तुप्राप्ति: (घ) विद्याप्राप्ति:

### २. रिक्तस्थानं पूरयत ।

(१) हिन्दूनां धर्मग्रन्थत्वेन ______________ विद्यते ।

(२) मोक्षसाधनसामग्र्यां ______________ गरीयसी ।

(३) समानप्रकारणपठिता सामान्योक्ति: ______________ पर्यवस्येत् ।

(४) सततं हरिस्मरणेन ______________ विष्णुपदमवाप ।

(५) भक्तियोग: गीताज्ञानस्य ______________ अस्ति ।

### ३. युग्मकं योजयत ।

| अ | ब |
|---|---|
| (१) ज्ञानीभक्त: | मुक्ति: |
| (२) लक्ष्मी: | गोप्य: |
| (३) भक्तिप्रिय: | माधव: |
| (४) द्रौपदी | पादसेवनम् |
| (५) भक्ति: | पुष्पम् |
| | तुलसीपत्रम् |

### ४. एकवाक्येन उत्तरं लिखत ।

(१) भक्तस्य साधनाया: स्वरूपं किमस्ति ?

(२) चतुर्षु भक्तेषु क: श्रेष्ठोऽस्ति ?

(३) मन्त्रब्राह्मणभागौ किं प्रतिपादयत: ?

(४) तत्त्वमुक्ताकलापस्य रचयिता कोऽस्ति ?

(५) हनुमान् कथं साक्षात्कारमवाप ?

### ५. द्वित्रवाक्यै: उत्तरं लिखत ।

(१) जिज्ञासुभक्तस्य स्वरूपं लिखत ।

(२) भक्तिशब्दार्थं निरूपयत ।

(३) त्यागस्य विविधस्वरूपा: के सन्ति ?

### ६. टिप्पणीं लिखत ।

(१) वेदेषु भक्तिशब्दार्थ:

(२) भक्तस्वरूपम् ।

(३) भक्तिज्ञानयो: परस्परं सापेक्षा ।

### ७. विस्तृतमुत्तरं लिखत ।

(१) पुराणेषु भक्तिस्वरूपं निरूपयत ।

(२) गीतायां भक्तियोगस्वरूपं विवेचयत ।

(३) नारदभक्तिसूत्रानुसारं भक्तिस्वरूपं प्रकाशयत ।

# १७ कर्मयोगः

## प्रस्तावना

भारतीयविचारानुसारेण अत्मोन्नतिं साधयितुं चत्वारो मार्गा उपदिष्टाः सन्ति-कर्ममार्गः भक्तिमार्गः ज्ञानमार्गः योगमार्गश्चेति । तत्र सर्वजनसुलभः परन्तु अतीव गहनोऽस्ति कर्ममार्गः । स च सुतरां कुशलतापूर्वकं निर्वहणीयो भवति, अन्यथा तदेवकर्म चक्रारपंक्तिरिव जनान् मुहुर्मुहुः संसारचक्रे परिभ्रामयति । तदेवोक्तं श्रीकृष्णेन – ''**गहना कर्मणो गतिः**'' (भ.गी. ४-१७) । तदेव कर्म जीवात्मानं परमात्मना सह योजयतीति 'कर्मयोग' नाम्ना गीताशास्त्रे प्रसिद्धोऽस्ति ।

## कर्मशब्दार्थः ।

डुकृञ् करणे इति धातोः निष्पन्नः कर्मशब्दः क्रियासामान्यवाचकोऽस्ति । अर्थात् सम्पूर्णस्य जगतः सृष्टेरारभ्य आप्रलयं निरन्तरं प्रचलमाणस्य क्रियाकलापस्य संसूचकोऽस्ति । वर्ण-आश्रम-स्वभाव-परिस्थितीनाञ्च अनुसारं यत् शास्त्रविहितं कर्तव्य-कर्म समक्षमायाति तस्य कामना-ममता-आसक्तीनां सर्वथा परित्यागेन, तथा कर्मणः सिध्यसिध्योः समत्वेन स्वीकार एव कर्मयोगः कथ्यते ।

## कर्मस्वरूपम्

अर्जुनः युद्धभूमेः पलायनं कर्तुं इच्छति स्म । पलयनपक्षे सः नैकान् तर्कान् उपस्थापयति । अत्र युद्धः प्रतीकात्मकोऽस्ति । सम्पूर्णजीवनमेव एकप्रकारकः युद्धोऽस्ति । यश्च स्तरद्वयेन योद्धुं शक्यते, तत्र प्रथमः बाह्यपरिस्थितीभिः, द्वितीयः आन्तरिकवृत्तिभिः सह । अर्जुनः समक्षमुपस्थितेन कर्मणा पलायितुमिच्छति, परन्तु कर्मणः पलायनं वास्तविकरूपेण असम्भवमस्ति । गीता कथयति यत् – **कर्मभ्यः पलायनं न सम्भवति ।** यदि मनुष्यः पलायनं करोति तर्हि सः पलायनाख्यं कर्मैव करोति । युध्यति चेत् युद्धाख्यं कर्म करोति । भोजनम्, पानम्, उत्थानम्, उपवेशनम्, शयनम्, जागरणम् इत्येतानि सर्वाणि कर्माण्येव सन्ति ।

कर्मचेष्टा तदा स्तब्धा भवति यदा च जीवनमेव समाप्तिमेति । तादृश एकोऽपि क्षणः नास्ति यं तादृशम् एकमपि क्षणं नास्ति यत् विना कर्म व्यतीतं भवति । तदुक्तं गीतायाम् –

**न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत् ।**
**कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः ॥** (भ.गी. ३-५)

**अर्थात्** – न किञ्चित्करोमि इति निश्चित्य स्थितोऽपि जनः स्वस्वप्रकृतिसमुद्भवैः सत्वरजस्तमोभिः गुणैः प्राक्तनकर्मानुगुणं स्वोचितं कर्म अवशः सन् करोत्येव ।

**कर्म अपरिहार्यमस्ति ।** अस्यां स्थितौ व्यक्तेः पुरतः विकल्पद्वयमात्रम् अवशिष्यते – कर्मणः चयनम् अथवा कर्मणि स्वदृष्टिकोणस्य परिवर्तनम् । कदाचित् कर्मणः चयनमपि स्वाधीने न भवति । उदाहरणार्थं यदि कस्मिंश्चिद् अरण्ये कश्चन व्याघ्रः जनस्योपरि आक्रमणं करोति तर्हि तस्य समीपे विकल्पद्वयमात्रमवशिष्यते-प्रतीकारः, पलायनम् वा । यदि जनः तादृशप्रदेशे स्थितोस्ति, यस्मात् पलायनमशक्यं तर्हि मानवस्य, व्याघ्रेण सह युद्धमनिवार्यं भवति । एतादृशी विकल्पशून्यावस्था मानवजीवने आयात्येव । अत एव कर्मफले स्वदृष्टिकोणस्य परिवर्तनमेव उचितं भवति ।

**कर्मप्रकाराः**

प्रायः भारतीयदर्शनेषु कर्म सञ्चित-प्रारब्ध-क्रियमाणेति त्रिधा विभक्तमवलोक्यते । तत्र जन्म-जन्मान्तरेषु अर्जितं पुण्य-पापादिकं कर्मैव सञ्चितकर्मेति प्रोच्यते । पूर्वार्जितस्य यस्य कर्मणः फलप्रदानमारब्धं तत् प्रारब्धकर्मेति कथ्यते । वर्तमानसमये आचर्यमाणं कर्मैव क्रियमाणकर्मेति व्यवह्रियते । एतेषां त्रयाणां कर्मणां विनाशक्रमोऽपि गीतायां प्रोक्तमस्ति । तत्त्वज्ञानेन अनेकजन्मनां सञ्चितकर्माणि सर्वथा विनश्यन्ति ।

**ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुतेऽर्जुन ॥** (भ.गी. ४-३७)

यतो हि सर्वाणि सञ्चितकर्माणि अज्ञानाश्रितानि सन्ति, अतः ज्ञानोदयादेव तानि सर्वाणि विनश्यन्ति । तत्त्वज्ञानादनन्तरं कर्तृत्वाभिमानं न भवति, अतः सर्वाणि क्रियमाणकर्माणि अकर्माणि भवन्ति । प्रारब्धकर्मण अवशेषं तु यावच्छरीरधारणं भवत्येव, परन्तु ज्ञानिनामुपरि तस्य कोऽपि प्रभावः न भवति । कारणमस्ति यत् - तत्त्वज्ञानानन्तरं भोक्तृत्वं न विद्यते, अत अनुकूले-प्रतिकूले च परस्थितौ समागतेऽपि सः सुखी दुःखी वा न भवति । एवं तत्त्वज्ञानानन्तरं सञ्चित-प्रारब्ध-क्रियमाणैः त्रिभिः कर्मभिः न कश्चित् सम्बन्धः तिष्ठति । अतः अनासक्तिभावेन केवलं कर्तव्यबुध्या क्रियमाणं कर्म कर्मयोगेति कथ्यते ।

**कर्मसु ज्ञानयोगः भक्तियोगश्च**

ज्ञान-भक्तिभ्यां संवलितं कर्मैव सर्वदा सफलं भवति । सर्वेषां कर्मणां फलदाता ईश्वर एवेति अचलश्रद्धा एव भक्तिः, ईश्वरेण प्रदत्तं कर्मफलं सुखम् असुखं वा भवतु, परन्तु तस्य केवलं भगवत्प्रसादबुद्ध्या समत्वभावनया स्वीकार एव ज्ञानयोगः । एवं भक्तिज्ञानाभ्यां संवलितं कर्मैव कर्मयोगनाम्ना अभिधीयते गीतायाम् ।

**गीतायां कर्मयोगः**



विषयेऽस्मिन् श्रीमद्भगवद्गीतायाः श्लोकोऽयं महत्वपूर्णं मार्गं निर्दिशति ।

**कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।**
**मा कर्मफलहेतुर्भूर्मा ते संगोस्त्वकर्मणि ॥**

(भ.गी. २-४७)

**सरलार्थः** श्लोकस्यास्य भावोऽस्ति यत् कर्मकरणे अस्माकम् अधिकारोऽस्ति, न कदापि कर्मफलेषु । फलार्थं कर्म न कर्तव्यम्, शास्त्रविरुद्धकर्मणि आसक्तिरपि न स्यात् ।

भगवतः श्रीकृष्णस्य कथनस्याभिप्रायोऽस्ति यत् - कर्मणि अस्माकमधिकारोस्तीति न, परन्तु अधिकारो भवितुमर्हतीति । वचनमिदं किञ्चिद् गम्भीरतया आलोचनीयमस्ति । लोके विज्ञानस्य अभियन्तृविद्यायाश्च (तकनिकी) विकासः कियान् वा भवेत्, परन्तु कार्यकरणार्थं द्वावेव उपकरणे अस्माकं समीपे भवतः, ते स्तः शरीरं मनश्च । मनसः चञ्चलतया तस्य नियन्त्रणस्य कठिनतया च सर्वेऽपि चिरपरिचिता एव सन्ति । अर्जुनः श्रीकृष्णं कथयति यत् - मनः अत्यन्तं चञ्चलं बलवच्चास्ति, तस्य वशीकरणं वायोरवरोधनमिव सुदुष्करम् अस्ति ।

**चञ्चलं हि मनः कृष्ण प्रमाथि बलवद्दृढम् ।**
**तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ॥** (भ.गी. ६-३४)

अर्जुनस्य वचनमिदम् अंगीकुर्वन् श्रीकृष्णः तन्निग्रहोपायं कथयति ।

**असंशयं महाबाहो मनो दुर्निग्रहं चलम् ।**
**अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते ॥** (भ.गी. ६-३५)

चञ्चलस्वभावतया मनोनिग्रहं सुदुष्करम् इत्यत्र नास्ति संशीतिः, तथापि सतताभ्यासेन तदितरवस्तुवैराग्येण च गृहीतुं शक्य इति अभिप्रैति ।

अतः साररूपेण इदं वक्तुं शक्यते यत् – कार्यकरणे प्रधानकारणभूतस्य मनस उपरि प्रायः जनानां नियन्त्रणं न भवति । न केवलं मनः, अपितु शरीरमपि अस्माकं नियन्त्रणे नास्ति । हृदयमस्तिष्कादीनि शरीरस्य महत्त्वपूर्णान्यङ्गानि अस्माकमनुमतिं विनैव कार्यं कुर्वन्ति । न कोऽपि जानाति यत् तानि कदा वा कार्यकरणात् विरमन्ति इति । शरीरं सर्वाधिकं जटिलयन्त्रमस्ति । समयानुसारं क्षरणस्वभावमिदं शरीरं कदाचिद् अकस्मादेव कार्यकरणाद्विरमति । वयं कमपि कार्यं तदेव कर्तुं शक्ष्यामः यदास्माकं शरीरमनसी स्वस्थे भवतः । यदि मनः सम्यग् नास्ति तर्हि कार्यं कर्तुं न शक्नुमः, यदि मनः योग्यं भवति परन्तु शरीरं रोगग्रस्तं भवति तर्ह्यपि कार्यं कर्तुं न प्रभवामः । अतः कर्मणामुपरि अस्माकमधिकारः निश्चितरूपेण नास्ति । अतः भगवान् श्रीकृष्णः कथयति यत् – कर्मोपरि अस्माकमधिकारः भवितुमर्हति, परन्तु कर्मफलोपरि कदापि अस्माकम् अधिकारः नास्ति । यद्यस्माभिः कर्म कृतं तर्हि फलमवश्यं लभ्यते । कर्मसिद्धान्तानुसारं प्रत्येकं कर्म स्वफलं प्रयच्छत्येव । कर्म तु कर्तारमेव फलं ददाति, कर्मसिद्धान्ते निरस्तीकरणनियमस्तु न भवत्येव । तदुक्तम् अभियुक्तैः ।

**अवश्यमनुभोक्तव्यं कृतं कर्म शुभाशुभम्** इति । यदि वयं दशपुण्यकर्माणि दशपापकर्माणि च कुर्मः तर्हि परस्परं संकलनव्यवकलनाभ्यां कर्मफलं शून्यं न भवति । दशपुण्यकर्मणां दशपुण्यफलानि, दशपापकर्माणां दशपापफलानि च प्राप्यन्ते, परन्तु फलस्वरूपं किमित्येतद् महद्रहस्यं वर्तते । कर्मणां गतिः अतीव गहनास्ति । भगवान् श्रीकृष्णः वदति – **गहना कर्मणो गतिः** (भ.गी. ४–१७)

यदि कर्मसिद्धान्तानुसारं प्रत्येकं कर्मणः फलं भवति तर्हि भगवानिदं किमर्थं कथयति ? कर्मफलोपरि अस्माकमधिकारो नास्तीति ? अत्रेदं चिन्तनीयम् । सृष्टौ कर्मकर्तारः न केवलं वयं स्मः, अपितु सम्पूर्णोपि प्रपञ्चः किमपि कर्म कुर्वन्नेव भवति । कर्मफलं तेषां सर्वेषां कर्मणां प्रभावेण निर्धारितं भवति । यथा–कस्याञ्चित् प्रतियोगितायां प्रथमस्थाने को भवेदिति निर्धारणं न केवलं प्रथमस्थानं प्राप्यमाणो प्रतियोग्येव करोति, अपितु सर्वेषां प्रतियोगिनां प्रयासः एतस्य निर्धारणं करोति । यद्यस्माभिः सफलैर्भाव्यं तर्हि अस्माकं लक्ष्यं फलोपरि न, अपितु कर्मणां परिपूर्णताया उपरि स्यात् । यद्यस्माकं मनः केवलं फलाभिमुखं भवति, तर्हि तस्य द्विधा हानिः स्यात् – कर्मणि गुणवत्ता न स्यात् तथा फलाप्राप्तिदशायां कुण्ठता विषादता वा आपद्येत । अतः श्रीकृष्णः कथयति फलहेतुकं कर्म न कर्तव्यम् इति । वयं इच्छामो न वा, परन्तु कर्मसिद्धान्तानुसारं फलप्राप्तिः भवत्येव । फलहेतुकस्य कर्मण अकरणे फलाप्राप्तौ उत्पत्स्यमानाः कुण्ठा, हताशा, विषादग्रस्ततादिमनोवैज्ञानिकसमस्याः स्वयमेव नश्येयुः । वयं तादृशं व्यक्तिविशेषं कल्पयेम यश्च निरन्तरं कर्मकुर्वन्नपि फलाशया मुक्तस्तिष्ठति । कर्मसिद्धान्तानुसारं तस्याः व्यक्तेः कर्मफलं तु प्राप्यत एव, कदाचिद् फलं तस्यानुकूलं न भवति चेदपि सः कुण्ठितो, निराशो, हताशो वा न भवति ।

अत एव फलाकांक्षायाः परित्यागः, निरन्तरं क्रियाशीलता च सर्वथा श्रेष्ठा मनोवैज्ञानिकस्थितिः विद्यते । अस्याः स्थितेः प्राप्तिः कठिना, परन्तु नासम्भवा । यतो हि जीवनस्य महत्वपूर्णा उपलब्धयः कठिनप्रयासेनैव उपलभ्यन्ते ।

## सफलताया निर्धारकतत्त्वानि

प्रत्येकं जनः जीवने सफलतां प्राप्तुमिच्छति । सफलतायाः निर्धारकतत्त्वानि, तथा सफलतां प्रति उचितदृष्टिरपि गीताया विवेच्यविषयेषु परिगण्यते । सर्वेऽपि सफलतामिच्छन्ति, परन्तु भवन्ति केचन एव, अतः सफलतां प्रति उचितस्य व्यावहारिकदृष्टिकोणस्य विकासः अत्यन्तमावश्यकोऽस्ति । गीतायां कर्मसिद्धेः, सफलतायाश्च पञ्च कारणानि प्रोक्तानि ।

**अधिष्ठानं तथा कर्ता करणं च पृथग्विधम् ।**
**विविधाश्च पृथक्चेष्टा दैवं चैवात्र पञ्चमम् ॥** (भ.गी. १८–१४)

सरलार्थः अधिष्ठानं शरीरम्, कर्ता जीवात्मा, करणं च पृथग्विधम् – अर्थात् वाक्पाणिपादादि पञ्चकं समनस्कं कर्मेन्द्रियम्, विविधाः पृथक्चेष्टाः, चेष्टाशब्देन प्राणापानादिपञ्चात्मा वायुः अभिधीयते । दैवमेव अत्र पञ्चमम्, अत्र कर्महेतुकलापे पञ्चमः परमात्मा अन्तर्यामी प्रधानहेतुः भवति ।

**विवरणम्** – यदि वयं अक्षेत्रे कार्यं कुर्मः तर्हि अस्माकं सफलता सन्दिग्धा भवति । अतः सफलताकांक्षिभिः क्षेत्रस्य चयनम् अत्यन्तं जागरूकतया कर्तव्यं भवति । यदि कर्मकर्ता पूर्णमनोयोगेन कार्यं न करोति तर्ह्यपि प्रायः परिणामः अननुकूल एव भवति, सफलता कर्तारमपि आश्रयते । कर्तुः एकाग्रता, समर्पणम्, कर्मवेगश्च परिणामं निर्धारयन्ति । कर्तृद्वारा उपयुज्यमानानां साधनानां महत्त्वं तु सातिशयमेव, अतः साधनमपि देश–काल–परिस्थितीनामनुसारं भवेत् । सर्वेषु साधनेषु विद्यमानेष्वपि यदि योग्या चेष्टा न क्रियते तर्हि परिणामः नायात्येव । अतः सफलतायै चेष्टा आवश्यकी । कदाचिद् एतदपि दृश्यते यत् – व्यक्त्या सर्वाः सम्भवनीयक्रियाः कृताश्चेदपि सफलता सुदूर एव तिष्ठति । यतो हि सफलतायां दैवानुग्रहस्यापि प्रधानभूमिका वर्तते, दैवी विधानं सफलतायाः पञ्चमं कारणमस्ति –

### कर्मसु ज्ञानयोगः भक्तियोगश्च

''**दैवं चैवात्र पञ्चमम्**'' – ईश्वरः, दैवम्, भाग्यम्, प्रारब्धः, योगेति यो वा को वा भवतु, एतादृशी एका अदृश्यशक्तिः अवश्यमेवास्ति, यस्याः प्रभावः अस्माकं जीवने भविष्यति । कदाचिद् बहुप्रयत्नानन्तरमपि किमपि न लभ्यते, कदाचित् समयात् पूर्वमेव, अल्पचेष्टया वा सफलता हस्तगता भवति । यदा पञ्चमं कारणं अनुकूलकरं भवति तदा सफलता अल्पप्रयासेनैव लभ्यते, अन्यथाऽस्माकं सर्वविधप्रयत्नोऽपि जले होम इव भवति । एतदेव भङ्ग्यन्तरेणोक्तमभियुक्तैः –

**उद्यमः साहसं धैर्यं बुद्धिः शक्तिः पराक्रमः ।**
**षडेते यत्र वर्तन्ते तत्र दैवं सहायकृत् ॥**

सफलताया – असफलतायाश्च चक्रं जीवने प्रचलदेव भवति । गीता विषयेऽस्मिन् अस्मभ्यं सम्यग्दृष्टिं प्रददाति । अस्माभिः सर्वविधचेष्टाः कर्तव्याः, पूर्णप्रयत्नोऽपि विधेयः, तत्पश्चात् कर्मफलरूपेण यत्किमपि लभ्यते तत् प्रसादभावनया स्वीकर्तव्यमस्ति । यस्य प्राप्तौ प्रसन्नताया अनुभूतिर्जायते स प्रसाद इति कथ्यते । प्रसन्नतया निर्लिप्ततया च साकं प्रयत्नोऽपि गीतादर्शने समाहितोऽस्ति । यदि वयं दुःखेन कुण्ठितेन वा मनसा चेष्टां कुर्मः तर्हि अस्माकं जीवनं अशान्तिपूर्णं भवति । एतद्विपरीतं यदा वयं प्रसन्नतापूर्वकं प्रयत्नं कुर्मः तदा कदाचित् फलाप्राप्तावपि जीवनयात्रा सुखदा भविष्यति । अतः सर्वदाऽस्माभिः प्रसन्नतापूर्वकं पूर्णयत्नः विधेयः । स्वप्रयत्नानन्तरं त्वरितमेव तटस्थैर्भाव्यं, यत्किमपि फलं परमात्मा प्रददाति तत् कृतज्ञताभावनया प्रसादरूपेण च स्वीकर्तव्यमस्ति ।

पूर्वकाले फलासक्तिरहितं कर्मकुर्वता कर्मयोगिना महापुरुषेण परमात्मप्राप्तिः कथं सम्प्राप्त इति प्रश्नस्योत्तरं साक्षात् भगवान् वासुदेवः अग्रिमश्लोके निरूपयति –

**कर्मणैव हि संसिद्धिमास्थिता जनकादयः ।**
**लोकसंग्रहमेवापि सम्पश्यन्कर्तुमर्हति ॥** (भ.गी. ३–२०)

**सरलार्थः** पुरा जनक – मनु – इक्ष्वाक्वादयः महापुरुषाः कर्मयोगद्वारा एव परमां सिद्धम् अविन्दन्त । अतो भवान् लोकस्य मार्गदर्शनार्थं निष्कामभावेन कर्म कर्तुं प्रभवति ।

**विशेषार्थः** कर्मयोगः अतीव प्राचीनयोगः वर्तते । येन च जनकादयः अनेके महापुरुषाः परमात्मानमविन्दन्त । अतः वर्तमानसमये भविष्यति वा यदि कश्चित् कर्मयोगद्वारा परमात्मानं प्राप्तुमिच्छति तर्हि सः सम्प्राप्तानि शरीरादिप्राकृतवस्तूनि कदापि स्वस्य, स्वस्मै वा न भावयेत् । कारणमस्ति यत् वास्तवे तानि अस्माकम् अस्मभ्यं वा न सन्त्येव, प्रत्युत संसारस्य

संसारार्थं च विद्यन्ते । एनां वास्तविकतां मत्वा संसारे उपलब्धानां वस्तूनां संसारस्यैव सेवायां उपयोगेन सुगमतापूर्वकं संसारसम्बन्धात् विच्छेदो भवति, परमात्मप्राप्तिश्च सम्भवति । अत एव कर्मयोगः परमात्मप्राप्तेः सुगमं श्रेष्ठं स्वतन्त्रञ्च साधनमित्यत्र नास्ति संशीतिः । निष्कामकर्मयोगानुष्ठानेन लोकसंग्रहः कथं भवतीति विवेचनमस्ति गीतायाम् ।

**यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ।**

**स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ॥** (भ.गी. ३/२१)

**सरलार्थः** महापुरुषाः यादृशं सदाचरणं कुर्वन्ति, लोकोऽपि तादृशमेव आचरणं करोति । सः यदाचरणं प्रामाण्यं मनुते जना अपि तमेवाचरणं प्रामाणिकं मत्वा तस्यानुकरणशीलाः अनुयायिनश्च भवन्ति ।

**विशेषार्थः** प्रायः इदं सर्वत्रावलोक्यते - यः समाजे, सम्प्रदाये, जातौ, वर्णे, आश्रमे वा श्रेष्ठः मनुष्यः कथ्यते, सः यथाचरति, तस्य समाजस्य, सम्प्रदायस्य, जातेश्च जना अपि तथैवाचरणं कुर्वन्ति । **स यत् प्रमाणं कुरुते लोकस्तदनुवर्तते ।** यस्यान्तःकरणे कामना, ममता, आसक्ति, स्वार्थ पक्षपातादिदोषलेशोऽपि नास्ति तथा नश्वराणां पदार्थानां महत्वं न ददाति अथवा कस्मैचित् न स्पृहयति, तादृशमहापुरुषद्वारा प्रोक्तानां वचनानां प्रभावः अन्येषामुपरि स्वत एव भवति, तथा ते तद्वचनानुसारं स्वयमाचरणं कर्तुम् आरभन्ते ।

अपि च रागद्वेषयोः अवशो भूत्वा किं कर्तव्यम् ? कि न कर्तव्यम् ? इति प्रश्नयोः समाधानं कथयति पार्थसारथिः -

**श्रेयान् स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् ।**

**स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ॥** (भ.गी. ३/३५)

**सरलार्थः** बहुगुणयुक्तात्परधर्मात् अल्पगुणयुक्तोऽपि स्वधर्मः श्रेष्ठतरः विद्यते । स्वधर्माचरणद्वारा कदाचित् मरणं प्राप्नोति चेदपि वरं, यतो हि बहुगुणयुक्तोऽपि परधर्मः परिणामेन भयङ्करो भवति ।

**विशेषार्थः** अन्येषां वर्णाश्रमादीनां धर्मः बाह्यदर्शनेन गुणसम्पन्नोऽपि, पालने सुगमश्चेदपि, धन-वैभव-सुख-सामग्रीणां लाभेऽपि, मान-सम्मानादीनां प्रापकश्चेदपि, आजीवनं सुखदायी चेदपि, तस्य परधर्मस्य पालनं स्वस्मै अविहितत्वात् परिणामेन भयङ्करो भवति । एतद्विपरीतः स्ववर्णाश्रमादिधर्मः बाह्यदर्शनेन अल्पगुणोऽपि, पालने कष्टकरोऽपि, धन - वैभव- सुख- सामग्रीणाम् अप्रापकोऽपि, मान-सम्मानादीनां अप्रदायकोऽपि तथा आजीवनं कष्टसाध्योऽपि तस्य स्वधर्मस्य निष्कामभावेन पालनं, परिणामेन कल्याणकारकं भवति । अत एव मानवेन कस्याञ्चिदपि परिस्थितौ स्वधर्मस्य त्यागः न कर्तव्यः, प्रत्युत निर्मोहः - अनासक्तश्च भूत्वा स्वधर्मस्यैव पालनं कर्तव्यम् ।

मनुष्यस्य स्वधर्मपालनं स्वाभाविकं सहजञ्च भवति । मानवानां जन्म कर्मानुसारं भवति, जन्मानुसारं कर्म च नियतं भवति । अत एव स्व-स्वनियतकर्मणां पालनेन मनुष्यः कर्मबन्धनात् मुक्तो भवति, अर्थात् तस्य कल्याणं जायते ।

**स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नर : ॥**

(भ.गी. १८/४५)

अतः कदाचित् किञ्चित् दोषदर्शनेऽपि नियतकर्मण अर्थात् स्वधर्मस्य त्यागः न कर्तव्यः ।

**कर्मयोगस्य अवधारणाः**

(१) किमपि कर्मफलं प्राप्तुं कर्ता - करणं - क्रियेति त्रिपुटेरावश्यकता भवति । परन्तु एतेषु किमपि स्वतन्त्ररीत्या कर्मफलमुत्पादयितुं न शक्नोति । लांगलः स्वयमेव भूमिं कर्ष्टुं न समर्थः । कर्तुरभावे क्रियैव न सम्भवति । यदि कर्ता जीव एव कर्मफलमुत्पादयति तर्हि सः कदापि अनिष्टं फलं नाप्नुयात्, अपितु सदैव इष्टफलमेव लभेत । परन्तु तथाविधं कार्यजातं न दृष्टिपथमायाति । एतावता सिध्यति यत् - कर्मफलप्रदायिनी कापि भिन्ना शक्तिः वरीवर्ति । सा शक्तिरेव ईश्वरनाम्ना अभिधीयते ।

(२) पूर्वनिर्मितेऽस्मिन् जगति एव प्राणिन: जायन्ते । केनापि जीवेन स्वस्य निर्मिति: स्वयमेव न कृता, न वा स्वजन्मानन्तरं जगदिदमुत्पादितम् । किमपि कार्यं निर्मातारं विना नैव सम्भवति । विना ज्ञानं शक्तिं वा किमपि निर्माणकार्यं भवितुं नार्हति । अयं सर्वज्ञ: सर्वशक्तिमान् निर्माता एव ईश्वर: । मनुष्य: केवलम् ईश्वरप्रदत्तशक्तेराधारेण स्वजीवनं सुखपूर्णं कर्तुं प्रयतते । स: प्रकृतिनियमेभ्य: विरुद्धं गन्तुं न प्रभवति ।

(३) वस्तुत: कर्मफलं कर्मफलेच्छा वा नैवास्माकं दु:खकारणम्, अपितु सदा इष्टं फलमेव लभेयम् इत्ययं दुराग्रह एव दु:खमूलम् ।

(४) ईश्वरं कार्याध्यक्षं मत्वा कर्तृत्वाभिमानं परित्यज्य कर्मानुष्ठानमेव ईश्वरार्पणबुद्धि: निगद्यते । यथा – देवालये वयं देवताप्रसादं सहर्षं गृह्णीम:, तथैव सर्वेषां कर्मणां फलं ईश्वरनियमानुसारं प्राप्यत इति बुद्ध्या प्रसादरूपेण स्वीकर्तव्यम् । प्रसादविषये किं वस्तुजातं ? कियता प्रमाणेन प्राप्यते ? इति विचारं न कुर्म: ।

(५) मन्दिरे वर्तमाना इयं प्रसादग्रहणबुद्धि: यदि कर्मफलप्राप्तिविषयेऽपि अक्षुण्णा स्यात्, तर्हि अस्माकं मन: राग – द्वेष – मोहादिभि: अस्पृष्टं तिष्ठेत् । इदमेव निर्मलं मन इति कथ्यते । अस्मिन्नेव मनसि आत्मज्ञानप्राप्ते: योग्यता समुदेति ।

(६) संक्षेपेण इदं वक्तुं शक्यते यत् – कर्तृत्वाभिमानेन कर्मफलासक्त्या च कृतं कर्म बन्धकारणं भवति, ईश्वरं कार्याध्यक्षं कर्मफलदातारं च मत्वा कृतं कर्म चित्तशुद्धिद्वारा मोक्षाय कल्पते । इत्थं फलासक्तिं विना केवलं कर्तव्यबुद्ध्या कृतं कर्म कर्मयोगनाम्ना अभिधीयते ॥

**कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।**
**मा कर्मफलहेतुर्भूर्मा ते संगोस्त्वकर्मणि ॥**

## स्वाध्याय:

### १. योग्यविकल्पं चित्त्वा उत्तरं लिखत ।

(१) आत्मोन्नतिं साधयितुं कति मार्गा: सन्ति ?

(क) एक: (ख) द्वौ (ग) त्रय: (घ) चत्वार:

(२) कर्म किमस्ति ?

(क) परिहार्यम् (ख) अपरिहार्यम् (ग) वैकल्पिकम् (घ) यादृच्छिकम्

(३) मनस: निग्रहोपाया: कति सन्ति ?

(क) त्रय: (ख) द्वौ (ग) चत्वार: (घ) पञ्च

(४) अधिष्ठानं भवति ।

(क) जीवात्मा (ख) शरीरम् (ग) संसार: (घ) ब्रह्म

(५) किमपि कर्मफलं प्राप्तुं कस्यावश्यकता भवति ?

(क) मनस: (ख) बुद्धे: (ग) इन्द्रियस्य (घ) त्रिपुटे:

### २. रिक्तस्थानं पूरयत ।

(१) ______________ अत्यन्त: प्राचीनयोग: वर्तते ।

(२) मानवानां जन्म ______________ अनुसारं भवति ।

(३) अर्जुनः युद्धभूमेः ______________ कर्तुं इच्छति स्म ।

(४) मनसः वशीकरणं ______________ इव सुदुष्करमस्ति ।

(५) कर्मसिद्धान्ते ______________ नियमः नास्त्येव ।

## ३. युग्मकं योजयत ।

| अ | ब |
|---|---|
| (१) ईश्वरः | भयावहः |
| (२) अधिष्ठानम् | चञ्चलम् |
| (३) मनः | कार्याध्यक्षः |
| (४) प्रसादः | शरीरम् |
| (५) परधर्मः | प्रसन्नता |
| | इन्द्रियम् |

## ४. एकवाक्येन उत्तरं लिखत ।

(१) किमपि कार्यं केन विना न भवति ?

(२) कर्म कथं जनान् मुहुर्मुहुः संसारचक्रे परिभ्रामयति ?

(३) किं सर्वाधिकं जटिलयन्त्रमस्ति ?

(४) जीवनस्य महत्वपूर्णा उपलब्धयः केन लभ्यन्ते ?

(५) अस्माकं सफलता कदा सन्दिग्धा भवति ?

## ५. द्वित्रवाक्यैः उत्तरं लिखत ।

(१) मनोनिग्रहः कथं कर्तुं शक्यते ?

(२) सफलताविषये गीता अस्मभ्यं कीदृशीं दृष्टिं ददाति ?

(३) दुःखमूलं किमस्ति ?

## ६. टिप्पणीं लिखत ।

(१) **चञ्चलं हि मनः कृष्ण ।**

(२) **दैवं चैवात्र पञ्चमम् ।**

(३) **स्वधर्मे निधनं श्रेयः ।**

## ७. सविस्तरमुत्तरं लिखत ।

(१) कर्म कथम् अपरिहार्यमस्ति ?

(२) सफलतायाः निर्धारकतत्त्वानि निरूपयत ।

(३) जनकादयः कथं संसिद्धिमास्थिताः ?

● ● ●